आब्रह्मस्तम्बपर्यन्तैः सर्वप्राणिभिः सर्वप्रकारस्य ापि
दुःखस्य स्वरसत एव जिहासितत्वात्तन्निवृत्त्यर्था प्र-

श्रीगणेशाय नमः ॥

ओं नमः परब्रह्मणे ॥

विष्णोस्तत्परमं धाम द्योतमानं निजश्रिया ।
अनन्तामितमद्वैतमात्मभूतं पुनातु नः ॥ १ ॥
तेजस्त्रैयम्बकं भूयाद्भूयसे श्रेयसे मम ।
यद्दाचामति निःशेषं भक्तानां भववारिधिम् ॥ २ ॥
नैष्कर्म्यसिद्ध्यभिधया सुधया सुधियां व्यधात् ।
यो ऽमृतत्वं नमामस्तं सुरेश्वरसुधानिधिम् ॥ ३ ॥
तर्कोद्यनखोद्भिन्नवादिदैत्यभुजान्तरः ।
प्रह्लादयतु नः शश्वद् ज्ञानोत्तममृगोत्तमः ॥ ४ ॥
चोलेषु मङ्गलमिति प्रथितार्थनाम्नि
ग्रामे वसन्पितृगुरोरभिधां दधानः ।
ज्ञानोत्तमः सकलदर्शनपारदृश्वा
नैष्कर्म्यसिद्धिविवृतिं कुरुते यथावत् ॥ ५ ॥

व्याचिख्यासितायाः श्लोकसंदर्भरूपाया नैष्कर्म्यसिद्धेरधि कारिप्र-

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

वृत्तिरस्ति स्वरसत एव ॥

दुःखस्य च देहोपादानैकहेतुत्वा,द्देहस्य च पूर्वो-

योजनतत्साधनसंबन्धविषयाणामभावादनारम्भमाशङ्क्य स्वयमेव संबन्धोक्तिं कुर्वन्नाचार्यः प्रकरणारम्भसिद्ध्यर्थं क्रमेण तानुपपादयति आब्रह्मस्तम्बपर्यन्तैरित्यादिना, प्रकरणमिदमारभ्यतइत्यन्तेन ग्रन्थेन ॥ तत्र तावदधिकारिणमुपपादयति तन्निवृत्त्यर्था प्रवृत्तिरस्ति स्वरसत एवेत्यन्तेन ॥ आब्रह्म च ते स्तम्बपर्यन्ताश्चेति आब्रह्मस्तम्बपर्यन्तास्तैश्चतुर्मुखप्रभृतिभिः स्तम्बावसानैः प्राणिभिरिति यावत् । सर्वप्रकारस्य, आध्यात्मिकादिभेदभिन्नस्य । स्वरसत एव, स्वभावत एव शास्त्राधेयसंस्कारमन्तरेणेति यावत् । इदमत्र तात्पर्यम् । यद्यप्यतीतं दुःखमतीतत्वादेव न निवर्त्यम् । नापि वर्तमानं, स्वत एव निवृत्तेः । नाप्यनागत मनुपस्थितेरेव निवर्तयितुमयोग्यत्वात् । तथाप्यनागतं दुःखं तद्धेतुनिवर्तनेन शक्यमेव निवर्तयितुम् । अतः संभवत्येव निखिलदुःखनिवृत्तिकामो ऽधिकारीति ॥

नन्वाध्यात्मिकदुःखस्याधिव्याधिप्रभवस्यायुर्वेदविहितोपायै,राधिभौतिकस्य च शत्रुव्याघ्रादिजन्यस्यान्वयव्यतिरेकसिद्धतत्तत्साधनैः, आधिदैविकस्य चातिवातातिवर्षणादिनिमित्तस्य शान्तिकपौष्टिकादिना निवृत्तिः स्यात् । ततः प्रकरणस्य न प्रयोजनमन्यत एव सिद्धे,रित्याशङ्क्य आत्यन्तिकदुःखनिवृत्तिलक्षणप्रयोजनस्य प्रकरणप्रतिपाद्यात्मविद्याव्यतिरिक्तसाधनान्तरासाध्यत्वं दर्शयति दुःखस्य चेत्यादिना, अशेषपुरुषार्थपरिसमाप्तिरित्यन्तेन ॥ देहस्य कार्यकरणसंघातलक्षणस्योपादानमहंममग्रहः । स एवैको मुख्यो हेतुर्यस्य तद् दुःखं देहोपादानैकहेतुस्तस्य भावस्तत्त्वं तस्मादिति विग्रहः । दुःखस्यानुच्छित्तिरिति वक्ष्यमाणेन संबन्धः । यद्यपि कदाचित् किंचिद्दुःखं

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

पचितधर्माधर्ममूलत्वादनुच्छित्तिः। तयोश्च विहितप्रतिषिद्धकर्ममूलत्वादनिवृत्तिः॥

कर्मणश्च रागद्वेषास्पदत्वाद्रागद्वेषयोश्च शोभनाशोभनाध्यासनिबन्धनत्वा,दध्यासस्य चाविचारितसिद्धद्वै-

---

देहे सत्यपि निवर्त्यमानमुपलभ्यते तथापि स्वसमानाधिकरणदुःखान्तरप्रागभावासमानकालीनदुःखनिवृत्तेः देहोपादाने सत्यसंभवान्न तन्निवृत्तिरुपायान्तरसाध्येति भावः। एवमपि कार्यत्वादुपादीयमानदेहस्य स्वयमेव निवृत्तेः किमत्र विद्ययेत्यत आह देहस्य चेति॥ देहस्य, देहसंतानस्य। पूर्वैः, प्राक्तनदेहैः उपचितौ, उपार्जितौ यौ धर्माधर्मौ तद्धेतुकत्वात्तयोः सतोर्नोच्छित्तिरित्यर्थः। एवमपि धर्माधर्मयोरुपभोगेन क्षये सति कारणाभावाद्देहसंतानस्यापि विच्छेदो भविष्यतीत्यत आह तयोश्चेति॥ तयोरपि धर्माधर्मयोर्विहितप्रतिषिद्धे ये कर्मणी यजनब्रह्महननादिव्यापारलक्षणे तज्जन्यत्वात्तयोः स्थितौ न निवृत्तिरित्यर्थः॥

विहितनिषिद्धकर्मणोरपि क्षणिकत्वात्स्वयमेव विच्छेदो भविष्यतीत्यत आह कर्मणश्चेति॥ व्यक्तिरूपेण विच्छिद्यमानस्यापि कर्मजातस्य रागद्वेषकार्यत्वात्तयोः स्थितौ न तत्संतानविच्छेद इत्यर्थः। रागद्वेषयोरपि कार्यत्वात् स्वत एव निवृत्तिमाशङ्क्याह रागद्वेषयोश्चेति॥ विषयेषु शोभनं रमणीयमिदमिति यः प्रत्ययः, यश्च तद्विपरीतमशोभनमिति प्रत्यय,स्तावव्यभिचारिणि विषये व्यभिचारित्वादिभ्रमभूतौ तयोश्च स्थितयोर्न तज्जन्यरागद्वेषसंतानविच्छेद इत्यर्थः। तयोरप्यध्यासयोरनित्यत्वात्स्वत एव निवृत्तिमाशङ्क्याह अध्यासस्येति॥ अध्यासस्य द्वैतप्रपञ्चनिबन्धनत्वात्तस्मिन्विद्यमाने निवृत्तिर्न स्यादित्यर्थः। द्वैतप्रपञ्चस्यापि कार्यत्वादनित्य-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

तदवस्तुनिमित्तत्वात्, द्वैतस्य च शुक्तिकारजतादिवत्सर्वस्यापि स्वतःसिद्धाद्वितीयात्मानवबोधमात्रोपादानत्वादव्यावृत्ति,रतः सर्वानर्थहेतुरात्मानवबोध एव ॥

सुखस्य चानागमापायिनो ऽपरतन्त्रस्याऽऽत्मस्वभावत्वात्तस्यानवबोधः पिधान,मतस्तस्यात्यन्तोच्छित्तावशे-

---

षमाशङ्क्याह द्वैतस्य चेति ॥ सर्वस्यापि द्वैतप्रपञ्चस्य स्वतःसिद्धत्वात्स्वयंप्रभत्वादद्वितीयो द्वितीयशून्यो यो ऽयमात्मा तस्य तस्मिन्योयमनवबोधः स्वतःसिद्धतया सततमद्वैतरूपेण प्रकाशप्राप्तौ तथाप्रकाशादर्शनाच्छुक्तिकारजतादिवद्विपरीतरूपप्रकाशदर्शनाच्च तद्धेतुतया कल्पितस्तन्मात्रोपादानत्वात्तस्मिन् विद्यमाने तस्य न निवृत्तिरित्यर्थः । तदेवमज्ञानस्य द्वैतप्रपञ्चाध्यासरागद्वेषप्रवृत्तिधर्माधर्मदेहोपादानत्वात्परंपरया दुःखहेतुत्वात्तस्मिन् सति दुःखस्योपायान्तरेण न निवृत्तिरित्युपसंहरति अत इति ॥

न केवलमसौ सर्वानर्थहेतुरात्मस्वभावतया सततमपरोक्षावभासयोग्यतां प्राप्तस्य सुखस्यापि तिरोधायकस्तस्मात्तन्निवृत्तौ निरतिशयसुखावाप्तिरस्मात् सम्यग्ज्ञानात्सिध्यतीत्यभिप्रेत्याह सुखस्य चेति ॥ आगमश्चापायश्चागमापायौ उदयास्तमयौ, तौ विद्येते यस्य तदागमापायि, न आगमापाय्यनागमापायि तस्येत्यर्थः । अनागमापायित्वं कुत इत्यत आह अपरतन्त्रस्येति ॥ कारणाऽनधीनस्येत्यर्थः । इतश्चानागमापायित्वमपरतन्त्रत्वं चोचितमित्याह आत्मस्वभावत्वादिति ॥ सुखमनागमापायि अपरतन्त्रं च आत्मस्वभावत्वादात्मवदित्यर्थः । "एषो ऽस्य परम आनन्द" "आत्मैवानन्द" इत्याद्यागमान्निरुपाधिकप्रेमास्पदत्वलिङ्गाच्च सुखस्यात्मस्वभावत्वमवगन्तव्यम् । ननु सुखस्यानवबोधः पिधायको ऽस्तु ततः किमित्यत आह अतस्तस्ये-

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

षपुरुषार्थपरिसमाप्तिः । अज्ञाननिवृत्तेश्च सम्यग्ज्ञान-स्वरूपलाभमात्रहेतुत्वात्तदुपादानम् ॥

अशेषानर्थहेत्वात्मानवबोधविषयस्य चाऽनागमिक-प्रत्यक्षादिलौकिकप्रमाणाविषयत्वाद्वेदान्तागमैकगम्या-

---

ति ॥ तस्य, अनवबोधस्य अत्यन्त,मनवशेषेण "भूयश्चान्ते विश्व-मायानिवृत्ति"रिति न्यायेन निवृत्तावशेषसकलदुःखनिवृत्तिरूप-स्य निरतिशयानन्दावाप्तिलक्षणस्य च पुरुषार्थस्य परितः सम्य-गाप्तिः स्यादित्यर्थः । ननु भवत्वेवं तथापि कर्मोपासनादिप-रिहारेण विशिष्टाधिकारिणः सम्यग्ज्ञानएव कुतः प्रवृत्तिर्येन सम्यग्ज्ञानाय प्रकरणारम्भसंभव इत्यत आह अज्ञाननिवृत्तेश्चेति ॥ सम्यग्ग्रहणेनोपासनाज्ञानं व्यावर्तयति, स्वरूपलाभग्रहणेन ज्ञा-नाभ्यासम्, मात्रपदेन च कर्मोपासनाम् । तदेवमुपायान्तरपरिहा-रेणाधिकारिणः सम्यग्ज्ञानोपादानमेव संभवतीत्यर्थः ॥

भवतु सम्यग्ज्ञानस्योपादानं तथापि तस्य प्रमाणान्तरादप्युपप-त्तेर्वेदान्तप्रकरणादिष्वेव तदर्थिनः कुतो नियमेन प्रवृत्तिरित्यत आह अशेषानर्थहेत्वात्मानवबोधविषयस्य चेति ॥ अशेषानर्थहेत्वाऽऽ-त्मानवबोधविषय आत्मा तस्याज्ञानविषयस्यात्मन इति यावत् । आ-गमिकमागमवाक्यजन्यं साक्षात्कारलक्षणं तन्न भवतीत्यनागमिकं प्रत्यक्षम् । आदिशब्देनानुमानादिर्यत्प्राणेन प्राणिति येन वा पश्य-तीत्याद्यस्ति तद्विषयत्वशङ्कापनोदनायाह अनागमिकेति ॥ कानि तानीत्यत आह लौकिकप्रमाणेति ॥ तेषां चात्मा न विषयो रूपा-द्यभावात् तत्संबद्धलिङ्गाद्यदर्शनाच्च । तदेवमनन्यसाधारणत्वादुपनि-षदामेवात्मा विषय इत्याह वेदान्तेति ॥ आगमग्रहणं "वेदोपरा

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

द्वेव सम्यग्ज्ञानमतो ऽशेषवेदान्तसारसंग्रहप्रकरणमिदमारभ्यते ॥

तत्राभिलषितार्थप्रचयाय प्रकरणार्थसंसूचनाय चायमाद्यश्लोकः—

वेदान्ता" इति मतनिरासेन प्रामाण्यसूचनाय । वाक्यग्रहणं च न कर्मशेषतया तेनैकवाक्यत्वं किं तु स्वतन्त्रत्वमिति द्योतनाय। एवकारश्च वाक्याभ्यासादेर्ज्ञानकारणत्वनिरासाय । इदानीं प्रकरणलक्षणमुपपादयन्प्रकरणारम्भमुपपादितमुपसंहरति अतो ऽशेषेति । यत उक्तरीत्या प्रयोजनादीनां सद्भावः साधनान्तरा ऽनधीनं च प्रयोजनमत इत्यर्थः । अत्राशेषवेदान्तशब्देन शास्त्रं दर्शितम् । तत्रापि निष्प्रपञ्चब्रह्मप्रतिपादकशास्त्रैकदेशेन संबन्धद्योतनाय सारग्रहणम् । तत्रापि विस्तरेण प्रतिपादितस्य संक्षेपेण प्रतिपन्नं कार्यान्तरं दर्शयितुं संग्रहग्रहणम् । तदेव—

शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥

इत्युक्तलक्षणलक्षितमिदं प्रकरणमिति ॥

इदानीं प्रतिश्लोकं संबन्धमाचक्षाणः प्रथमश्लोकस्य तात्पर्यं कथयन् संबन्धमाह तत्राभिलषितेति ॥ तत्र प्रकरणे ऽयमाद्यश्लोको ऽभिलषितार्थस्य, अभिलषितो ऽर्थः प्रकरणं तस्य प्रचयाय शिष्यपरंपरया शिष्टपरिग्रहाय । उपलक्षणमिदमविघ्नपरिसमाप्तिशिष्टाचारपरिपालनयोरिष्टदेवतानमस्कारस्य विद्यायाअन्तरङ्गसाधनत्वसूचनस्य। प्रकरणस्यार्थौ विषयः प्रयोजनं च तयोः सम्यक् सूत्रणं संक्षेपेण सूचनं तस्मै च । तत्र हेतुमाह अयमाद्य-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

खानिलाग्न्यब्धरित्र्यन्तं स्रक्फणीवोद्गतं यतः ।
ध्वान्तच्छिदे नमस्तस्मै हरये बुद्धिसाक्षिणे ॥ १ ॥
स्वसंप्रदायस्य चोदितप्रमाणपूर्वकत्वज्ञापनाय द्वितीय-

श्लोक इति ॥ यस्मादयमाद्यश्लोकस्तस्माच्छ्रोतृणां प्रवृत्त्यङ्गतया सुखावबोधाय चात्रैव सूचनीयमिष्टदेवतानमस्कारश्च करणीय इति ॥

खानिलेति ॥ खं चानिलश्चाग्निश्चापश्च धरित्री च खानिलाग्न्यब्धरित्र्यः । अन्तशब्दः स्वरूपवचनः स्वप्नान्तं बुद्धान्तमित्यादिवत् । खानिलाग्न्यब्धरित्रीस्वरूपम् । यद्वा खानिलाग्न्यब्धरित्रीशब्देन पञ्चीकृतानि पञ्च महाभूतान्युच्यन्ते । तानि भूतान्यन्तं लयं यस्य भौतिकस्य जगतस्तत् खानिलाग्न्यब्धरित्र्यन्तम् । यद्वा खानिलाग्न्यब्धरित्रीशब्देनापञ्चीकृतानि पञ्च महाभूतान्युच्यन्ते । तानि भूतान्यन्तं यस्य पञ्चीकृतभूतलक्षणस्य जगतस्तत् खानिलाग्न्यब्धरित्र्यन्तमित्यनुपात्तं विशेष्यम् । बहुव्रीहित्वाज्जगदित्येकं पदमध्याहरणीयम् । अथ वा उद्गतमिति कार्यजातमुच्यते । तदेव विशेष्यम् । तत् खानिलाग्न्यब्धरित्र्यन्तं यतो भवतीति क्रियाध्याहारः । यदि च खं चानिलश्चाग्निश्चापश्चेति खानिलाग्न्यप् । धरित्री यस्यान्तं तद्धरित्र्यन्तम् । किं तद्धरित्र्यन्तमित्याकाङ्क्षायां खानिलाग्न्यबिति संबन्धः । तत्खानिलाग्न्यब्धरित्र्यन्तम् । स्रक्फणीवेत्यादि ॥ स्रजः फणीव उद्गतमुद्भूतम् । तस्मै ध्वान्तच्छिदे बुद्धिसाक्षिणे हरये नम इति संबन्धः । स्रक्फणीवेत्यारम्भपरिणामवादव्युदासाय । हरये बुद्धिसाक्षिण इति सामानाधिकरण्यं प्रत्यगात्मपरमात्मनोरेकत्वलक्षणविषयद्योतनाय । ध्वान्तच्छिदे इत्यज्ञाननिवृत्तिलक्षणप्रयोजनकथनाय ॥ १ ॥

इदानीमुत्तरश्लोकतात्पर्यमाह स्वसंप्रदायस्येति ॥ स्वसंप्रदायः स्वेन संप्राप्तो विद्योपदेशस्तस्य । चशब्दो देवतानमस्कारेण गुरुनम-

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

ष्टगुणसंबन्धसंकीर्तनपूर्विका गुरोर्नमस्कारक्रिया—

अलब्ध्वाऽतिशयं यस्माद्व्यावृत्तास्तमबादयः ।
गरीयसे नमस्तस्मा अविद्याग्रन्थिभेदिने ॥ २ ॥

नमस्कारनिमित्तस्वाशयाविष्करणार्थः—

वेदान्तोदरसंगूढं संसारोत्सारि वस्तुगम् ।
ज्ञानं व्याहृतमप्यन्यैर्वक्ष्ये गुर्वनुशिक्षया ॥ ३ ॥

स्कारस्य समुच्चयार्थः । "तस्योदितं प्रमाणमाचार्यः" "आचार्यवान्पुरुषो वेद" "आचार्याद्धैव विद्या विदिता साधिष्ठं प्राप" इत्यादिश्रुतिभ्यस्तत्पूर्वकत्वज्ञापनाय । चोदितप्रमाणेति वा पदच्छेदः । तत्रायमेवार्थः । उदितप्रमाणेति पाठेऽप्ययमेवार्थः । विशिष्टगुणैराचार्यस्य यः संबन्धस्तत्कीर्तनपूर्विका गुरोर्नमस्कारक्रिया प्रदर्श्यत इति शेषः । यद्वा येयं नमस्कारक्रिया सा स्वसंप्रदायस्योदितप्रमाणपूर्वकत्वज्ञापनायेति संबन्धः । अलब्ध्वेति । तस्माद्गुरोरन्यत्रातिशयमलब्ध्वा तमबादयः प्रत्यया विषयाभावादिव व्यावृत्तास्तस्मिन्नेव परितिष्ठन्ति तस्मै गरीयसे नम इत्यन्वयः । तत्र हेतुमाह अविद्याग्रन्थिभेदिने इति ॥ स्वस्यान्यैरभेद्याऽविद्याग्रन्थिभेत्तृत्वाद्गुरोरेवंविधता सिद्धेत्यर्थः ॥ २ ॥

अनन्तरश्लोकाभिप्रायमाह नमस्कारनिमित्तेति ॥ नमस्कारस्य निमित्तभूतो यः स्वस्याशयोऽभिप्रायविशेषो येनाभिप्रायेण नमस्कारः कृतः तस्याविष्करणार्थमुत्तरश्लोक इत्यर्थः । वेदान्तेति ॥ ज्ञानं वक्ष्य इति संबन्धः । किंप्रमाणकं तदित्यत आह वेदान्तोदरसंगूढमिति ॥ वेदान्तानामुदरेऽन्तरेषु संगूढं संछन्नम् । अशुद्धबुद्धिभिरप्राप्यत्वात् । किंप्रयोजनं तदित्यत आह संसारोत्सारीति ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

किंविषयं प्रकरणमिति चेत्तदुपन्यासः—
यत्सिद्धाविदमः सिद्धिर्यदसिद्धौ न किं चन ।
प्रत्यग्धर्मैकनिष्ठस्य याथात्म्यं वक्ष्यते स्फुटम् ॥४॥

किंविषयं तदित्यत आह वस्तुगमिति ॥ समस्तद्वैतकल्पनाधिष्ठानभूतात्मतत्त्वविषयं तदित्यर्थः । नन्वेतस्य ज्ञानस्य बहुभिर्व्याकृतत्वात्किमिति त्वया तद् व्याक्रियते इत्यत आह व्याकृतमपीति ॥ बहुभिर्व्याकृतमपि गुर्वनुशिक्षया, त्वया ग्रन्थः कर्तव्य इति गुरोरनुशासनेन तदाज्ञापरिपालनायाहं तद्व्याकुर्व इत्यर्थः ॥ ३ ॥

ननु सामान्यतः प्रसिद्धं विशेषेणाप्रसिद्धं च वस्तु विषयो भवति । ब्रह्म तु निःसामान्यविशेषमद्वितीयत्वादतः कथं तद्विषयत्वं प्रकरणस्येत्याक्षिपति । किंविषयमिति ॥ तत्समाधानायोत्तरश्लोक इत्याह तदुपन्यास इति ॥ तद्विषयमिदं प्रकरणं तस्य विषयस्योपन्यास इत्यर्थः । यत्सिद्धाविति ॥ यस्य चिदात्मनः सिद्धावन्तःकरणादावाभासोदयात्स्फुटतरव्यवहारयोग्यत्वे सति इदमः प्रमात्रादेरनात्मनो जडस्य सिद्धिः स्फुरणम् । यदसिद्धौ यस्यात्मनो ऽन्तःकरणादावाभासाऽनुदयादसिद्धौ स्फुटतरव्यवहारायोग्यत्वे सति न किं चन, प्रमात्रादि जडं सिध्यतीति शेषः । यद्वा न किं चन, न कस्य चनेत्यर्थः । तदेवमनिर्णीतप्रमाणाप्रमाणकरणीयलोकप्रसिद्धिश्चिदात्मनि भावाद् ब्रह्मणः सामान्यतः सिद्धिरुक्तेति मन्तव्यम् । ननु ब्रह्मणो निःसामान्यविशेषत्वादविषयत्वमुक्तमित्याशङ्क्य तथापि तस्य सच्चिदात्मत्वादिसाधारणाकारेण सिद्धावपि सर्वप्रपञ्चविभ्रमाधिष्ठाननित्यशुद्धबुद्धमुक्ताद्वितीयानन्दलक्षणासाधारणाकारेणासिद्धेः संभवति प्रकरणविषयत्वमित्याह प्रत्यग्धर्मेति ॥ आत्मानात्मविवेका-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

विवक्षितप्रकरणार्थप्ररोचनायानुक्तदुरुक्ताऽप्रामाण्यकारणशङ्काव्युदासेन स्वगुरोः प्रामाण्योपवर्णनम्—

गुरुक्तो वेदराद्धान्तस्तत्र नो वच्म्यशक्तितः ।
सहस्रकिरणव्याप्तं खद्योतः किं प्रकाशयेत् ॥ ५ ॥

गुरुणैव वेदार्थस्य परिसमापितत्वात्प्रकरणोक्तौ

देहादिष्वनात्मतया बहिर्भावमापद्यमानेषु प्रातिलोम्येनान्तरमञ्चतीवेति प्रत्यक् साक्षी स चासौ धर्मश्चेति प्रत्यग्धर्मः । अविद्यातत्कार्ययोः स्वात्मन्यध्यस्तयोरधिष्ठानत्वेन धारणाद्धर्मः प्रत्यग्धर्म एवैकस्मिन्निष्ठा पर्यवसानमस्येति प्रत्यग्धर्मैकनिष्ठस्तस्य । आत्मानमनतिक्रम्य वर्तत इति यथात्मं तस्य भावो याथात्म्यम् । आरोपितप्रपञ्चस्वभावविरोधि ब्रह्मतत्त्वं तदितस्ततो विस्तरेण शारीरके दर्शितमित्यस्पष्टम् । इह तु संक्षिप्यैकत्र विस्पष्टमुच्यतइत्याह वक्ष्यते स्फुटमिति ॥ ४ ॥

स्फुटं वक्ष्यतइत्युक्तत्वाद्गुरुणा सम्यक् वेदार्थो नोक्त एवेति गुरोरप्रामाण्यमज्ञानलक्षणं विपर्ययलक्षणं च प्राप्तं तद्द्वारा स्वस्यापि तत्प्राप्तमेतन्निरस्यत्युत्तरश्लोक इत्याह विवक्षितप्रकरणेति ॥ वक्तुमिष्टे प्रकरणस्यार्थे शिष्याणां रुच्युत्पादनायाऽनुक्तदुरुक्तयोरप्रामाण्यज्ञप्तिहेतुभूतयोर्व्युदासेन स्वगुरोः प्रामाण्योपवर्णनं क्रियतइत्यर्थः । गुरूक्त इति ॥ गुरूक्त इत्युक्तत्वादेवानुक्तिलक्षणमप्रामाण्यं नास्ति । वेदराद्धान्तस्यैवोक्तत्वाद्दुरुक्तलक्षणमप्रामाण्यं च नास्तीति दर्शितम् । तत्किमभ्यधिकं त्वयोच्यतइति नेत्याह तत्र नो वच्मीति ॥ तत्र, वेदराद्धान्ते न वच्म्यधिकमिति शेषः । तत्र हेतुः अशक्तित इति ॥ तत्र दृष्टान्तमाह सहस्रकिरणेति ॥ यद्वा तत्रानुक्तं दुरुक्तं वा न वच्मीत्यर्थः ॥ ५ ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

ख्यात्याद्यप्रामाण्यकारणाऽऽशङ्केति चेत्तद्व्युदासार्थमु-
पन्यासः—

न ख्यातिलाभपूजार्थं ग्रन्थो ऽस्माभिरुदीर्यते ।
स्वबोधपरिशुद्ध्यर्थं ब्रह्मविन्निकषाश्मसु ॥ ६ ॥

अनर्थाऽनर्थहेतुपुरुषार्थतद्धेतुप्रकरणार्थ*संग्रहख्यापनायोपन्यासः—

गुरुणैवेति ॥ भाष्यकारैरेव कार्त्स्न्येन वेदार्थस्य सम्यगुक्तत्वात्किमर्थं प्रकरणमारभ्यते त्वया, तस्मात्प्रकरणारम्भादुपरतिरेव श्रेयसी, अनुपरमे वा ख्यातिलाभपूजानामन्यतमार्थं ग्रन्थकरणमिति प्रसज्येत, ततश्चाप्रामाण्यशङ्का स्यात्, ख्यात्यादेरप्रामाण्यकारणत्वात् अग्रहणान्यथाग्रहणपूर्वकत्वात् ख्यात्याद्यर्थित्वस्येति तन्निरासायोत्तरश्लोकारम्भ इत्यर्थः । न ख्यातीति । ननु यदि ख्यात्याद्यर्थं ग्रन्थोदीरणं न भवति तर्हि गुरुणैव वेदराद्धान्तस्योपदेशसहस्रिकादिप्रकरणेषु सम्यगुक्तत्वात्प्रकरणोक्तिस्तवाऽनर्थिकेत्यत आह स्वबोधेति ॥ निकषन्ति निष्कर्षन्ति येषु हेम परीक्षितुं ते निकषाश्मानः । इह तु ब्रह्मविद एव निकषाश्मानस्तेषु स्वबोधस्य परिशोधनार्थमेतत्प्रकरण,मनुक्तौ स्वबोधस्य परैः परीक्षितुमशक्यत्वादित्येव वक्तुः प्रयोजनमिदं दर्शितम् । श्रोतॄणां तु 'वक्ष्यते स्फुट'मित्यत्रैव दर्शितम् ॥ ६ ॥

तर्हि कियन्तो ऽर्थाः प्रकरणेन प्रतिपाद्यन्त इत्यत आह अनर्थेति ॥ अनर्थो ऽनर्थहेतुः पुरुषार्थस्तद्धेतुरिति प्रकरणेन चत्वारो ऽर्थाः

---

* अनर्थः=संसारः । अनर्थहेतुः=अज्ञानम् । पुरुषार्थः=मोक्षः । तद्धेतुः=ब्रह्मात्मैक्यज्ञानम् । इति चत्वारि प्रकरणार्थाः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

ऐकात्म्याऽप्रतिपत्तिर्या स्वात्मानुभवसंश्रया ।
साऽविद्या संसृतेर्बीजं तन्नाशो मुक्तिरात्मनः ॥७॥
पुरुषार्थहेतोरविशिष्टत्वात्तदभिव्याहारः—
वेदावसानवाक्योत्थसम्यग्ज्ञानाऽऽशुशुक्षणिः* ।
दन्दहीत्यात्मनो मोहं न कर्माप्रतिकूलतः ॥ ८ ॥

पूर्वोक्तविषयस्यैव प्रतिपादनाय प्रदर्श्यन्ते, तु चोत्तरश्लोकाभ्यां संक्षेपोच्यन्तइत्यर्थः । ऐकात्म्येति ॥ एको ऽद्वितीय आत्मा एकात्मा तस्य भाव ऐकात्म्यं तद्विषया अप्रतिपत्तिरैकात्म्याप्रतिपत्तिरित्यविद्याया विषयो दर्शितः । सांप्रतमाश्रयोपि स एवेत्याह स्वात्मेति ॥ स्वश्चासावात्मा चेति स्वात्मा । स्वशब्देनारोपितात्मभावानहंकारादीन् व्यावर्तयति । स्वात्मा चासावनुभवश्चेति स्वात्मानुभवः, स एवाश्रयो यस्याः सा तथोक्ता । एवं भूता सा ऽविद्या संसारस्य कर्तृत्वादिलक्षणस्य बीजमुपादानमित्यनर्थो ऽनर्थहेतुश्च दर्शितः । इदानीं पुरुषार्थं च दर्शयति तन्नाश इति ॥ आत्मनो मुक्तिर्नाम तस्या अविद्याया निवृत्तिर्नान्या भावरूपा अभावरूपा वा साध्या ऽस्तीत्यर्थः ॥ ७ ॥

प्रतिज्ञातेषु त्रयाणामुक्तत्वाच्चतुर्थस्योपन्यासायोत्तरश्लोक इत्याह पुरुषार्थहेतोरिति ॥ वेदावसानेति ॥ तत्र सम्यग्ग्रहणमुपासनाज्ञाननिवृत्त्यर्थम् । सम्यग्ज्ञानाग्नेरविद्यातत्कार्यादेरशेषतो निवर्तकत्वलक्षणातिशयाभिप्रायेण दन्दहीतीति यङ्लुक्प्रयोगः । आशुशुक्षणिसादृश्यं च समर्थस्यापि दाह्यैकदेशस्य प्रारब्धभोगादेरनिवर्तकत्वाभिप्रायेण । एवं मोक्षलक्षणपुरुषार्थसाधनं ज्ञानमेवेत्युक्तम् । तत्र कर्मणो ज्ञानेन समुच्चितस्यासमुच्चितस्य वा मुक्तिसाधनत्वं वि-

---

* वेदान्तवाक्यजन्यतत्त्वज्ञानाग्निरित्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

प्रतिज्ञातार्थसंशुद्ध्यर्थं पूर्वपक्षोक्तिः। तत्र ज्ञानमभ्युपगम्यैव तावदुपन्यासः—

मुक्तेः क्रियाभिः सिद्धत्वाद्
ज्ञानं तत्र करोति किम्।
कथं चेच्छृणु तत्सर्वं

स्तरेण निराचिकीर्षुः संक्षिप्य तावत्प्रतिजानीते न कर्मेति॥ तत्र हेतुरप्रतिकूलत इति॥ निवर्त्त्येन बन्धेन स्वरूपतो विषयद्वारा वा जडस्याप्रमाणभूतस्य कर्मणो विरोधाभावादित्यर्थः॥ ८॥

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति न्यायाद् ज्ञानमेव मुक्तिसाधनं न कर्मेति प्रतिज्ञातार्थस्य संशुद्ध्यर्थं निर्णयार्थं पूर्वपक्षोक्तिः क्रियतइति उत्तरसंदर्भस्य तात्पर्यमाह प्रतिज्ञातेति॥ तत्र पूर्वपक्षो द्विविधः। के चिद्यथावस्थितात्मविषयं ज्ञानमिच्छन्ति के चिन्नेच्छन्तीति। तत्र ये तावदेवंविधं ज्ञानमभ्युपगम्यापि कर्मैव मोक्षसाधनमिति मन्यन्ते तन्मतप्रदर्शनायाभ्युपेत्यैवमुच्यतइत्यतः प्राक्तनो ग्रन्थ इत्याह तत्र ज्ञानमिति॥ ज्ञानिनो ऽपि यावज्जीवादिश्रुतिचोदितकर्मणामकरणे प्रत्यवायहेतूनामवश्यानुष्ठेयत्वात्तैरेव मोक्षसिद्धेर्विद्यमानमपि ज्ञानमकिंचित्करमित्याह मुक्तेरिति॥ केवलेभ्य एव कर्मभ्यो मोक्षस्य सिद्धत्वाद् ब्रह्मज्ञानमनर्थकं विद्यमानस्याप्यकिंचित्करत्वादिति भाट्टाः प्रतिपेदिरे इत्यर्थः। कर्मणामनित्यफलसाधनानां कथं नित्यमोक्षसाधनत्वमिति शङ्कते कथं चेदिति। स्वरूपावस्थानलक्षणाया मुक्तेरसाध्याया अपि प्रतिबन्धनिरोधात् सिद्धिं संभावयाम इत्याह शृणुवति॥ ९॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

प्रखिद्याथ मनो यथा ॥ ९ ॥

अकुर्वतः क्रियाः काम्या निषिद्धास्त्यजतस्तथा ।
नित्यं नैमित्तिकं कर्म विधिवच्चानुतिष्ठतः ॥ १० ॥

किमतो भवति—

काम्यकर्मफलं तस्मा-
द्देवादीमं न ढौकते ।
निषिद्धस्य निरस्तत्वा-
न्नारकीं नैत्यधोजनिम्* ॥११॥

संसारस्याविद्याहेतुत्वमभ्युपगच्छतापि कर्महेतुत्वस्य "पुण्यः पुण्येन कर्मणा भवति पापः पापेन" "कर्मणा बध्यते जन्तु"रित्यादिश्रुतिस्मृतिभ्यो ऽवश्याश्रयणीयत्वात् काम्यप्रतिषिद्धकरणविहिताकरणलक्षणनिमित्तपरिहारेण नैमित्तिकस्य तस्य स्वरूपावस्थानप्रच्युतिलक्षणस्य परिहारात्स्वरूपावस्थानलक्षणा मुक्तिर्ज्ञानं विनापि सिध्यतीत्याह अकुर्वत इति ॥ मुक्तिर्भवतीति शेषः ॥ १० ॥

अतः काम्यादिवर्जनादिसाधनात्स्वरूपावस्थानलक्षणा मुक्तिः केन द्वारेण भवतीति पृच्छति किमत इति ॥ देवादि, देवत्वादि फलं काम्यकर्मत्यागिनमिमं न ढौकते, न स्पृशति निमित्ताभावान्निषिद्धस्य निरस्तत्वात्, परिहृतत्वान्नारकीं, नरकसंबन्धिनीं जनिं, शरीरग्रहणलक्षणां न प्राप्नोति। उपलक्षणमेतत्तिर्यगादिजन्मप्राप्तेरपि ॥ ११ ॥

भवत्वेवमप्रारब्धफलयोः कर्मणोः परिहारः प्रारब्धयोस्तु कथ-

---

* अधोगतिमिति पुस्तकान्तरे पाठः । व्याख्याधृतस्तूपरितन एव ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

देहारम्भकयोश्च धर्माधर्मयोर्ज्ञानिनां सह कर्मिणः समानौ चोद्यपरिहारौ—

वर्तमानमिदं याभ्यां
शरीरं सुखदुःखदम् ।
आरब्धं पुण्यपापाभ्यां
भोगादेव तयोः क्षयः ॥ १२ ॥

काम्यप्रतिषिद्धकर्मफलत्वात्संसारस्य तन्निरासेनैवाशेषानर्थनिरासस्य सिद्धत्वात् किं नित्यानुष्ठानेनेति चेत्तन्न । तदकरणादप्यनर्थप्रसक्तेः—

नित्यानुष्ठानतश्चैनं प्रत्यवायो न संस्पृशेत् ।
अनादृत्यात्मविज्ञानमतः कर्माणि संश्रयेत् ॥ १३ ॥

मित्यत आह देहारम्भकयोर्वेति ॥ प्रारब्धफलयोस्तु कर्मणोर्भोगादेव क्षय इत्यत्र नावयोर्विवाद इत्युत्तरश्लोकस्य तात्पर्यमुक्तम् ॥ १२ ॥

काम्यप्रतिषिद्धकर्मफलत्वात्संसारस्य तत्परिहारेण परिहारोऽस्तु नित्यनैमित्तिकानुष्ठानं पुनरनुपयुक्तं तयोः सुखदुःखसाधनत्वाभावान्मोक्षस्य कर्मजत्वानङ्गीकाराच्चेत्याक्षिपति काम्यप्रतिषिद्धेति ॥ समाधत्ते तन्न तदकरणादपीति ॥ नित्याकरणस्य संसारानर्थकारणप्रत्यवायहेतुत्वात् प्रत्यवायपरिहारद्वारेण तदनुष्ठानमप्युपयुक्तमित्यर्थः । कथमकरणादभावात्प्रत्यवायस्य भावस्योत्पत्तिरिति च नाशङ्कनीयं, योग्यानुपलब्धेरभावज्ञानहेतुत्ववद् अकरणस्यापि प्रत्यवायहेतुत्वोपपत्तेरिति । तदेतदाह नित्यानुष्ठानत इति ॥ अवान्तरप्रकरणमुपसंहरति अनादृत्येति ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

अभ्युपेत्यैवमुच्यते न तु यथावस्थितात्मवस्तुविषयं ज्ञानमस्ति, तत्प्रतिपादकप्रमाणाभावात्—

यावन्त्यश्चेह विद्यन्ते श्रुतयः स्मृतिभिः सह ।
विदधत्युरुयत्नेन कर्मातो भूरिसाधनम् ॥ १४ ॥

स्यात्प्रमाणासंभवो भवदपराधादिति चेत्तन्न । यतः—

यत्नतो वीक्षमाणो ऽपि
विधिं ज्ञानस्य न क्वचित् ।

अभ्युपगते ऽपि ज्ञाने कर्मैव मोक्षसाधनमित्यर्थः ॥ १३ ॥

अभ्युपगतं चेद् ज्ञानं तत एव मुक्तिः स्वीक्रियतां "तमेव विदित्वातिमृत्युमेती"ति श्रुतेरित्याशङ्क्य द्वितीयं पूर्वपक्षमाह अभ्युपेत्यैवमिति ॥ अभ्युपगम्य ब्रह्मज्ञानं तस्य मुक्तौ वैयर्थ्यमुक्तं न तु तद् ब्रह्मज्ञानमस्ति तत्प्रतिपादकप्रमाणाभावादित्यर्थः । प्रमाणाभावमेव दर्शयति यावन्त्य इति ॥ श्रुतिलक्षणं स्मृतिलक्षणं वा प्रमाणमिह संभावितं, तदुभयं कर्मविधायकमेव न ज्ञानविधायकम् । यदि ज्ञानमपि किंचिद्ब्रह्मवदभिमतमस्ति तदा तद्विधायकमपि वाक्यमुपलभ्येत, न चोपलभ्यते । ततश्च ज्ञानविषयप्रमाणानुपलब्ध्या ज्ञानलक्षणप्रमेयाभावावगम इत्यर्थः । उरुयत्नेन, महता तात्पर्येणेत्यर्थः । भूरिसाधनं, मोक्षं प्रत्यपि पुष्कलकारणमित्यर्थः ॥ १४ ॥

वेदान्तवाक्यशक्तितात्पर्यापरिज्ञानविजृम्भितमिदं प्रमाणाभाववचनमिति शङ्कते स्यात्प्रमाणेति ॥ एतदुत्तरत्वेन श्लोकमवतारयति तन्नेति ॥ यत्नत,स्तात्पर्यतो वीक्षमाणः, पर्यालोचयन्नपि ज्ञानस्य विधिं ज्ञानविषयं विधिं न पश्यामि । 'द्रष्टव्य' इत्यादेः कर्म-

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

श्रुतौ स्मृतौ वा पश्यामि
विश्वासो नान्यतो ऽस्ति नः॥ १५॥

स्यात्प्रवृत्तिरन्तरेणापि विधिं लोकवत्*दिति चेत्तन्न।
यतः—

अन्तरेण विधिं मोक्षा-
याः कुर्यात्सांपरायिकम्।
न तत्स्यादुपकाराय
भस्मनीव हुतं हविः†॥ १६॥

प्रवृत्तिहेतुभूतकर्त्रात्मज्ञानविषयपरत्वात्तस्य मोक्षसाधनज्ञानविषयत्वाभावादिति भावः। श्रुतिस्मृतिनिरपेक्षाणामपि सौगतादीनां मोक्षाय ज्ञाने प्रवृत्तिर्दृश्यत‡इत्यत आह विश्वास इति॥ नः, वेदप्रमाणानुसारिणामस्माकं श्रुतिस्मृतिव्यतिरेकेण न प्रवृत्तिः। इतरप्रवृत्तेर्भ्रान्तिमूलतया प्रामाणिकत्वानङ्गीकारादित्यर्थः॥ १५॥

ननु ज्ञानादज्ञाननिवृत्तिरन्वयव्यतिरेकसिद्धत्वात्किमत्र विधिनेति शङ्कते स्यात्प्रवृत्तिरिति॥ सत्यमज्ञाननिवृत्तिमात्ररूपं चेत्कैवल्यं तदैवं स्यान्न त्वेवम्। अशरीरत्वलक्षणस्य कैवल्यस्य देहपातोत्तरकालीनत्वेनादृष्टफलत्वाद् ज्ञानस्यान्वयव्यतिरेकाभ्यां तत्साधनत्वावगमानुपपत्तेः। जीवन्मुक्तेश्च परिभाषामात्रत्वादिति श्लोकेन परिहरति तन्न यत इति॥ सांपरायिकं, पारलौकिकं कर्म॥ १६॥

---

* विधिं विनापि रागादेव भोजनादाविव ज्ञाने ऽपि प्रवृत्तिः स्यादित्यर्थः॥

† यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः। न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥ इति भगवद्वाक्यात्॥

‡ "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" इत्यार्हतसूत्रमत्रानुसंधेयम्।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अभ्युपगतप्रामाण्यवेदार्थविज्जैमिन्यनुशासनाच्च—

आम्नायस्य क्रियार्थत्वा-
दानर्थक्यमितो ऽन्यथा ।
इति साटोपमाहोच्चै-
र्वेदविज्जैमिनिः स्वयम् ॥ १७॥

मन्त्रवर्णाच्च—

कुर्वन्नेवेह कर्माणि
जिजीविषेच्छतं समाः* ।
इति मन्त्रोपि निःशेषं
कर्मण्यायुरवासृजत्† ॥ १८ ॥

न केवलं युक्तिभिरेव किं त्वाप्तवाक्यादपि वस्तुपरत्वं वेदस्य न सिध्यतीत्याह अभ्युपगतेति ॥ अभ्युपगतं प्रामाण्यं यस्य सो ऽभ्युपगतप्रामाण्यः, स चासौ वेदार्थविच्चेति समासः । तस्य जैमिनेरनुशासनाद्वाक्यादित्यर्थः । आम्नायस्य वेदस्य क्रियार्थत्वात्कार्यपरत्वात् इतो ऽन्यथा क्रियार्थत्वे ऽसति आनर्थक्यम् "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्‡"मिति वदता दर्शितमित्यर्थः§ । साटोपं, ससम्भ्रममाहेति क्रियाविशेषणम् ॥ १७॥

वेदवचनादप्येवमित्याह मन्त्रवर्णाच्चेति ॥ अध्यात्माधिकारे पठितो ऽयं मुमुक्षोरपि निःशेषमायुः, कर्मणि, कर्मानुष्ठाने एवाऽवासृजत्, उत्सृष्टवान् विनियुक्तवान् यावज्जीवं कर्मैव कर्त्तव्यमिति द-

* ईशावास्योपनिषदि ॥
† न ज्ञाने इति शेषः ॥
‡ जैमिनिसूत्र १ अध्याय २ पाद १ सूत्र ॥
§ तथा च ज्ञाने विधेरयुक्तत्वान्नास्ति मोक्षे तदुपयोग इति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

ज्ञानिनश्च वस्तुनि वाक्यप्रामाण्याभ्युपगमाद्वाक्यस्य च क्रियापदप्रधानत्वात्तत्राभिप्रेतज्ञानाभावः—

विरहय्य क्रियां नैव
संहन्यन्ते पदान्यपि ।
न समस्त्यपदं वाक्यं
यत्स्याद् ज्ञानविधायकम् ॥ १९ ॥

ज्ञानाभ्युपगमे ऽपि न दोषो यतः—

र्शितवानित्यर्थः ॥ १८ ॥

एवं तात्पर्याभावाद्वस्तुपरत्वं वेदस्य निराकृत्य सांप्रतं सिद्धार्थावबोधने सामर्थ्याभावादपि पदानां न वस्तुपरतेत्युत्तरश्लोकतात्पर्यमाह ज्ञानिनश्चेति ॥ ज्ञानिनोऽपि वस्तुनि वाक्यं प्रमाणमित्यत्र न विवादः । तच्च वाक्यं सत्येव क्रियापदे निराकाङ्क्षबुद्ध्युत्पादकम् । शुक्लां दण्डेन गामित्येतावन्मात्रप्रयोगे सत्यसति क्रियापदे निराकाङ्क्षबुद्ध्युत्पत्त्यदर्शनात् । अतो वेदस्य क्रियापरत्वात्क्रियायाश्च साध्यैकविषयत्वात् न सिद्धवस्तुपरो वेदभागो ऽस्तीत्यर्थः । किं च पदार्थानां स्वरूपेण प्रमाणान्तरसिद्धत्वात् श्रोतॄणां तावन्मात्रप्रतिपत्तये पदप्रयोगायोगात् संसर्गबोधाय पदानां प्रयोगो ऽभ्युपेयः । स च संसर्गः कारकाणां क्रियां विना न सिध्यतीति क्रियावबोधे सर्वशब्दानां सामर्थ्यं, सा च क्रिया न प्रवर्तकं कार्यं विनेति सर्वपदानां कार्यान्विते शक्तिरित्याह विरहय्येति ॥ ननु पदानां कार्यपरत्वे ऽपि वाक्यात्सिद्धं वस्तु प्रतिपत्स्यामहइत्याशङ्क्य पदानामेव संहत्याऽर्थमभिदधतां वाक्यत्वात्तद्व्यतिरिक्तवाक्यस्याभावान्नैवमित्याह न समस्तीति ॥ १९ ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

कर्मणो ऽङ्गाङ्गिभावेन
स्वप्रधानतया ऽथ वा ।
संबन्धस्येह संसिद्धे-
र्ज्ञाने सत्यप्यदोषतः ॥ २० ॥

यस्माद्व ज्ञानाभ्युपगमाऽनभ्युपगमे ऽपि* न ज्ञानात्†-न्मुक्तिः—

अतः सर्वाश्रमाणां हि
वाङ्मनःकायकर्मभिः ।

एवं केवलेभ्यः कर्मभ्यः कैवल्यं न सिद्धवस्तुविषयं ज्ञानमस्तीत्युक्तम्‡ । इदानीं ज्ञानाभ्युपगमे ऽपि न तावन्मात्रं कैवल्यसाधनं किं तु कर्मसमुच्चितमित्युत्तरश्लोकसंबन्धमाह§ ज्ञानाभ्युपगमे ऽपीति ॥ "यदेव विद्यया करोती"ति वाक्यात् ज्ञानस्य नित्यनैमित्तिकादिकर्माङ्गत्वेन वा, "यज्ञेन विविदिषन्ती"ति वाक्येन तदङ्गत्वेन वा, "विद्यां चाविद्यां च यस्तद्वेदोभयं सह"ति वाक्येन तयोर्ज्ञानकर्मणोः समप्रधानतया वा, परस्परं संबन्धस्य समुच्चयस्येह कैवल्ये फले सिद्धेः सत्यपि ज्ञाने समुच्चितस्य कर्मणः कैवल्यसाधनत्वे कश्चिदपि दोषो नास्तीत्याह कर्मण इति ॥ २० ॥

कर्मनिरपेक्षं ज्ञानं मुक्तिसाधनं न भवतीत्युक्तार्थोपसंहारभू-

---

* ज्ञानाभ्युपगमे ऽपीति पुस्तकान्तरे पाठः ॥

† ज्ञानादेवेत्यर्थः । न केवलं ज्ञानादपि तु ज्ञानसमुच्चितात् कर्मण इति भावः ॥

‡ प्रभाकरैकदेशिमतं पूर्वपक्षत्वेन "मुक्तेः क्रियाभिः सिद्धत्वात्" नै० अ० १ श्लो० ९ इत्यादिभिः "यतस्याद् ज्ञानविधायकम्" अ० १–श्लो० १९ इत्यन्तैरेकादशभिः श्लोकैः ॥

§ समुच्चयवादिभट्टमतानुसारेण ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अनुष्ठितैर्यथाशक्ति
मुक्तिः स्यान्नान्यसाधनात् ॥ २१ ॥
असदर्थप्रलापोयमिति दूषणसंभावनायाह* —
इति हृष्टधियां वाचः
स्वप्रज्ञाधमातचेतसाम् ।
घुष्यन्ते यज्ञशालासु
धूमानद्धधियां किल ॥ २२ ॥

तोत्तरश्लोकगतातःशब्दपरामृष्टं हेतुं दर्शयति यस्मादिति ॥ नान्यसाधनात्, केवलाद् ज्ञानान्न मुक्तिः स्यादित्यर्थः ॥ २१ ॥

प्रदर्शितं पूर्वपक्षमुपहसितुमुत्तरश्लोक इत्याह असदर्थेति ॥ इतीति † ॥ एवंविधाः पूर्वोक्ता वाचो यज्ञशालासु घुष्यन्ते किलेति संबन्धः । वक्तृद्वारा वाक्षां दूषणं संभावयति इति हृष्टधियामिति ॥ वित्तपुत्रकलत्रादिपरित्यागपुरःसरं ज्ञाननिष्ठालक्षणबहुलायासमन्तरेण कर्मभ्य एव स्वर्गापवर्गावस्माकं सुखेनैव सिध्यत इति हृष्टा धीर्येषां तेषाम् । एतावता कथं तद्वचसामप्रामाणिकत्वमित्यत आह स्वप्रज्ञेति ॥ स्वकीया प्रज्ञा युक्त्युपदेशबहिष्कृता संसारस्य कर्मनिमित्तत्वात् तत्परिहारेण परिहारः स्यादिति केवलोक्तिलक्षणतया आध्मात,मुपबृंहितं चेतो येषां ते तथोक्ताः । तत्प्रज्ञाया यथार्थत्वाभावे श्रुतिस्मृतिलिङ्गानि सन्तीति

---

* अयं=पूर्वोक्तो ग्रन्थो, ऽसदर्थप्रलापः=प्रमाणविरुद्धार्थाभिधानादपार्थ इति हेतोस्तत्र दूषणसंभावनाय=दोषोद्घाटनायाहेत्यर्थः ॥

† [इतीति] इदं पुस्तकान्तरे नास्ति ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

दूषणोपक्रमावधिज्ञापनायाह—

अत्राभिदध्महे दोषान्
क्रमशो न्यायबृंहितैः।
वचोभिः पूर्वपक्षोक्ति-
घातिभिर्नातिसंभ्रमात् ॥ २३ ॥

सूचयति धूमान्धेति॥ धूमेनान्धा प्रतिबद्धा सम्यग्ग्रहणे धीर्ये-षां ते धूमान्धधियः। एवं हि श्रौतानि स्मार्तानि च लिङ्गानि दृश्यन्ते। "अग्निमुग्धो हैव धूमतान्तः स्वं लोकं न प्रतिजानाति" "प्लवा ह्येते अदृढा यज्ञरूपाः" "न तं विदाथ य इमा जजान" "अ-विद्यायामन्तरे वर्तमानाः" * "यामिमां पुष्पितां वाच"मित्यादी-नि। तस्मात्तदीयं ज्ञानमयथार्थमेव, अतस्तद्वाचः संभावितदोषा ए-वेति भावः॥ २२॥

संप्रति संभावितदोषान् प्रकटीकर्तुमुत्तरग्रन्थसंदर्भ इति तात्पर्य-माह दूषणेति॥ अवधिः, सीमा। अत्र, केवलकर्मणो मुक्तिसाधनत्व-मित्यस्मिन् पक्ष इत्यर्थः। तत्रापि व्युत्क्रमदोषं परिहरति क्रमश इति॥ स्वपक्षस्थापनोपयोगिन्यायोपपन्नतां दर्शयति न्यायेति॥ न केवलमेतावदेव, परपक्षप्रतिक्षेपसामर्थ्यमप्यस्तीत्याह पूर्वपक्षे-ति॥ छलजातिनिग्रहस्थानादिभिः न परोक्तयो निरस्यन्त इत्याह नातिसंभ्रमादिति॥ तेन तत्त्वनिर्णयावसानानि वादकथारूपाण्य-स्मद्वचांसीति भावः॥ २३॥

नित्यसिद्धात्मस्वरूपावस्थानप्रतिबन्धकसकार्याज्ञाननिवृत्तिव्यति-

---

* अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः। जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः। इति श्रुतिः। मुण्डक० १ ख० २॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

चतुर्विधस्यापि कर्मकार्यस्य मुक्तावसंभवान्मुक्तेर्न कर्मकार्यत्वम्—

अज्ञानहानमात्रत्वा-
न्मुक्तेः कर्म न साधनम् ।
कर्मापमार्ष्टि नाज्ञानं
तमसीवोत्थितं तमः ॥ २४ ॥

कर्मकार्यत्वाभ्युपगमे ऽपि दोष एव—

एकेन वा भवेन्मुक्ति-
र्यदि वा सर्वकर्मभिः ।

रेकेण उत्पत्त्याप्तिविकृतिसंस्कृतिलक्षणस्य कर्मफलस्य कैवल्ये ऽसंभवाद् अज्ञाननिवृत्तेर्ज्ञानमात्रहेतुत्वाद् न कर्मापेक्षेत्युत्तरश्लोकतात्पर्यमाह चतुर्विधस्यापीति ॥ स्वरूपावस्थानस्य नित्यसिद्धतया कर्मसाध्यत्वाभावे ऽपि अज्ञाननिवृत्तेरागन्तुक्याः कर्मसाध्यत्वं किं न स्यादित्यत आह कर्मापमार्ष्टीति ॥ तत्र दृष्टान्तमाह तमसीति ॥ तमसि सत्येवोत्थितं तमश्चोरगभ्रमादि यथा तमो न निवर्तयति तद्धेतुकत्वात्, एवमज्ञानहेतुकं कर्म नाज्ञानं निवर्तयति । तेन स्वभावतो विषयतश्च विरोधाभावादित्यर्थः ॥ २४ ॥

कर्मसाध्यत्वव्यापकभूतोत्पत्त्यादिक्रियाफलाभावान्न कर्मसाध्यत्वमित्युक्तम् । इदानीं मुक्तेः कर्मसाध्यत्वे ऽभ्युपगम्यमाने ऽपि दोषादनिर्मोक्ष इत्याह कर्मकार्यत्वेति ॥ कथं दोषादनिर्मोक्ष इत्याशङ्क्य किमेकैककर्मनिष्पाद्या मुक्तिः किं वा समस्तकर्मनिष्पाद्येति विकल्प्याद्यं निरस्यति 'एकेन वे'त्यादिना पादद्वयेन ॥ सर्वेषां कर्मणां

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

प्रत्येकं चेद्वृथा ऽन्यानि
सर्वेभ्यो ऽप्येककर्मता ॥ २५ ॥

सर्वप्रकारस्यापि कर्मण उत्पत्तित एव विशिष्टसाध्याभिसंबन्धान्न पारिशेष्यसिद्धिः—

दुरितक्षपणार्थत्वा-
न्न नित्यं स्याद्विमुक्तये ।
स्वर्गादिफलसंबन्धा-
त्काम्यं कर्म तथैव न ॥ २६ ॥

निरपेक्षसाधनत्वात् कर्मान्तरवैयर्थ्यप्रसङ्ग इत्यर्थः । द्वितीयं पक्षं दूषयति सर्वेभ्य इति ॥ अग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमादीनां मिलितानां मोक्षसाधनत्वे सत्येकमुमुक्षुनियोगविषयतया एककर्मत्वं प्राप्तं तच्चायुक्तं फलभेदश्रवणात् । सर्वाश्रमकर्मणामेकेनाश्रमिणा ऽनुष्ठातुमशक्यत्वाच्च । प्रत्येकमाश्रमविहितसर्वकर्मभ्यो मोक्ष इति पक्षे ऽपि सामग्रीवैचित्र्यात्फले ऽपि वैचित्र्यं स्यान्न तु तद्युक्तं मुक्तेरेकरूपत्वात् । न चोक्तविकल्पदोषदुष्टत्वादन्तःकरणशुद्धिद्वारेण कर्मणां मोक्षं प्रति साधनभूतज्ञानसाधनत्वमपि न स्यादिति शङ्कनीयम् । चिरचिरतरचिरतमत्वाल्पत्वमहत्त्वादिभिः शुद्धेः कालतः स्वरूपतश्च वैचित्र्याभ्युपगमादिति भावः ॥ २५ ॥

ननु नित्यनैमित्तिकानां कर्मणां फलान्तराश्रवणान्मोक्षस्य च फलत्वेन साधनाकाङ्क्षत्वादन्योन्याकाङ्क्षया संबन्धः पारिशेष्यन्यायेन सिध्यति । एवमन्येषामप्यश्रुतफलानां कर्मणां मोक्षसाधनत्वं सेत्स्यतीत्याशङ्क्याह सर्वप्रकारस्यापीति ॥ विधेरिष्टसाधनरूपत्वात्साध्यस्य चेष्टत्वान्मोक्षस्य चासाध्यत्वा‘दग्निहोत्रं जुहोती’त्याद्यु-

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

प्रमाणाऽसंभवाच्च—

साध्यसाधनभावोयं
वचनात्पारलौकिकः ।
नाश्रौषं मोक्षदं कर्म
श्रुतेर्वक्रात्क्वयं चन ॥ २७ ॥

त्पत्तिविधिवाक्यादेव विशिष्टसाधनत्वप्रतीतेरश्रूयमाणफलकेषु विश्वजिदादिषु "स स्वर्गः सर्वान्प्रत्यविशिष्टत्वा"*दिति विश्वजिदधिकरणन्यायेन स्वर्गस्यैव फलत्वेन श्रवणान्न पारिशेष्यन्याय†सिद्धिरित्यर्थः । एतदेव श्लोकेन स्पष्टयति दुरितेति । यद्यपि स्वसिद्धान्ते नित्यानां कर्मणां पितृलोकप्राप्तिफलत्वं "कर्मणा पितृलोक" इति श्रुतेः, तथापि मीमांसकदृष्ट्यपेक्षया "येन केन चन यजेतापि वा दर्विहोमेनानुपहतमना एव भवती"तिवाक्यात्तेषां दुरितक्षयार्थत्वाभ्युपगमान्न मोक्षफलत्वं, तथा काम्यमपि न मोक्षफलं स्वर्गादिफलसंबन्धादेवेत्यर्थः ॥ २६ ॥

मोक्षोद्देशेन कर्मणां विधानाभावादपि न तत्साधनत्वमित्याह प्रमाणेति॥ पारलौकिकः साध्यसाधनभावो वचनाद्भवति वचनं च मोक्षहेतुत्वेन कर्माभिधायकं श्रौतं वा स्मार्तं वा नोपलभ्यते इत्यर्थः ॥२७॥

यदुक्त"मकुर्वतः क्रियाः काम्या" इत्यादि, तदस्माभिरभ्युपगतमेव

---

* जैमिनिसूत्रे ४ अ. ३ पा. १५ सू. शाबरभाष्ये । विश्वजिता यजेतेत्यादौ फलाकाङ्क्षायां किं यत्किंचित् फलं कल्पनीयमाहोस्वित् स्वर्ग इति संशये फलविशेषाश्रवणात् यत्किंचित् कल्प्यमिति प्राप्ते, प्रीतेः स्वर्गपदार्थत्वात्तस्याश्चापामरं प्रार्थ्यमानत्वात् सर्वान् प्रत्येकरूपतया स्वर्ग एव फलं कल्प्यतइत्यधिकरणतात्पर्यम् । "स स्वर्गः स्यात्, सर्वान् प्रत्यविशिष्टत्वा"दिति सूत्राक्षराणि ॥

† "प्रसक्तस्य प्रतिषेधे ऽन्यत्राप्रसङ्गाच्छिष्यमाणे संप्रत्यय" इति न्यायाकारः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अभ्युपगताऽभ्युपगमाच्च श्वश्रूनिर्गच्छोक्तिवद्भवतो निष्प्रयोजनः प्रलापः—

निषिद्धकाम्ययोस्त्याग-
स्त्वया ऽभीष्टो यथा मया ।
नित्यस्याफलवत्त्वाच्च
न मोक्षः कर्मसाधनः ॥ २८ ॥

एवं ताव"न्मुक्तिः क्रियाभिः सिद्धवा"दिति निरस्तो ऽयं पक्षो ऽथाधुना सर्वकर्मप्रवृत्तिहेतुनिरूपणेन यथावस्थितात्मवस्तुविषयकेवलज्ञानमात्रादेव सकलसंसारानर्थनिवृत्तिरितीमं पक्षं दर्शयितुकाम आह—

त्वयाप्युक्तं नाधिकमित्याह अभ्युपगतेति ॥ श्वश्रूनिर्गच्छोक्तिवदिति ॥ भिक्षामटते माणवकाय भिक्षां प्रत्याचक्षाणामात्मनः स्नुषां भर्त्सयित्वा श्वश्रूः पुनस्तमाहूय समागते तस्मिन् नास्ति भिक्षा निर्गच्छेति तथैव प्रत्याचष्टे तद्वदित्यर्थः । ननु कर्मणां मोक्षसाधनत्वं त्वया ऽनभ्युपगतमपि मयोक्तमित्यत आह नित्यस्येति ॥ काम्यप्रतिषिद्धयोरभ्युदयप्रत्यवायफलयोस्त्यागान्नैमित्तिकस्य च पापक्षयफलार्थत्वात् नित्यानां च फलरहितत्वान्न मोक्षः कर्मसाधन इति श्लोकार्थः ॥२८॥

वृत्तानुद्रवणपूर्वकं * वर्तिष्यमाणग्रन्थसंदर्भस्य तात्पर्यमाह एवं तावदिति ॥ इदानीं सर्वकर्मसु प्रवृत्तौ यो हेतुर्मिथ्याज्ञानादिलक्ष-

---

* वृत्तस्य=उक्तस्य कर्मणो मोक्षसाधनत्वपक्षस्य, अनुद्रवणं=निरासः, तत्पूर्वकमित्यर्थः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

इह चेदं परीक्ष्यते, 'किं यथा प्रतिषिद्धेषु यादृच्छिकेषु च कर्मसु स्वाभाविकस्वाशयोत्थनिमित्तवशादेवेदं हितमिदमहितमिति परिकल्प्य मृगतृष्णिकोदकपिपासुरिव लौकिकप्रमाणसिद्धान्येव च साधनान्युपादायेष्टप्राप्तये ऽहितनिवृत्तये च स्वयमेव प्रवर्तते निवर्तते च, तथैवाऽदृष्टार्थेषु काम्येषु नित्येषु च कर्मसु, किं वा ऽन्यदेव तत्र प्रवृत्तिनिवृत्तिनिमित्त'मिति ।

यस्तस्य प्रवर्तकस्य निरूपणेन कर्मणामविद्याकार्यत्वेन विद्यासाध्याऽविद्यानिवृत्तिलक्षणे मोक्षे ऽनुपयोगात्कर्मसमुच्चिताभ्यासादिनिरपेक्षादात्मज्ञानादेव कैवल्यमिति प्रदर्श्यते इत्यर्थः ॥

ननु कथं कर्मसु प्रवृत्तिहेतुर्मिथ्याज्ञानं तेषां यथायोग्यं लौकिकवैदिकप्रमाणमूलत्वादित्याशङ्क्य कर्मप्रवृत्तिनिमित्तहेतुनिरूपणार्थं विमृशति इह चेदमिति ॥ प्रतिषिद्धेषु कलञ्जभक्षणादिषु यादृच्छिकेषु च शयनासनेष्टविहारादिषु स्वाभाविकः शास्त्रज्ञानाऽनाधेयो यः स्वाभिप्रायो ऽहमप्राप्तसुखो ऽपरिहृतदुःखश्च तेन मम प्राप्यं परिहरणीयं चास्तीति मिथ्याज्ञानं तदुत्थनिमित्तं रागादि तद्वशात्प्रवृत्तेर्विषयविशेषालम्बनत्वादिदं पुरोवर्ति वस्तु हितमनुकूलमहितं प्रतिकूलमिति च कल्पनामात्रेण निश्चित्य स्वयमेव शास्त्रनिरपेक्षं लौकिकप्रमाणसिद्धान्येव च साधनानि साधनत्वेनोपादाय हितप्राप्त्यर्थमहितनिवृत्त्यर्थं च यथा तेषु कर्मसु प्रवर्तते निवर्तते च तथैवादृष्टार्थेषु कर्मसु काम्येषु नित्येषु च किं प्रवर्तते इत्यर्थः । एवं सिद्धान्तहृदयमभिधाय पूर्वपक्षहृदयमाह किं वान्यदिति ॥ शास्त्रादिजनितं सम्यग्ज्ञानं वा तत्र प्रवृत्तिनिमित्तमित्यर्थः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

किं चातो यद्येवं शृणु। यदि तावद्यथावस्थितवस्तु* सम्यग्ज्ञानं प्रमाणभूतमागमिकं लौकिकं वा† प्रवृत्तिनिमित्तमिति निश्चयो, निवृत्तिशास्त्रं च नाभ्युपगम्यते तदा हताः कर्मत्यागिनो, भ्रान्तिविज्ञानमात्रावष्टम्भादलौकिकप्रमाणोपात्तकर्मानुष्ठानत्यागित्वाच्च। अथ मृगतृष्णिकोदकपिपासुप्रवृत्तिनिमित्तवद्यथा-

---

‘संदिग्धं सप्रयोजनं च विचारमर्हती’ति न्यायात् संदेहप्रदर्शनानन्तरं प्रश्नपूर्वकं प्रयोजनं दर्शयति किं चात इत्यादिना ॥ यदि प्रमाणभूतं सम्यग्ज्ञानमेव प्रवृत्तिनिमित्तं निश्चीयते तदा कर्मत्यागिनो वयं हता इत्यर्थः। प्रमाणभूतत्वे हेतुः सम्यग्ज्ञानमिति ॥ सम्यग्ज्ञानत्वे हेतुर्यथावस्थितवस्त्विति ॥ ननु कर्मसु सम्यग्ज्ञानात्प्रवृत्तौ किमिति कर्मत्यागिनां हतिः। सर्वसंन्यासेऽपि सम्यग्ज्ञानेनैव प्रवृत्तिसंभवात्तस्यापि निवृत्तिशास्त्रमूलत्वादित्याशङ्क्याह निवृत्तिशास्त्रं चेति ॥ यावज्जीवादिवचनविरोधादनधिकृतान्धपङ्ग्वादिविषयत्वोपपत्तेर्निवृत्तिशास्त्रं नाभ्युपगम्यत इत्यर्थः। कुतस्तेषां हतत्वमित्यत आह भ्रान्तिविज्ञानेति ॥ आत्मनोऽशनायाद्यतीतत्वे कर्तृत्वाद्यभावे कर्मत्यागे च मूलप्रमाणाभावाभिप्रायेण भ्रान्तिविज्ञानमात्रावष्टम्भादित्युक्तमलौकिकं प्रमाणं “यावज्जीवमग्निहोत्रं जुहुया”दिति वैदिकवचनं, तेन विहितकर्मानुष्ठानपरित्यागित्वात्तेषां हतिरित्यर्थः। अथेति ॥ यथा मृगतृष्णिकोदकपिपासुप्रवृत्तिनिमित्तं मिथ्याज्ञानं तथा सर्वकर्मसु

---

* अविपर्यस्तमित्यर्थः ॥

† लौकिकमागमिकं वेति काशीसंस्कृतपुस्तकालयपुस्तके, ४ पु० च ॥

www.astrology-tantra.com
DR.RUPNATHJI(DR.RUPAK NATH)

वस्तु* भ्रान्तिविज्ञानमेव सर्वप्रवृत्तिनिमित्तं, तदा वर्द्धामहे वयं, हताः स्थ यूयमिति--

हितं संप्रेप्सतां मोहा-
दहितं च जिहासताम् ।
उपायानप्राप्तिहानार्थान्†
शास्त्रं भासयते‡ ऽर्कवत् ॥ २९ ॥

प्रवृत्तिनिमित्तं मिथ्याज्ञानमेवेति यदि निश्चीयते तदा कर्मत्यागिनो वयं वर्धामहे, कर्मणि तु प्रवृत्ता यूयं हताः, भ्रान्तिज्ञानप्रापितप्रवृत्तिमत्त्वादित्यर्थः ॥

एवं संदेहं सप्रयोजनं प्रदर्श्याधुना निर्णयमाह हितं संप्रेप्सतामिति ॥ वैषयिकसुखाभावे ऽपि सुषुप्तौ सुखमहमस्वाप्समित्यात्मनः सुखरूपतायाः स्वानुभवसिद्धत्वात्, परमप्रेमास्पदत्वेन सुखरूपतानुमानात्, 'एषो ऽस्य परम आनन्द' 'आत्मैवानन्द' इत्याद्यागमतश्च तस्य नित्यनिरतिशयानन्दस्वभावतासिद्धेर्'जरममरमभयमशोक'मित्यादिश्रुतिभ्यः कूटस्थत्वासङ्गत्वसाक्षित्वादिभ्यश्च स्वभावतः परिहृताशेषाऽनर्थत्वसिद्धेश्चैवंभूतात्मयाथात्म्यानवबोधादेव हितप्रेप्सा दुःखजिहासा च भवति न पुनः शास्त्रमेव यूयं कर्तारो भोक्तारश्च, युष्माकं प्राप्यं परिहार्यं चास्ति, तस्माद्युष्माभिर्हितं प्रेप्सितव्यमहितं च जिहासितव्यं, यूयं वर्णाश्रमवयोवस्थाविशेषवन्त, इति कर्तृ-

---

* निरस्तमित्यर्थः ॥

† मिथ्याज्ञानकल्पितेष्टानिष्टप्राप्तिपरिहारार्थानित्यर्थः ॥

‡ भासयते=प्रकाशयति, अनुवदतीति यावत् । तथा च तद्विषये शास्त्रस्याज्ञातज्ञापकत्वलक्षणं न विधायकत्वमित्यर्थः । एतच्चोत्तरश्लोकेन स्पष्टं प्रदर्शयिष्यते ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

एवं तावत्प्रत्यक्षानुमानागमप्रमाणावष्टम्भादेवात्मनो निरतिशयसुखहिताव्यतिरेकसिद्धेः, रहितस्य च षष्ठगोचरवत्स्वत एवानभिसंबन्धाद्, एवंस्वाभाव्यात्मानवबोधमात्रादेव हितं मे स्यादहितं मे मा भूदिति मिथ्याज्ञानं तूपरशुक्तिकानवबोधोत्थमिथ्याज्ञान-

---

त्वादिकमुत्पादयति बोधयति वा, किं तु स्वयमेवाध्यारोपितकर्तृत्वभोक्तृत्ववर्णाश्रमवयोवस्थाविशेषाणां पुंसां स्वत एव प्रेप्सितस्य हितस्य जिहासितस्य चाहितस्य प्राप्तये परिहाराय च साधनं जिज्ञासमानानामिदं साध्यमिदं च साधनमिति साध्यसाधनसंबन्धमात्रं यथावस्थितकर्मवत्प्रकाशयति शास्त्रं, न पुनः प्रवृत्तिनिवृत्तिजनने ऽपि शास्त्रस्य व्यापारस्तेन तूदासीनमित्यर्थः ॥ २८ ॥

एवं संक्षेपत इष्टानिष्टसाधनज्ञानाद्रागद्वेषौ भवत,स्ततश्च पुरुषस्य प्रवृत्तिनिवृत्ती भवत इति पूर्वश्लोकोक्तमर्थं सोपस्करमनूद्य वर्तिष्यमाणग्रन्थस्य तात्पर्यमाह एवं तावदित्यादिना ॥ यद्यपि न पूर्वश्लोके प्रत्यक्षानुमानागमाः कण्ठोक्तास्तथापि प्रेप्साजिहासयोर्मोहहेतुत्वमुपदर्शयता आत्मनः सुखस्वभावत्वस्योपदर्शितत्वात्तत्र च प्रमाणान्वेषणे च सौषुप्तिकानुभवलक्षणं प्रत्यक्षं परप्रेमास्पदत्वानुमान"मेषो ऽस्य परमानन्द" इत्यादिश्रुतिश्च परिगृह्यते, तस्मान्नानुक्तानुवाद इति द्रष्टव्यम् । षष्ठगोचरवदिति ॥ अभावप्रमाणगोचरवदित्यर्थः* । कुतस्तर्हि प्रवृत्तिरित्यत आह एवंस्वाभाव्येति ॥ यथाभूतात्मस्वरूपानवबोधाद्धितं मे स्यादहितं मा भूदिति मिथ्याज्ञानं भव-

---

* अनुपलब्धिप्रमाणगोचरवदित्यर्थ इत्यर्थः । एवं चाहितत्वेनाभिमतस्याभावरूपत्वेनासद्रूपत्वात्सद्रूपेणात्मना संबन्धो नोचित इति भावः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

वत्प्रवृत्तिनिमित्तमित्यवधारितम् । शास्त्रं च न पदा-र्थशक्त्याऽऽधानकृदित्येतस्यैवोत्तरत्र प्रपञ्च आरभ्यते—

न परीक्षां जिज्ञासां वा
पुंसः शास्त्रं करोति हि ।
निजे एव तु ते यस्मात्
पश्वादावपि दर्शनात् ॥ ३० ॥

उक्तं तावदनवबुद्धवस्तुयाथात्म्य एव विधिप्रतिषेधशास्त्रेष्वधिक्रियतइति । अथाधुना विषयस्वभावानुरोधेन प्रवृत्त्यसंभवं वक्तुकाम आह—

लिप्सते ऽज्ञानतो लब्धं
कण्ठे चामीकरं यथा ।

ति तत्प्रवृत्तिनिमित्तमित्यर्थः । उत्तरार्द्धार्थमनुवदति शास्त्रं चेति ॥ पदार्थानां शक्तिं,मात्मनः कर्तृत्वभोक्तृत्वादिशक्तिं, स्वर्गादेः साध्यत्वशक्तिं, यागादेः साधनत्वशक्तिं नाधत्ते किं तु प्रकाशयत्येवेत्युक्तमित्यर्थः । निजे एव त्विति ॥ शास्त्राधेयविज्ञानं विनैव पश्वादीनामिव तयोः परीक्षाजिज्ञासयोः संभवादित्यर्थः ॥ ३० ॥

पूर्वं कर्मप्रवृत्तिहेतुनिरूपणेन कैवल्यस्य कर्मसाध्यत्वं निराकृतम् । अधुना विद्याविषयात्मस्वरूपपर्यालोचनया ऽपि कर्मसु प्रवृत्त्यसंभवं दर्शयितुमाह उक्तमित्यादिना ॥ तदर्थं प्राप्यस्य परिहार्यस्य च प्रत्येकं द्वैविध्यं दर्शयति लिप्सतइति ॥ स्वतःप्राप्तमेव कण्ठगतं सुवर्णभूषणमज्ञानतो ऽप्राप्तं प्राप्तुमिच्छति, यथा अविद्यमानत्वादेव स्वत एव वर्जितं स्वकीयच्छायायां भ्रान्त्यारोपितं राक्षसं मो-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

वर्जितं च स्वतो भ्रान्त्या
च्छायायामात्मनो यथा ॥ ३१ ॥
भयान्मोहावनद्धात्मा
रज्जुः परिजिहीर्षति ।
यद्वाऽपरिहृतं वस्तु
तथाऽलब्धं च लिप्सते ॥ ३२ ॥

तत्रैतेषु चतुर्षु* विषयेषु प्राप्तये परिहाराय च विभज्य न्यायः प्रदर्श्यते—

प्राप्तव्यपरिहार्येषु
ज्ञात्वोपायान् श्रुतेः पृथक् ।
कृत्वाऽथ प्राप्नुयात्प्राप्यं
तथाऽनिष्टं जहात्यपि ॥ ३३ ॥

ह्यावृतान्तःकरणो भयात्परिहर्तुमिच्छति, यद्वान्यद्वस्तुतोऽपरिहृतं चौरव्याघ्रादि, अलब्धं वित्तादि तत्परिहर्तुं प्राप्तुं चेच्छतीति द्वयमपि द्विविधं दृश्यते इत्यर्थः ॥ ३१ ॥ ३२ ॥

भवत्वेवं तथापि कस्य कथं प्राप्तिः परिहारो वेत्याकाङ्क्षायामुत्तरश्लोकाभ्यां तत्रोपायः प्रदर्श्यतइत्याह तत्रैतेष्विति ॥ तत्र वस्तुतोऽप्राप्ते स्वर्गादावपरिहृते च नरकादावागमतस्तदुपायान् विभागेन परिज्ञाय तदनन्तरमनुष्ठायानुष्ठानजनिताऽदृष्टवशात्कालान्तरे तत्फलं लभते ॥ ३३ ॥

---

* प्राप्तस्य प्राप्तिः, अप्राप्तस्य प्राप्तिः, परिहृतस्य परिहारः, अपरिहृतस्य परिहारश्चेत्येवंरूपेष्वित्यर्थः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अथावशिष्टयोः* स्वभावतः—

वर्जिता ऽवाप्तयोर्बोधा†-
द्धानप्राप्ती न कर्मणा ।
मोहमात्रान्तरायत्वात्
क्रियया ते‡ न सिध्यतः ॥ ३४ ॥

कस्मात्पुनरात्मवस्तुयाथात्म्यावबोधमात्रादेवाभिलषितनिरतिशयसुखप्राप्तिनिःशेषदुःखनिवृत्ती भवतो न तु कर्मणेत्युच्यते—

स्वतस्तु परिहृतावाप्तयोरज्ञानत एव तथारूपेणाभिमतयोर्बोधादज्ञाननिवृत्त्या प्राप्तिपरिहारौ न तु कर्मणा, मोहमात्रस्यैव तत्र प्रतिबन्धकत्वान्न कर्मानुष्ठानसाध्यत्वमित्यर्थः ॥ ३४ ॥

स्यातां नाम स्वतःप्राप्तस्यात्मनः स्वत एव परिहृतस्यानात्मनश्च ज्ञानमात्रादेव प्राप्तिपरिहारौ, निरतिशयानन्दलक्षणस्य निरस्ताशेषार्थलक्षणस्य च मोक्षस्य कथं ज्ञानादेव सिद्धि,स्तथाभूतस्य मोक्षस्य संसारदशायामनुपलम्भात्साध्यत्वप्रतीतेरिति शङ्कायामुत्तरश्लोकेनोत्तरमुच्यतइत्याह कस्मादिति ॥ यद्वा शुक्तिकादिनिकटोपसर्पणादिक्रियया रजतादिविभ्रमाणां तत्कारणाज्ञाननिवृत्त्या निवृत्तिदर्शनादात्माज्ञाननिवृत्तिरपि कर्मणा किं न स्यादित्याशङ्क्य परिहरति कस्मादित्यादिना ॥ उक्तलक्षणस्य मोक्ष-

---

* अवशिष्टयोः=परिहार्यत्वेष्यमाणत्वयोः ॥

† परिहृतावाप्तयोर्बोधादिति का० सं० पा० पुस्तके ४ पु० च । १—२ पुस्तकयोश्चोपरिधृत एव पाठः । पूर्वपाठे चाक्षराधिक्यादयमेव पाठोत्र स्थापितः । अर्थे न भेदः ॥

‡ ते=हानप्राप्ती ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

कर्माऽज्ञानसमुत्पत्वा-
न्नालं मोहाऽपनुत्तये* ।
सम्यग्ज्ञानं विरोध्यस्य
तामिस्रस्यांशुमानिव ॥ ३५ ॥

नन्वात्मज्ञानमप्यविद्योपादानम्, न हि शास्त्रशिष्याचार्याद्यनुपादायाऽऽत्मज्ञानमात्मानं लभतइति । नैष दोषो, यतः आत्मज्ञानं हि स्वतःसिद्धपरमार्थात्म-

---

स्वात्मस्वभावत्वे ऽप्यज्ञानपिहितत्वात्संसारदशायामप्रतिभासः, न तु तस्य तदानीमभावात् । पूर्वोक्तफलव्याप्यादिना प्रमाणेन तत्स्वभावनिर्धारणात् । तस्य चाऽज्ञानस्य ज्ञानादेव निवृत्ति,स्तथा लोके दृष्टत्वात् । निकटोपसर्पणादिषु न साक्षादज्ञाननिवर्तकत्वम् । सम्यग्ज्ञानोत्पत्तिमात्रकारणत्वेनान्यथासिद्धत्वात् । तत्रस्थस्यैवाऽधिष्ठानाऽवलोकने च क्वचिद् भ्रमनिवृत्तेर्निकटोपसृप्तस्याधिष्ठानाऽनवलोकने भ्रमाऽनिवृत्तेश्चेति भावः ॥ ३५ ॥

अज्ञानोत्थत्वाविशेषात्कर्मणामविद्यानिवृत्तावहेतुत्वं तर्हि विद्याया अपि तदुत्थत्वाविशेषात्तन्निवर्तकत्वं न स्यादिति शङ्कते नन्विति ॥ कुतस्तस्य अविद्योपादानत्वमित्यत आह न हीति ॥ अविद्याकार्यत्वाविशेषेऽपि परमार्थवस्त्वालम्बनत्वेन विषयतो विरोधादविद्यानिवर्तकत्वं न विरुध्यतइति परिहरति नैष दोष इति॥ तत्राजडसत्यात्मविषयतया जडानृतानात्मविषयाविद्याविरोधितामाह स्वतःसिद्धपरमार्थात्मेति॥ आत्मनां परस्परभेदेन ब्रह्मणो भेदेन च विद्यावि-

---

* अविद्यामुपजीव्य प्रवृत्तानां कर्मणां तद्विरोधित्व'मुपजीव्यविरोधो न न्याय्य' इति न्यायेन नोचितमिति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

वस्तुस्वरूपमात्राश्रयाद्वैवाऽविद्यातदुत्पन्नकारकग्रामप्रध्वंसि स्वात्मोत्पत्तावेव शास्त्राद्यपेक्षते नोत्पन्नसविद्यानिवृत्तौ। कर्म पुनः स्वात्मोत्पत्तावुत्पन्नं च। न हि क्रिया कारकनिस्पृहा कल्पकोटिव्यवहितफलदानाय स्वात्मानं बिभर्ति। साध्यमानमात्ररूपत्वात्तस्याः। न च क्रिया ऽऽत्मज्ञानवत्स्वात्मप्रतिलम्भकालएव स्वर्गादिफलेन कर्तारं संबध्नाति*। आत्मज्ञानं पुनः पु-

---

षयत्वाद् द्वैतविरोधाभावमाशङ्क्याह वस्तुस्वरूपेति॥ द्वैतविषयत्वेनाद्वैतविषयत्वेन चाविद्याविद्ययोर्विरोधो ऽस्तीत्यर्थः। ननु विभ्रमेऽप्यधिष्ठानस्य सामान्येन स्फुरणात्तदालम्बनत्वमविद्यायां विद्यते, तस्मादेकविषयत्वान्न विषयतो विरोध इत्याशङ्क्याह मात्रेति॥ आश्रया,दालम्बनत्वा,द्विषयीकरणादिति यावत्॥ पूर्वं विषयतो वैलक्षण्यमुक्तमिदानीं विद्या स्वजन्मन्येवाविद्याद्यपेक्षते न तु फले, कर्म पुनः स्वजन्मनि फले चाविद्यामपेक्षत इति वैलक्षण्यान्तरमाह स्वात्मोत्पत्ताविति॥ किमिति फले कर्माविद्यामपेक्षत इत्यत आह न हि क्रियेति॥ कालान्तरभाविफलदानाय तिष्ठन्ती क्रिया कारकाद्यपेक्षयैव तिष्ठतीत्यर्थः†। ननु किमिति कारकमाश्रित्यैव तिष्ठति न स्वातन्त्र्येणैव तिष्ठत्यत आह साध्यमानेति॥ परतन्त्रस्वरूपत्वात्क्रियाया इत्यर्थः। ननु तर्हि स्वोत्पत्तिकालएव कर्मा-

---

* क्रियाया आशुविनाशित्वात् स्वस्वरूपलाभसमकालं चिराच्चिरतरकालान्तरभाविस्वर्गादिफलं प्रति द्वारभूतादृष्टाद्यपेक्षामन्तरा हेतुत्वं नोपपद्यते इति भावः॥

† क्रियायाः कारकाद्यपेक्षाभावे तस्याः स्वरूपमेव न संभवतीति भावः॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

स्वपक्षार्थसिद्धौ नोत्पद्यमानस्वरूपव्यतिरेकेणाऽन्यद्रूपान्तरं साधनान्तरं वाऽपेक्षते । कुत एतद्यतः—

बलवद्धि प्रमाणोत्थं
सम्यग्ज्ञानं न बाध्यते ।
आकाङ्क्षते न चाप्यन्य-
द्बाधनं प्रति साधनम् ॥ ३६ ॥

स्वपक्षस्य हेत्ववष्टम्भेन समर्थितत्वान्निराशङ्कमुपसंह्रियते—

तस्माद्दुःखोदधेर्हेतो-
रज्ञानस्यापनुत्तये ।

पि फलजनकमस्त्वित्याशङ्क्यानुभवविरोधान्नैवमित्याह न च क्रियेति ॥ ननु तर्ह्यात्मज्ञानमपि कर्मापेक्षया ऽभ्यासद्वारेण वा कैवल्यं चिरेण साधयेदित्यत आह आत्मज्ञानमिति ॥ रूपान्तरशब्देनाभ्यास उच्यते साधनान्तरशब्देन च कर्म । नन्वात्मज्ञानस्याप्यनपेक्षत्वमयुक्तम् । अनादिकालप्रवृत्तद्वैतदर्शनतत्संस्काराभ्यां बाधपरिहारायाभ्यासादिसापेक्षत्वादित्याक्षिप्योत्तरश्लोकेन समाधत्ते कुत एतदित्यादिना ॥ प्रमाणोत्थत्वाद्बलवत्सम्यग्ज्ञानमप्रमाणोत्थद्वैतदर्शनतत्संस्काराभ्यां न बाध्यत इत्यर्थः । तर्हि द्वैतदर्शनतत्संस्कारयोर्बाधनार्थं सम्यग्ज्ञानमभ्यासादिकमपेक्षतामित्यत आह आकाङ्क्षत इति ॥ ३६ ॥

एवं ज्ञानमेव कैवल्ये साधनं न कर्मेत्युपपादितमर्थमुपसंहरति स्वपक्षस्येति ॥ दुःखहेतुभूताज्ञानापनुत्तये सम्यग्ज्ञानमेव पुष्कलका-

DR.RUPAK NATH (DR.RUPAK NATHJI)
www.astrology-tantra.com

सम्यग्ज्ञानं सुपर्याप्तं
क्रिया चेन्नोक्तहेतुतः ॥ ३७ ॥

ननु बलवदपि सम्यग्ज्ञानं सदप्रमाणोत्थेनासम्यग्ज्ञानेन बाध्यमानमुपलभामहे । यत उत्पन्नपरमार्थबोधस्यापि कर्तृत्वभोक्तृत्वरागद्वेषाद्यनवबोधोत्थप्रत्यया* आविर्भवन्ति । न ह्यबाधिते सम्यग्ज्ञाने तद्विरुद्धानां प्रत्ययानां संभवो ऽस्ति, नैतदेवं, कुतः—

रणमित्यर्थः । उक्तहेतुत इति ॥ अज्ञानसमुत्थत्वोत्पाद्यफलत्वादिहेतुभ्य इत्यर्थः ॥ ३७ ॥

ननु "बलवद्धि प्रमाणोत्थ"मित्यनेन श्लोकेनानन्यापेक्षचैतन्यप्रकाशात्मस्वरूपावगाहित्वेन वस्तुबलप्रवृत्तत्वादपौरुषेयवेदान्तवाक्यजन्यज्ञानस्य सकलसंसारकारणभूताज्ञाननिवर्तकत्वमुपपद्यते, तत एवानादिकालप्रवृत्तदृढतरकर्तृत्वादिमिथ्यावभासनिवर्तकत्वमुपपद्यते । न च तन्निवृत्तौ स्वव्यतिरिक्तमभ्यासादिसाधनान्तरमपेक्षते इत्युक्तं, तत्र बलवत्त्वात्सम्यग्ज्ञानस्याबाध्यत्वमित्यत्रानुभवविरोधं शङ्कते ननु बलवदपीति ॥ ननु कर्तृत्वादिप्रत्ययानुवृत्तिमात्रेण कथं बाधो ऽवगम्यते इत्यत आह न हीति ॥ बाधितस्य बाधकत्वानुपपत्तेर्नैवमिति परिहरति नैतदेवमिति ॥ प्रमाणज्ञानस्य स्वसामग्रीत एवोत्पन्नत्वात्तस्य चाज्ञानबाधकत्वादज्ञानबाधयैव विपर्ययज्ञानस्यापि तदात्मकत्वेन बाधितत्वान्न विपर्ययज्ञानेन सम्यग्ज्ञानबाधः संभवतीत्यर्थः । अस्तु तर्हि बाधकालादुत्तरकालमुत्पन्नैर्द्वैतप्रत्ययैर्विद्या-

---

* कर्तृत्वरागद्वेषादयो ये ऽनवबोधोत्थप्रत्यया इत्यर्थः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

बाधितत्वादविद्याया
विद्यां सा नैव* बाधते ।
तद्वासना निमित्तत्वं
यान्ति विद्यास्मृतेर्ध्रुवम् ॥ ३८ ॥

"कर्माज्ञानसमुत्थत्वा"दित्युक्तो हेतुस्तस्य च समर्थनं पूर्वमेवाभिहितं "हितं संप्रेप्सता"मित्यादिना, तद्व्युत्पत्त्यर्थमविद्यान्वयेन च संसारान्वयित्वं† प्रदर्शयिष्यामीत्यत आह—

आब्रह्मस्थावरात्मके देहे
लात्वा ना ऽऽत्मेति भावनाम् ।

या बाध इत्याशङ्क्य तस्मिन्नपि काले बाधकविद्यासंस्कारजनितप्रत्ययानां बलवत्त्वात्तेषामेव द्वैतप्रत्ययबाधकत्वोपपत्तेर्नैवमित्याह तद्वासना निमित्तत्वमिति ॥ यद्वा तद्वासनेत्यविद्यावासनाः कथ्यन्ते, ता अपि स्मृतिं विदुषो जनयन्ति, ततश्च न द्वैतस्मृतिभिरपि विद्याया बाध इत्यर्थः ॥ ३८ ॥

वृत्तकीर्तनपूर्वकं वर्तिष्यमाणविद्यान्वयग्रन्थस्य तात्पर्यमाह कर्माज्ञानेति ॥ अज्ञानसमुत्थत्वात्कर्म अज्ञाननिवर्तकं न भवतीत्युक्तं,मिदानीमध्यासपूर्वककर्माधिकारहेतुत्वादपि कर्मणामज्ञाननिवर्तकत्वं नास्तीति युक्त्यन्तरप्रदर्शनाय श्लोकारम्भ इत्यर्थः । प्र-

---

* विद्यांशान्नैव बाधते, इति का० सं० पा० पुस्तके पाठः । अन्यत्र पुस्तकद्वये पूर्वतन एव, युज्यते च स एव ॥

† संसारान्वयं चेति २ पु० पाठः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

श्रुतेः किंकरतामेति
वाङ्मनःकायकर्मभिः ॥ ३९ ॥

यस्मात्कर्मज्ञानसमुत्थमेव तस्मात्तद्व्यावृत्तौ निवर्तत इत्युच्यते—

दग्धाखिलाधिकारश्चेद्
ब्रह्मज्ञानाग्निना मुनिः ।
वर्तमानः श्रुतेर्मूर्ध्नि
नैव स्याद्वेदकिंकरः ॥ ४० ॥

अथेतरो घनतराविद्यापटलसंवीतान्तःकरणो ऽङ्गी-

दर्शयिष्यामीत्यत आहेति ॥ प्रदर्शयिष्यामीत्यतो हेतोराह, एतदर्थमाहेति यावत् । ब्राह्मण्याद्यात्मकइति ॥ वर्णाश्रमवयोवस्थाविशेषवति देहे । ना, पुरुषः । आत्मेति भावनां लात्वा, समादायेत्यविद्यान्वयो दर्शितः । सांप्रतं तदधीनं कर्तृत्वभोक्तृत्वादिसंसारान्वयं दर्शयति श्रुतेरिति ॥ किंकरतां, तन्नियोगात्तदुक्तकारिताम् । ततश्च कर्मणामविद्याऽविनाभूतत्वान्नाविद्यानिवर्तकत्वमित्यर्थः* ॥ ३९ ॥

एवमन्वयमुक्त्वा तद्व्यतिरेके कर्मव्यतिरेकमाख्यातुमुत्तरश्लोक इत्याह यस्मादिति ॥ दग्धेति ॥ अधिक्रियते कर्मण्यनेनेत्यधिकारो ब्राह्मण्याद्यभिमानः, वर्तमानः श्रुतेर्मूर्ध्नि, प्रतिपाद्यतया ब्रह्मरूपेण ॥ ४० ॥

यः पुनर्वेदकिंकरो ऽविद्यान्वयेन संसारान्वयी दर्शितस्तस्य संसा-

---

* व्यापकनिवृत्त्या व्याप्यनिवृत्तेर्न्यायसिद्धत्वादिति भावः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

कृतकर्तृत्वाद्यशेषकर्माधिकारकारणो विधिप्रतिषेधचोदनासंदंशोपदष्टः कर्मसु प्रवर्तमानः*—

शुभैराप्नोति देवत्वं
निषिद्धैर्नारकीं गतिम् ।
उभाभ्यां पुण्यपापाभ्यां
मानुष्यं लभतेऽवशः ॥ ४१ ॥

आब्रह्मस्तम्बपर्यन्ते घोरे दुःखोदधौ घटीयन्त्रवदारोहावरोहन्यायेनाधममध्यमोत्तमसुखदुःखमोहविद्यु-

रप्रकारं† वैराग्योत्पादनायाह अथेतर इति ॥ अङ्गीकृतं कर्तृत्वभोक्तृत्वब्राह्मणत्वादिलक्षणं कर्माधिकारे कारणं येन स तथोक्तः । विधिप्रतिषेधचोदनाभ्यां परिगृहीतश्चोदनाविषये कर्मणि प्रवर्तमानः । पूर्वं पूर्वमुत्तरस्योत्तरस्य हेतुः । शुभैरिति ॥ "पुण्येन पुण्यं लोकं जयति पापेन पापम् उभाभ्यामेव मनुष्यलोक"मित्यस्याः श्रुतेरर्थोऽनेन व्यक्तीकृतः । अवशः, कामकर्मादिपरतन्त्र इत्यर्थः ॥ ४१ ॥

उत्तरश्लोकगतस्यैवंशब्दस्यापेक्षितमर्थं प्रदर्शयन्नेव संसारगतिमेव प्रदर्शयन् संसारमेव प्रपञ्चयति आब्रह्मेति ॥ योनीष्वङ्क्ष्यमाण इति श्लोकगतेन पदेन संबन्धः । ता एव योनीर्विशिनष्टि अधमेति ॥ अधममध्यमोत्तमा ये सुखदुःखमोहास्तेषां विद्युच्चपलो यः संपातः संपर्कस्तं दातुं शीलं यासां योनीनां तास्तथोक्तास्ता एव

---

* कर्मप्रवृत्तावर्थित्वादिलक्षणस्याधिकारित्वस्य कारणत्वात् कर्तृत्वाद्यभिमानाभावे च तस्यानुपपद्यमानत्वात्तादृशाभिमानस्य चाविद्यामन्तरा ऽभ्युत्थानायोगादविद्यैव कर्मप्रवृत्तौ मूलकारणमिति भावः ॥

† संसरणप्रकारमिति २ पु० पाठः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

चपलसंपातदायिनीर्विचित्रयोनीश्चण्डोत्पिञ्जलकश्वसनवेगाभिहताम्भोनिधिमध्यवर्तिशुष्कालाबुवच्छुभाशुभव्यामिश्रकर्मवायुसमीरितः—

एवं चङ्क्रम्यमाणो ऽय-
मविद्याकामकर्मभिः ।
पाशितो जायते कामी
म्रियते चासुखाद्धतः* ॥ ४२ ॥

यथोक्ते ऽर्थे आदरविधानाय प्रमाणोपन्यासः—

श्रुतिश्चेमं जगादार्थं
कामस्य विनिवृत्तये ।
तन्मूला संसृतिर्यस्मा-
त्तन्नाशो ऽज्ञानहानतः ॥ ४३ ॥

विचित्रा देवतिर्यङ्नरादिभेदेन । चङ्क्रमणे दृष्टान्तमाह चण्डेति ॥ उत्पिञ्जलकः, आकुलः† । चण्डश्चासावुत्पिञ्जलकश्चेति चण्डोत्पिञ्जलकः, श्वसनो वायुस्तस्य वेगेनाभिहतो यो ऽम्भोनिधिस्तन्मध्यवर्ति यच्छुष्कालाबु तद्यथा ऽतिशयेन भ्रमति तद्वच्छुभमशुभं तदुभयं व्यामिश्रं च यत्कर्म स एव वायुस्तेन समीरितः प्रेरितो न क्वापि निवृतिमुपलभमानस्तिष्ठतीति पाशितो बद्धः कामी जायतइति कामस्य प्राधान्येन संसारकारणत्वमुक्तम् ॥ ४२ ॥

तत्र श्रुतिस्मृती प्रमाणमिति दर्शयितुमाह यथोक्तेति ॥ यस्मात्काम-

---

* स्वरूपाऽलाभेन नानादुःखदून एव पूर्वदेहं त्यजतीत्यर्थः ॥

† नानादिगागततया ऽनवस्थित इत्यर्थः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

का त्वसौ श्रुतिरिति चेत्—

यदा सर्वे प्रमुच्यन्त-
इति त्विति च वाजिनः* ।
कामबन्धनमेवेदं
व्यासो ऽप्याह पदे पदे† ॥ ४४ ॥

मूला संसृतिस्तस्मात्तस्य विनिवृत्तये श्रुतिरागादित्यन्वयः । कथं तर्हि तन्निवृत्तिरित्यत आह तन्नाश इति ॥ "यदा सर्वे प्रमुच्यन्ते कामा ये ऽस्य हृदि स्थिताः, अथ मर्त्यो ऽमृतो भवत्यत्र ब्रह्म समश्नुते," "इति नु कामयमानो यो ऽकामो निष्काम आत्मकाम आप्तकामो न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते, ब्रह्मैव सन्ब्रह्माप्येती"ति वाजसनेयिन आहुरित्यन्वयः ॥

"कामबन्धनमेवेदं नान्यदस्तीह बन्धनम् ।
कामबन्धनमुक्तो हि नेह भूयो ऽभिजायते" ॥

इत्यादिनापि कामस्य संसारकारणत्वं स्मर्यत इत्यर्थः ॥ ४३ ॥

एवं तावत्कामस्य संसारकारणत्वमुक्तं, "तस्य च तन्नाशो ऽज्ञानहानत" इति ज्ञानादज्ञाननिवृत्त्या निवृत्तिरप्युक्ता, का त्वसौ श्रुतिरिति चेत्, "यदा सर्वे"ति "कामबन्धनमेवेद"मिति च ॥ ४४ ॥

---

* इति त्विति च वाजिनः, इति २ पु० पाठः । इति वाजसनेयिन इति ४ पुस्तके ॥

† एतच्छ्लोकाग्रे "कामबन्धनमेवेदं नान्यल्लोके ऽस्ति बन्धनम् । कामबन्धविनिर्मुक्तो नेह भूयो ऽभिजायते" इति का० सं० पु० पुस्तके ऽधिकः पाठः, २ पुस्तके लिखित्वा कुण्डलितः । व्याख्यायां पुनरविकलस्यास्य श्लोकस्योल्लेखान्मूले नास्तीति प्रतीयते, व्याख्यायां 'कामबन्धनमेवेद'मिति चेति प्रतीकग्रहणं तु उपरितनश्लोकोत्तरार्धाभिप्रायेणापि योजयितुं शक्यम् ॥

www.astrology-tantra.com
DR.RUPNATHJI (DR.RUPAK NATH)

एष संसारपन्था व्याख्यातः । अथेदानीं तद्यादृत्तये कर्मणामारादुपकारकत्वेन* यथा मोक्षहेतुतां प्रतिपद्यन्ते तथा ऽभिधीयते—

तस्यैवं दुःखतप्तस्य
कथं चित्पुण्यशीलनात् ।
नित्येहाक्षालितधियो
वैराग्यं जायते हृदि ॥ ४५ ॥

कीदृग्वैराग्यमुत्पद्यत इत्युच्यते—

नरकाद्गीर्यथा ऽस्याभू-
त्तथा काम्यफलादपि ।
यथार्थदर्शनात्तस्मा-
न्नित्यं कर्म चिकीर्षति ॥ ४६ ॥

तत्र सर्वथा कर्मणामनुपयोगशङ्कायामुपयोगप्रकारप्रदर्शनायोत्तरग्रन्थ इत्याह एष संसारेति ॥ तस्यैवमिति ॥ पुण्यशीलस्य दुर्लभतां दर्शयति कथं चिदिति ॥ काम्ये पुण्ये ऽप्यानुषङ्गिकी शुद्धिरस्ति, ततो नित्यानुष्ठाने बुद्धिरुत्पद्यते, एवं नित्येहया नित्यकर्मानुष्ठानेन विशुद्धबुद्धेः काम्यकर्मफलेषु वैराग्यं जायते इत्यर्थः ॥४५॥

कीदृग्वैराग्यमुत्पद्यत इत्युच्यते नरकादिति ॥ ननु प्रतिषिद्ध-

---

* आरादुपकारकं नाम द्रव्यादिकं किं चिदनुद्दिश्य विधीयमानं कर्म, तस्य च परमापूर्वोत्पत्तावेवोपयोगो न तु यागस्वरूपनिर्वाहकत्वे, यथा प्रयाजादीनाम् । एवं च नित्यानामप्यारादुपकारकत्वेन चित्तशुद्ध्यापादनद्वारा ऽविद्यानिवृत्तावेवोपयोगो न तु मोक्षस्वरूपनिष्पत्तौ । अत एव प्रधानमोक्षस्वरूपापादने कर्मण उपयोगाभावान्न तस्य संनिपत्योपकारकत्वमिति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

एवं नित्यनैमित्तिककर्मानुष्ठानेन—

शुध्यमानं तु तच्चित्त-
मीश्वरार्पितकर्मभिः ।
वैराग्यं ब्रह्मलोकादौ
व्यनक्त्यथ सुनिर्मलम् ॥ ४७ ॥

यस्माद्रजस्तमोमलोपसंसृष्टमेव चित्तं कामबडिशेनाकृष्य विषयदुरन्तसूनास्थानेषु* निक्षिप्यते, तस्मा-

---

कर्मफलान्नरकादिव किमिति काम्यफलात्स्वर्गात्सुखरूपाद्भयं जायतइत्यत आह यथार्थेति ॥ काम्यकर्मफलस्यानित्यत्वसातिशयत्वदुःखबहुलत्वादिदोषदर्शनात्काम्यकर्मनिमित्तमपि भयं जायतइत्यर्थः । यस्माद्भयं जातं तस्मात्काम्यकर्मभ्यो व्यावृत्तः पुनस्तदेव नित्यं कर्म तात्पर्येणानुष्ठातुमिच्छतीत्यर्थः ॥ ४६ ॥

भवत्वेवं काम्यकर्मपरित्यागेन नित्यनैमित्तिककर्मणामेवानुष्ठानं तथापि केन द्वारेण तेषां मोक्षहेतुत्वमित्यत आह एवं नित्येति ॥ चित्तशुद्धिवैराग्योत्पादनद्वारेणेत्यर्थः ॥ शुध्यमानं त्विति स्पष्टम् ॥४७॥

ननु किमनेन वैराग्येण, तस्य मोक्षसाधनत्वेन तत्सहकारित्वेन वा ऽभावादित्याशङ्क्य रागस्य मोक्षोपाये प्रवृत्तिप्रतिबन्धकत्वात्तत्प्रतिबन्धकरागाभावतया वैराग्यस्य मोक्षप्रवृत्तिहेतुतामुपपत्तिपुरःसरं दर्शयति यस्मादित्यादिना ॥ रजस्तमसी एव हेयत्वान्मलत्वमलं तेन मलेनोपसंसृष्टमपहृतं कलुषीकृतमन्तःकरणं कामाख्येन बडिशवदाकर्षकत्वाद् बडिशेनाकृष्य विषयप्रवणं विधाय

---

* वधस्थानेषु ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

न्नित्यनैमित्तिककर्मानुष्ठानपरिमार्जनेनाऽपविद्धरजस्त-मोमलं, प्रसन्न,मनाकुलं, संमार्जितस्फटिकशिलाकल्पं, बाह्यविषयहेतुकेन च रागद्वेषात्मकेनातिग्रहत्वङ्गिणा-नाऽनाकृष्यमाणं, विधूताशेषकल्मषं, प्रत्यङ्मात्रप्रवणं, चित्तदर्पणमवतिष्ठते, ऽत इदमभिधीयते—

व्युत्थिता ऽशेषकामेभ्यो
यदा धीरवतिष्ठते ।
तदैव प्रत्यगात्मानं
स्वयमेवाविविक्षति ॥ ४८ ॥

अतः परमवसिताधिकाराणि कर्माणि प्रत्यक्प्रवण-

विषयाः शब्दादय एव दुरन्तानि सूनास्थानानि विषयपराणां पुनः पुनर्जन्ममरणादिहेतुत्वात्तेषु मत्स्यादिवन्निक्षिप्यते यस्मात्तस्मान्नि-त्यानुष्ठानात्तथाभूतप्रतिबन्धक्षये यथोक्तविशेषणं चित्तदर्पणं प्रत्यङ्-मात्रप्रवणमवतिष्ठत इत्यन्वयः । अपविद्धरजस्तमोमलं, व्यावृत्तरज-स्तमोमलम् । अत एव प्रसन्नमनाकुल,मचलम् । प्रसन्नतायां दृष्टा-न्तमाह संमार्जितेति ॥ अत एव ये बाह्याः शब्दादयो विष-यास्तद्धेतुको यौ रागद्वेषौ तल्लक्षणेनातिग्रहत्वङ्गिणेन विषयान्प्रत्य-नाकृष्यमाणम् । अत्र च सकामेनातिग्रहेण गृहीत इति कामस्या-तिग्रहत्ववचनादस्य च दोषोपलक्षणार्थत्वाद्रागद्वेषयोरतिग्रहात्मक-त्वम् । तस्यानाकृष्यमाणत्वे हेतुः, विधूतेति ॥ आविविक्षति, आभि-मुख्येन प्रवेष्टुमिच्छतीत्यर्थः ॥ ४८ ॥

एवं शुद्धान्तःकरणस्योत्पन्नवैराग्यस्य सर्वकर्मसंन्यासे ऽधिकार इत्यभिप्रेत्याह अतः परमिति ॥ "यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

तान्यमूनि कृतसंप्रत्तिकानि* चरितार्थानि सन्ति—

प्रत्यक्प्रवणतां बुद्धेः
कर्माण्युत्पाद्य शुद्धितः ।
कृतार्थान्यस्तमायान्ति
प्रावृडन्ते घना इव ॥ ४९ ॥

यतो नित्यकर्मानुष्ठानस्यैव सन्निधा—

तस्मान्मुमुक्षुभिः कार्य-
मात्मज्ञानाभिलाषिभिः ।
नित्यनैमित्तिकं कर्म
सदैवाऽऽत्मविशुद्धये ॥ ५० ॥

यथोक्ते ऽर्थे सर्वज्ञवचनं प्रमाणम्—

आरुरुक्षोर्मुनेर्योगं
कर्म कारणमुच्यते ।

चेष्टित”मिति वचनात्कर्मप्रवृत्तिनिमित्तस्य कामस्य निवृत्तत्वात्कर्माण्यवसिताधिकाराण्युच्यन्ते । प्रत्यक्प्रवणत्वमूनी कृतसंप्रत्तिकानि ॥ संप्रत्तिर्नाम स्वव्यापाराणां पुत्रे संप्रदानं समर्पणम् । अत एव चरितार्थानि, कृतप्रयोजनान्यस्तमायान्तीति श्लोकगतेन पदेन संबन्धः । प्रत्यगिति ॥ कर्माणि बुद्धेः शुद्ध्युत्पादनद्वारेण तस्याः प्रत्यक्प्रवणतामुत्पाद्य कृतार्थानि सन्त्यस्तमायान्तीत्यर्थः ॥ ४९ ॥

एवं कर्मणामन्तःकरणशुद्धिद्वारेण प्रत्यक्प्रवणताहेतुत्वादस्येव मुक्तावुपयोग इत्युपसंहरति यत इति ॥ ५० ॥

---

* कृतसंमतिकानीति क्वचित् पाठः । परमयमप्रचुरो व्याख्याऽधृतश्चेत्युपेक्षितः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

योगारूढस्य तस्यैव

शम एवेति च स्मृतिः ॥ ५१ ॥

नित्यकर्मानुष्ठानाद्धर्मोत्पत्ति,र्धर्मोत्पत्तेः पापहानि,स्ततश्चित्तशुद्धि,स्ततः संसारयाथात्म्यावबोध,स्ततो वैराग्यं, ततो मुमुक्षुत्वं, ततस्तदुपायपर्येषणं, ततः सर्वकर्मतत्साधनसंन्यास,*स्ततो योगाभ्यास,स्ततश्चित्तस्य प्रत्यक्प्रवणता, ततस्तत्त्वमस्यादिवाक्यार्थपरिज्ञानं, ततोऽविद्योच्छेद,स्ततश्च स्वात्मन्येवावस्थानम्, "ब्रह्मैव सन्ब्र-

---

कर्मणां मुक्तावारादुपकारकत्वं न तु साक्षादित्युक्तम् । तस्मिन्नर्थे भगवद्वचनं प्रमाणमित्याह योगेति ॥ आरुरुक्षोः, सम्यग्दर्शनसाधनं ध्यानयोगमारोढुमिच्छोस्तदनुष्ठानासमर्थस्य कर्म, नित्यं नैमित्तिकं कारणं तदनुष्ठानसामर्थ्योत्पादकमुच्यते श्रुतिभिः स्मृतिभिश्च । योगमारूढस्य, योगमनुष्ठातुं समर्थस्य शमः कारण,मुपशमः सन्यासः कारणं, योगावाप्तौ च साधनमिति वदन् परंपरयैव कर्मणां मोक्षोपयोगं दर्शयतीत्यर्थः† ॥ ५१ ॥

कर्मणां पारंपर्येण मुक्तावुपयोगो दर्शित,स्तदेव पारंपर्यमिदानीं दर्शयति नित्यकर्मेति ॥ धर्मोत्पत्ति,रदृष्टोत्पत्तिः पापहानिः । "धर्मेण पापमपनुदती" ति श्रुतेः । चित्तशुद्धि,श्चित्तस्य विवेकक्षमता । याथात्म्यावबोधः, अनित्यत्वादिदोषदर्शनम् । योगाभ्यासः, श्रवणमनननिदिध्यासनादीनामनुष्ठानम् । अत्र चित्तस्य प्रत्यक्प्रवणता

---

* सर्वकर्मसाधनसंन्यास इति का० सं० पु० ४ पुस्तके च ॥

† मोक्षोपयोगं दर्शयतीत्येव २ पुस्तके पाठः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

ह्माप्येति विमुक्तश्च विमुच्यते" इति—

पारंपर्येण कर्मैवं
स्यादविद्यानिवृत्तये ।
ज्ञानवन्नाविरोधित्वा-
त्कर्माविद्यां निरस्यति ॥ ५२ ॥

न च कर्मणः कार्यमण्वपि मुक्तौ संभाव्यते*, नापि मुक्तौ यत्संभवति तत्कर्मापेक्षते । तदुच्यते—

उत्पाद्यमाप्यं संस्कार्यं
विकार्यं च क्रियाफलम् ।
नैवं मुक्तिर्यतस्तस्मात्
कर्म तस्या न साधनम् ॥ ५३ ॥

एवं तावत्केवलं कर्म साक्षादविद्याऽपनुत्तये न

नाम प्रत्यगात्मन्येवाप्रयत्नेनावस्थानम् । कर्मसंन्यासस्य हेतुत्वेन पूर्वोदिता तु प्रत्यक्प्रवणता प्रत्यगात्मविविदिषामात्ररूपेति न पूर्वापरविरोधः । वाक्यार्थपरिज्ञानं, साक्षात्कारलक्षणम् । स्वात्मन्यवस्थानमित्यत्र प्रमाणमाह ब्रह्मैवेति ॥ ननु कर्म साक्षादेवाविद्यानिवर्तकं किं न स्यादित्यत आह ज्ञानवदिति ॥ ५२ ॥

कर्मणः साक्षान्मोक्षसाधनत्वाभावे युक्त्यन्तरमाह न चेति ॥ कर्मफलस्योत्पाद्यादेर्मुक्तावसंभवात्, संभवतश्च स्वरूपेणावस्थानस्य कर्मानपेक्षत्वान्न मुक्तिः कर्मसाध्यत्वमित्यर्थः ॥ ५३ ॥

वृत्तकीर्तनपूर्वकं वर्तिष्यमाणग्रन्थसंदर्भस्य तात्पर्यमाह एवं

---

* साक्षादिति शेषः । मुक्तौ कर्मणः संनिपत्योपकारकत्वं न संभवतीत्यर्थः ॥

DR.RUPAK NATH (DR.RUPAK NATH)
www.astrology-tantra.com

पर्याप्तमिति प्रपञ्चितम्, मुक्तौ च मुमुक्षुज्ञानतद्विषयस्वाभाव्यानुरोधेन सर्वप्रकारस्यापि कर्मणो ऽसंभव उक्तो "हितं संप्रेप्सता"मित्यादिना, यादृशस्य त्वादुपकारकत्वेन* ज्ञानोत्पत्तौ कर्मणां समुच्चयः संभवति तथा प्रतिपादितम्†, अविद्योच्छित्तौ तु त्वध्यात्मस्वभावस्यात्मज्ञानस्यैवासाधारणसाधकतमत्वं नान्यस्य प्रधानभूतस्य गुणभूतस्य वेत्येतदधुनोच्यते ॥

तत्र ज्ञानं गुणभूतं तावद्धेतु‡रित्येतदाह—

संनिपत्य न च ज्ञानं
कर्माज्ञानं निरस्यति ।

तावदिति ॥ अनित्यफलादिरक्तत्वं मुमुक्षुस्वभावः । ज्ञानस्य प्रमाणवस्तुपरतन्त्रतया अविद्यानिवर्तकत्वं स्वभावः । ज्ञानविषयस्य चात्मनः कूटस्थत्वेनासाध्यत्वं स्वभावः । पूर्वं केवलकर्मणां मुक्तिसाधनत्वं निराकृतमिदानीं ज्ञानेनाङ्गाङ्गिभावेन समप्रधानतया वा समुच्चितस्य मुक्तिसाधनत्वं न संभवतीत्युच्यते इत्यर्थः ॥

एवं समुदायतात्पर्यमभिधायाधुना समनन्तरश्लोकतात्पर्यमाह । तत्रेति ॥ ज्ञानं गुणभूतं कर्म प्रधानमित्येतत्पक्षनिरासायोत्तरश्लोकारम्भ इत्यर्थः । संनिपत्येति ॥ कर्मणो ऽङ्गत्वेन ज्ञानं कर्म संनिपत्य प्राप्याविद्यां न निरस्यति । कुत इत्यत आह साध्यसाधने-

---

* चित्तशुद्ध्यादिद्वारेणेत्यर्थः ॥

† "तस्यैवं दुःखतप्तस्ये"त्यादिनेति शेषः । नै० अ० १ पा० १ श्लो० ४५ ॥

‡ ज्ञानसमुच्चितं कर्म न कारणमित्यर्थः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

साध्यसाधनभावत्वा-
देककालानवस्थितेः ॥ ५४ ॥

समप्रधानयोरप्यसंभव एव—

बाध्यबाधकभावाच्च
पञ्चास्योरणयोरिव ।
एकदेशानवस्थाना-
न्न समुच्चयता तयोः ॥ ५५ ॥

कुतो बाध्यबाधकभावो, यस्मात्—

अयथावस्त्वविद्या स्या-
द्विद्या तस्या विरोधिनी ।
समुच्चयस्तयोरेवं
रविशार्वरयोरिव ॥ ५६ ॥

तस्मादकारकब्रह्मात्मनि परिसमाप्तावबोधस्याशेष-

ति ॥ कर्मणो ऽन्तःकरणशुद्धिद्वारेण ज्ञानसाधनत्वात्साध्येन ज्ञानेन सहैककालाऽनवस्थितेर्नाङ्गाङ्गिभावः । तत्साध्यस्य तदङ्गत्वाद्दृष्टैरेकप्रयोगानारूढत्वात् जन्मान्तरानुष्ठितस्यापि कर्मणो ज्ञानसाधनत्वाङ्गीकाराच्चेत्यर्थः ॥ ५४ ॥

इदानीं समसमुच्चयनिरासायाह समप्रधानयोरिति ॥ पञ्चास्यः, सिंहः । उरणो, मेषः । एकदेशे, एकस्मिन्नाश्रये । अनवस्थानान्न समप्रधानता ऽपि तयोरित्यर्थः ॥ ५५ ॥

उक्तस्यैव बाध्यबाधकभावहेतोः समर्थनायाह कुत इति ॥ अयथावस्त्विति ॥ परमार्थात्मवस्तुविषयं ज्ञानम्, अविद्याध्यारोप-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

कर्मचोदना नाम चोद्यस्याभाव्यात्कुण्ठता कथं, तद्भिधीयते—

बृहस्पतिसवे यद्वत्
क्षत्रियो न प्रवर्तते ।
ब्राह्मणत्वाद्यहंमानी
विप्रो वा क्षात्रकर्मणि* ॥ ५७ ॥

यथा ऽयं दृष्टान्त एवं दार्ष्टान्तिको ऽपीत्याह—

विदेहो वीतसंदेहो
नेतिनेत्यवशेषितः ।

तन्मिथ्याकर्तृत्वाद्यभिमानसम्बन्धनिमित्तं कर्मविद्या, तयोरेवमितरेतरबाध्यबाधकभावेन वर्तमानयोः ज्ञानकर्मणोः प्रकाशतमसोरिव विरुद्धः समुच्चय इत्यर्थः† ॥ ५६ ॥

तस्मान्न ज्ञानिनः कर्मनियोगविषयत्वमित्युपसंहरति तस्मादिति ॥ अकारकब्रह्मात्माऽवबोधोन्मूलितकर्माधिकारसम्बन्धस्याऽकर्त्रात्माऽभिमानवतो विधिप्रतिषेधशास्त्रगोचरत्वं नास्तीत्यर्थः । तत्र को हेतुरित्याशङ्क्य तत्त्वज्ञानाद्वर्णाश्रमाद्यभिमानशून्यत्वमिति दृष्टान्तान्तरमाह बृहस्पतिसवदिति ॥ ५७ ॥

---

* क्षत्रकर्मणीति क० सं० पु० पुस्तके ४ पु० च । २ पुस्तके तु विप्रोक्षात्त्रत्वकर्मणीत्यसंगतः पाठः । यथा तावत् "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेते"ति विहिते वाजपेयकर्तुर्ब्राह्मणस्यैव बृहस्पतिसवे ऽधिकारो, यथा वा "राजा राजसूयेन स्वाराज्यकामो यजेते"ति विहिते राजसूये राज्ञः सत एव स्वाराज्यकामस्याऽधिकारो न ब्राह्मणस्य तद्वदित्यर्थः । स्पष्टं चेदमवेष्ट्यधिकरणे । जैमिनिसूत्र० अ० २ पाद ३ सूत्र ३ ॥

† विद्याऽविद्याशब्दाभ्यामेव परस्परविरुद्धार्थोपस्थानादिति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

देहाद्यनात्मदृक्तद्वत्
तत्क्रियां वीक्षते ऽपि न ॥ ५८ ॥

तस्यार्थस्याविष्करणार्थमुदाहरणम्—

मृत्स्तिभके यथेभत्वं
शिशुरध्यस्य वल्गति ।
अध्यस्याऽऽत्मनि देहादीन्
मूढस्तद्वद्विचेष्टते ॥ ५९ ॥

न च वयं ज्ञानकर्मणोः सर्वत्रैव समुच्चयं प्रत्याचक्ष्महे, यत्र प्रयोज्यप्रयोजकभावो ज्ञानकर्मणोस्तत्र

दार्ष्टान्तिकमाह विदेह इति ॥ विदेह इत्यनेन स्थूलशरीराभिमानाभाव उक्तः । वीतसंदेहो, विगतसंदेहः । एतेन संशयात्मकसूक्ष्मशरीराभावः सूच्यते । तत्र हेतुः नेतिनेतीति ॥ देहाद्यनात्मदृक्, देहेन्द्रियादावात्माभिमानहीन इत्यर्थः ॥ ५८ ॥

एवं देहादौ मिथ्याभिमानवत एव प्रवृत्तिर्नाभिमानशून्यस्येत्युक्तम् । तत्र मिथ्याभिमानात्प्रवृत्तिं दृष्टान्तेन दर्शयति तस्यार्थस्येति ॥ मृत्स्तिभके, प्रशस्तमृन्निर्मिते कलभे ॥ ५९ ॥

एवं तावत् "त्संनिपत्य न च ज्ञान"मित्यादिना ज्ञानकर्मणोः समुच्चयो निराकृतः । तदेतदयुक्तम् । "यदेव विद्यया करोति" "ज्ञात्वा कर्माणि कुर्वीते"त्यादिवचनविरोधादित्याशङ्क्याह न च वयमिति ॥ ज्ञानकर्मणोः प्रयोज्यप्रयोजकभावो निमित्तनैमित्तिकभावस्तत्र न केनापि तयोः समुच्चयो वारयितुं शक्यत इत्यर्थः । कुत्र तर्हि ज्ञानकर्मणोः प्रयोज्यप्रयोजकभावः, कुत्रासौ नास्तीत्यत आह

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

नास्मत्पित्रा ऽपि शक्यते निवारयितुम् । तत्र विभागप्रदर्शनायोदाहरणं प्रदर्श्यते--

स्थाणुं चोरधिया ऽऽलाय
भीतो यद्वत्पलायते ।
बुद्ध्यादिभिस्तथा ऽऽत्मानं
भ्रान्तो ऽध्यारोप्य चेष्टते ॥ ६० ॥

एवं यत्र यत्र ज्ञानकर्मणोः प्रयोज्यप्रयोजकभावस्तत्र तत्र सर्वत्रा ऽयं न्यायः । यत्र तु न समकालं नापि क्रमेणोपपद्यते समुच्चयः स विषय उच्यते—

स्थाणोः सतत्त्वविज्ञानं
यथा नाङ्गं पलायने ।
आत्मनस्तत्त्वविज्ञानं
तद्वन्नाङ्गं क्रियाविधौ ॥ ६१ ॥

तत्र विभागेति ॥ यथा चोरधिया स्थाणुमालाय, गृहीत्वा पलायते एवं बुद्ध्यादिरूपेणात्मानं गृहीत्वा कर्म करोतीति तेन तत्र कर्मप्रवृत्तिनिमित्तत्वात् ज्ञानं कर्माङ्गमित्यर्थः ॥ ६० ॥

"यदेव विद्यया करोति" "ज्ञात्वा कर्माणि कुर्वीत" इत्यादावप्ययमेव न्याय इत्यतिदिशति एवं यत्रेति ॥ आत्मज्ञानस्य तु कर्मप्रवृत्तौ प्रयोजकभावाभावान्न तेन समुच्चय इति सदृष्टान्तमाह यत्र तु न समकालमिति ॥ स्थाणोः सतत्त्वविज्ञानमिति ॥ स्थाणुविषयं तत्त्वज्ञानं स्थाणुरेवायं न चोर इति तत्त्वज्ञानं यथा नाङ्गमेवमात्मवस्तुविज्ञानमकर्तृ ब्रह्माहम-

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

यस्माद्गुणस्यैतत्स्वाभाव्यम्—

यद्धि यस्यानुरोधेन
स्वभावमनुवर्तते ।
तत्तस्य गुणभूतं स्या-
न्न प्रधानाद्गुणो यतः ॥ ६२ ॥

यस्मात्—

कर्मप्रकरणाकाङ्क्षि
ज्ञानं कर्मगुणो भवेत् ।
यद्धि प्रकरणे यस्य
तत्तदङ्गं प्रचक्षते* ॥ ६३ ॥

स्मीति ज्ञानं कर्मप्रवृत्तौ नाङ्गमित्यर्थः† ॥ ६१ ॥

प्रधानत्वेनाभिमतकर्मनिवर्तकत्वादपि नात्मज्ञानं कर्माङ्गमित्याह यस्माद्गुणस्येति ॥ गुणस्यैतत्स्वभावत्वमस्ति यत्प्रधानानुरोधित्वं, तच्च तत्त्वज्ञानस्य नास्तीत्यर्थः । प्रधानमत्तीति प्रधानात्, यत्प्रधानविरोधि न तदङ्गमित्यर्थः ॥ ६२ ॥

विनियोजकप्रकरणादिसद्भावात्कर्मस्वरूपादिसम्यग्ज्ञानस्य तदङ्गत्वमुचितम्, आत्मज्ञानस्य तु प्रकरणाद्यभावान्न तदङ्गत्वमित्यभिप्रेत्याह यस्मादिति ॥ कर्मप्रकरणाकाङ्क्षीति ॥ ६३ ॥

* यद् यत्प्रकरणविषये साकाङ्क्षं तत्तदङ्गं भवति यथा प्रयाजादीनां दर्शप्रकरणाकाङ्क्षित्वाद्दर्शाङ्गत्वम्, एवं प्रकृते ऽपि यदि ज्ञानं कर्मप्रकरणाकाङ्क्षि स्यात्तदैव तु तस्य कर्माङ्गत्वमुपपन्नं भवेत्तदेव तु नास्तीत्यर्थः ॥

† अनेन तावद्दृष्टान्तेन मिथ्याज्ञानकर्मणोरेव प्रयोज्यप्रयोजकभावसंभवात्समुच्चय इति सूचितम् । एवं च आत्मज्ञानस्य सम्यग्ज्ञानरूपस्य मिथ्याज्ञानविरोधित्वान्न कर्मणा सह समुच्चयः । यदेव विद्ययेत्यादौ च विद्यापदस्योपासनापरत्वात्तस्याश्च मिथ्याज्ञानविजृम्भितत्वात्संभवत्येव कर्मसमुच्चय इति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

स्वरूपलाभमात्रेण
यत्त्वविद्यां निहन्ति नः ।
न तदङ्गं प्रधानं वा
ज्ञानं स्यात् कर्मणः क्वचित्* ॥ ६४ ॥

समुच्चयपक्षवादिना ऽप्यवश्यमेव तदभ्युपगन्तव्यम् ।
यस्मात्—

अज्ञानमनिराकुर्वद्
ज्ञानमेव न सिध्यति ।
विपन्नकारकग्रामं
ज्ञानं कर्म न ढौकते ॥ ६५ ॥

इदं चापरं कारणं ज्ञानकर्मणोः समुच्चयनिबर्हि†—

एतदेव स्पष्टयति स्वरूपलाभेति ॥ ६४ ॥

आत्मज्ञानस्य कर्मणा समुच्चयमभ्युपगच्छता तस्य प्रमाणज्ञानत्वात्स्वविषयाऽविद्यानिवर्तकत्वं बलादभ्युपेयं, तथा सति न स्वाभिमतसमुच्चयसिद्धिरित्याह समुच्चयपक्षवादिना ऽपीति ॥ नन्वज्ञानमनिराकुर्वद् ज्ञानमेव न सिध्यति ततः किमित्यत आह विपन्नेति ॥ कारकग्रामाभावे कर्मण एवाभावान्न ज्ञानं कर्म स्पृशतीत्यर्थः ॥ ६५ ॥

---

* अङ्गत्वेनाङ्गित्वेन चेष्यमाणयोरुभयोः सामानाधिकरण्ये एवाङ्गाङ्गिभावः, ज्ञानस्य त्वज्ञानध्वंसमन्तरा स्वरूपलाभस्यैवासंभवादविद्याविजृम्भितकर्मणो ऽङ्गत्वमङ्गित्वं वा नोपपद्यतइति भावः ॥

† निबर्हणे, इति २ पु० पाठः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

हेतुस्वरूपकार्याणि
प्रकाशतमसोरिव ।
विरोधीनि ततो नास्ति
सांगत्यं ज्ञानकर्मणोः ॥ ६६ ॥

एवमुपसंहृते केचित्स्वसंप्रदायबलावष्टम्भादाहुः। यदेतद्वेदान्तवाक्यादहं ब्रह्मेति विज्ञानं समुत्पद्यते तन्नैव* स्वोत्पत्तिमात्रेणाज्ञानं निरस्यति किं तर्ह्यहन्यहनि द्राघीयसा कालेनोपासीनस्य† सतो भावनोपचयान्निःशेषमज्ञानमपगच्छति । "देवो भूत्वा देवा-

इदमिति ॥ हेतुस्वरूपकार्याणीति ॥ ज्ञानस्य हेतुः प्रमाणं, स्वरूपं च परमार्थप्रकाशात्मकत्वं, कार्यमविद्यानिवृत्तिः, कर्मणो हेतुरविद्यारागादिः, स्वरूपमप्रकाशात्मकत्वं, कार्यमुत्पत्त्याप्यादीति परस्परविरोधीनि ॥ ६६ ॥

पूर्वं ज्ञानस्य स्वोत्पत्तिमात्रेणाज्ञाननिवर्तकत्वात्कर्मभिः समुच्चयोऽनुपपन्न इत्युक्तम्, इदानीं तदयुक्तं, वाक्यजन्यज्ञानोत्तरकालीनभावनोत्कर्षाद् भावनाजन्यसाक्षात्कारलक्षणज्ञानान्तरेणैवाज्ञानस्य निवृत्तेर्ज्ञानाभ्यासदशायां ज्ञानस्य कर्मणा समुच्चयोपपत्तेरित्येकदेशिनां मतमुत्थाप्य निराकरोति एवमुपसंहृतइत्यादिना ॥ देवो भूत्वा, भावनोपचयाद्देवभावं साक्षात्कृत्य पतिते देहे उपास्यदेवताभावं प्राप्नोतीत्यर्थः । विज्ञायशब्देन संसृष्टरूपं ब्रह्मावगम्य प्रज्ञां, साक्षात्कारलक्षणामसंसर्गात्मिकां कुर्वीत, संततान्यासबलात्सा-

* तन्नैतदिति का० सं० पु० पाठः ॥

† उपासीनस्य, उपासनां कुर्वतः ॥

नश्येती”ति श्रुतेः । अपरे तु ब्रुवते, वेदान्तवाक्य-जनितमहं ब्रह्मेति विज्ञानं संसर्गात्मकत्वा*दात्मवस्तु-याथात्म्यावगाह्येव न भवति किं तर्ह्येतदेव गङ्गास्रोतो-वत्सततमभ्यस्यतो ऽन्यदेवावाक्यार्थात्मकं विज्ञानान्तर-मुत्पद्यते तदेवाशेषाज्ञानतिमिरोत्सारीति, “विज्ञा-य प्रज्ञां कुर्वीते”ति श्रुतेः । इत्यस्य पक्षस्य निवृत्तये इदमभिधीयते—

सकृत्प्रवृत्त्या मृद्नाति
क्रिया कारकरूपवत् ।
अज्ञानमागमज्ञानं†
सांगत्यं‡ नास्त्यतो ऽनयोः ॥ ६७ ॥

धयेदिति यावदिति पूर्ववादिनो ऽभिप्रेता व्याख्या । सकृत्प्रवृत्त्येति ॥ भवदभिमताया भावनायाश्चित्तैकाग्र्यहेतुतया संभावनाविपरीत-भावनात्मकविक्षेपलक्षणप्रतिबन्धनिरासेन ज्ञानोत्पत्तावेवोपक्षीण-त्वादुत्पन्नमात्रमागमिकं ज्ञानं सकार्यमज्ञानं तदैव निवर्तयतीति न ज्ञानकर्मणोः समुच्चयावसर इति भावः । विज्ञाय प्रज्ञां कुर्वीत, वेदान्तवाक्यप्रतिपाद्यं ब्रह्मेति विज्ञाय प्रज्ञा,मपरोक्षब्रह्मविज्ञानम-संभावनाविपरीतभावनानिराकरणमुखेन वाक्यादेव कुर्यात् । तत्र विघ्नसंभवात्तत्साधनं मननादिकमसंभावनाविपरीतभावनानिराक-

---

* प्रकारताविशेष्यतावगाहित्वादित्यर्थः ॥

† आगमज्ञानं, वेदान्तवाक्यजन्यं ज्ञानमित्यर्थः ॥

‡ सांगत्यं, सामानाधिकरण्यं, समुच्चय इति यावत् ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

एवं तावद्‌नानात्वे ब्रह्मणि ज्ञानकर्मणोः समुच्चयो निराकृतः। अथाधुना पक्षान्तराभ्युपगमेनापि प्रत्यवस्थाने पूर्ववद्‌नाश्वासो यथा तथा ऽभिधीयते—

अनुत्सारितनानात्वं
ब्रह्म यस्यापि वादिनः।
तन्मतेनापि दुःसाध्यो
ज्ञानकर्मसमुच्चयः॥ ६८॥

तस्य विभागोक्तिर्दूषणविभागसम्पत्तये*—

ब्रह्मात्मा वा भवेत्तस्य
यदि वा ऽनात्मरूपकम्।
आत्मनाग्निर्भवेन्मोहा-
दितरस्याप्यनात्मनः॥ ६९॥

रणकारणं दीर्घेण कालेन निराकरणं† कुर्यादित्यर्थः॥ ६७॥

नानात्वशून्यमद्वयं ब्रह्मेत्यभ्युपगम्य तज्ज्ञानस्य कर्मणा समुच्चयो निराकृतः, संप्रति द्वैताद्वैतं ब्रह्मेत्युपगमे ऽपि न समुच्चय इत्याह एवं तावदिति॥ अनुत्सारितेति॥ सामान्यविशेषात्मना भिन्नाभिन्नं ब्रह्मेति यस्य मतं तन्मते ऽपि दुःसंपादः समुच्चय इत्यर्थः॥ ६८॥

भेदाभेदपक्षे जीवपरमात्मनोः संसारदशायामप्यभेदं के चिदिच्छन्ति, के चित्तु संसारदशायां भेद एव मुक्तिदशायामेवाभेद इति मन्यन्ते, तेन मतद्वयसंभवाद्विकल्प्यतइत्याह तस्य विभागोक्तिरिति॥ विभागोक्ति,र्विकल्पोक्तिः। क्रियतइति शेषः। तत्राद्यं दू-

---

* विभागज्ञप्तये, इति १ पु० पाठः॥

† विपरीतभावनानिराकरणं कुर्यादिति २ पु० पाठः॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

तत्र यदि तावद्वास्तवेनैव वृत्तेन ब्रह्म प्राप्तमात्मस्वा-
भाव्यात्केवलमासुरमोहपिधानमात्रमेवाऽनाप्तिनिमि-
त्तं, तस्मिन्पक्षे—

मोहापिधानभङ्गाय
नैव कर्माणि कारणम् ।
ज्ञानेनैव फलावाप्ति-
स्तत्र कर्म निरर्थकम् ॥ ७० ॥

अनात्मस्वरूपके तु ब्रह्मणि* न कर्म साधनभावं प्रतिपद्यते† नापि ज्ञानं कर्मसमुच्चितमसमुच्चितं वा, य-

---

षयति आत्मानाप्तिरिति ॥ ब्रह्मणः प्रत्यगात्मरूपत्वाङ्गीकारे ब्रह्मानाप्तिर्मोहमात्रादेव भवेत्, आत्मत्वादेव नित्यप्राप्तत्वात् मोहनिवर्तकं च ज्ञानमेवेति कर्मणो वैयर्थ्यमित्यर्थः । द्वितीयं दूषयति इतरस्येति ॥ इतरस्य स्वत एव व्यतिरिक्तस्य ब्रह्मणोऽनात्मत्वादनाप्तिरेव न तु कदाचिदप्याप्तिः स्यात्तत्र किं कर्मणा ज्ञानेन वेत्यर्थः ॥ ६९ ॥

प्रथमविकल्पेऽ दूषणमेव स्पष्टयति तत्र यदीति ॥ असुरसंबन्धी मोह आसुरः । मोहापिधानेति ॥ ब्रह्मप्राप्त्यन्तरायभूतमोहनिवर्तकं

---

* आत्मत्वासिद्धाविति शेषः ॥

† यथा तावदनश्वोऽश्वः कर्तुं कथमपि न शक्यते तथैवाऽनात्मरूपे ब्रह्मण्यात्मरूपत्वं साधयितुं न शक्यते कर्मणेत्यर्थः । आत्मशब्देन जीवो विवक्षितः ॥

‡ कर्मणां ब्रह्मप्राप्तिप्रतिबन्धकीभूततमोनिवर्तकत्वपक्षे इत्यर्थः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

स्मादन्यस्य स्वत एव साधकस्य ब्रह्मणो ऽप्यन्यत्वं स्वत एव सिद्धम् । तत्रैवम्—

अन्यस्यान्यात्मताप्राप्तौ
न क्कचिद्धेतुसंभवः ।
तस्मिन्सत्यपि ना ऽनष्टः
परात्मानं प्रपद्यते ॥ ७१ ॥

अपरस्मिंस्तु पक्षे विधिः—

ब्रह्मज्ञानमेव न कर्म, तत्र कर्मोपादानं निरर्थकमित्यर्थः* ॥ ७० ॥

द्वितीयविकल्पे दूषणं स्पष्टयति अनात्मरूपके त्विति ॥ कुतः समुच्चितमसमुच्चितं वा न साधनभावं प्रतिपद्यतइत्यत आह यस्माद्न्यस्येति ॥ ब्रह्मप्राप्तिसाधकस्य स्वत एव ब्रह्मणः सकाशादन्यस्य ब्रह्मणः प्राप्त्ययोगात्तत्प्राप्तये साधनोपादानायोगादित्यर्थः । यस्मादन्यत्वमिति पाठे सुकरैव योजना । साधकस्यान्यत्वे ऽपि ब्रह्मणस्तदनन्यत्वात्तत्प्राप्तिसंभवात्साधनोपादानमित्यत आह ब्रह्मणो ऽपीति ॥ स्वतो ऽप्यन्यत्वे ऽप्यनन्यत्वसिद्धये साधनोपादानमित्यत आह तत्रैवमिति ॥ ननु कथं हेत्वसंभवः, ज्ञानं कर्म च हेतुरस्तीत्यत आह तस्मिन् सत्यपीति ॥ अन्यस्मिन् स्थिते स्वभावविरोधादेव नान्यात्मताप्राप्तिः, नष्टे ऽपि तस्याभावादेव नान्यस्यान्यात्मताप्राप्तिरित्यर्थः ॥ ७१ ॥

अस्तु तर्ह्यात्मानात्मद्वयरूपं ब्रह्म संसारदशायामपीत्याशङ्क्याह अपरस्मिंस्त्विति ॥ तस्मिन्नपि पक्षे "देवो भूत्वा देवानप्येती"ति न्या-

---

* कर्मणो ऽज्ञानमुपजीव्य प्रवृत्तत्वात्तन्निवर्तकत्वं न संभवतीत्यज्ञानविरोधिनो ज्ञानस्यैव तन्निवर्तकत्वं सिध्यतीति भावः ॥

DR.RUPAK NATH (DR.RUPNATHJI)
www.astrology-tantra.com

परमात्मानुकूलेन
ज्ञानाभ्यासेन* दुःखिनः ।
द्वैतिनो ऽपि विमुच्येरं†-
न्न परात्मविरोधिना ॥ ७२ ॥

इतरस्मिंस्तु पक्षे विधेरेवानवकाशत्वं, कथम्—

समस्तव्यस्तभूतस्य‡
ब्रह्मण्येवावतिष्ठतः ।
ब्रूत कर्मणि को हेतुः
सर्वानन्यत्वदर्शिनः§ ॥ ७३ ॥

येनाहं ब्रह्मास्मीत्युपासनयैव तस्मात्तेषां विधिरेव कथं चिदभ्युपगन्तव्यो, न कर्मविधिः, तस्य केवलभेदाश्रयत्वेन स्वाभ्युपगतब्रह्मस्वरूपविरोधित्वादित्यर्थः । यद्वा परस्य वादिनो ऽभिमतो य आत्मा द्वैताद्वैतरूपस्तद्विरोधिना केवलाद्वैतज्ञानेन न मुच्येरन् किं त्वहं ब्रह्मास्मीत्युपासनयैवेत्यर्थः ॥ ७२ ॥

अस्तु तर्हि प्रस्तुतदोषपरिहाराय केवलाभेद एवानेकरसेन ब्रह्मणेत्याशङ्क्य तत्पक्षे ज्ञानविधिः कर्मविधिश्च न संभवतीत्याह इतरस्मिंस्त्विति ॥ कर्मणि को हेतुरिति ॥ उपासनाख्ये मानसे बाह्ये च कर्मणि को हेतुर्न कश्चिद् निरस्ताशेषाधिकारब्रह्मभूतत्वादस्ये-

---

* परमात्मैकरसतापरया सविकल्पकवृत्तिरूपज्ञानाभ्यासेनेत्यर्थः ।

† प्रमुच्येरन्निति का० सं० पुस्तके ४ पु० च पाठः ॥

‡ समस्तेभ्यः कर्माधिकृतेभ्यो व्यस्तभूतस्य पृथग्भूतस्य, निवृत्ताखिलाधिकारत्वादित्यर्थः ॥

§ घटादिबुद्धिनिवृत्त्या मृत्तिकामात्रबुद्धिवद् निखिलप्रपञ्चबुद्धिनिवृत्त्या ब्रह्ममात्राकाराकारितान्तःकरणस्येत्यर्थः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सर्वकर्मनिमित्तसंभवासंभवाभ्यां सर्वकर्मसंकरश्च प्रा-

त्यर्थः। केचित्त्वपरस्मिंस्तु पक्षे विधिरित्यनात्मभूतमेव ब्रह्मेत्यस्मिन् पक्षे ज्ञानविषयो विधिः संभवति विहितः प्रवृत्तिरपि संभाव्यते प्रमाणवस्तुपरतन्त्रतत्त्वज्ञानादन्यस्योपासनाज्ञानस्य क्रियारूपत्वाभावादिति भेदपक्ष एव वर्ण्यते इति व्याचक्षते। नन्वस्तु विधिर्विधिप्रयुक्ता वा विधेयार्थविषया प्रवृत्तिरपि भवतु किं ततो भवतीत्यपेक्षायामिदं भवतीत्याह परमात्मानुकूलेनेति॥ उपासनाफलरूपा या मुक्तिः सा तेषां स्याद् न तु वाक्यार्थरूपतत्त्वज्ञानफलभूता मुक्तिः संभवतीत्यर्थः। इदानीमक्षरयोजना क्रियते। जीवे ब्रह्मदृष्टिप्रक्षेपेण यदुपासनं तदिह परमात्मानुकूलं ज्ञानं तेन ज्ञानाभ्यासेन गङ्गास्रोतोवत् सततमहं ब्रह्मास्म्यहं ब्रह्मास्मीति विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहीकरणेन दुःखिनो द्वैतिनोऽपि प्रमुच्येरन् न परात्मविरोधिना जीवपरमात्मनोर्भेदसंसर्गपरित्यागपूर्वकमहमस्मि परं ब्रह्मेति वाक्यार्थविज्ञानेन मुच्येरन्निति संबन्धः। जीवाद्भिन्नः परमात्मा। इदं च ज्ञानमभेदावगाहित्वेन वस्तुविपरीतग्राहकत्वात्परात्मविरोधीत्युच्यते इति द्रष्टव्यम्। इतरस्मिंस्तु पक्षे विधेरेवानवकाशत्वमिति॥ प्रत्यग्भूतमेव जीवात्मनः परमात्मतत्त्वमित्यस्मिन् पक्षे इत्यभेदपक्ष एवोच्यते इति व्याचक्षते। तत्तथैवाभ्युपगम्यते। अपरस्मिंस्त्विति भेदपक्ष एव वर्ण्यते इत्येतन्न मृष्यामहे, कस्मात्तस्यानात्मरूपके तु ब्रह्मणीत्यादिना अनन्तरमेव निरस्तस्य पुनरनुवृत्तौ तुशब्देन व्यावर्तनायोगात्पूर्वोक्तमेव ग्राह्यमिति॥ ७३॥

केवलाभेद एवानेकरसे ब्रह्मणीत्यस्मिन् पक्षे दोषान्तरमाह

DR.RUPAK NATH (DR.RUPNATHJI)
www.astrology-tantra.com

मोति, यस्मात्—

सर्वजात्यादिमत्त्वे ऽस्य
नितरां ह्वेत्वसंभवः ।
विशेषं* ह्यनुपादाय
कर्म नैव प्रवर्तते ॥ ७४ ॥

स्वादिविधिरध्यात्माभिमानादिति चेन्नैवं, यस्मात्—

सर्वकर्मनिमित्तेति ॥ यस्य खलु जीवाः परमात्मनो भिद्यन्ते तस्य पक्षे ब्राह्मणो बृहस्पतिसवेन, राजा राजसूयेन, वैश्यो वैश्यस्तोमेन यजेतेत्यादिशास्त्रव्यवस्थोपपद्यते । यस्य तु पक्षे जीवाः परमात्मनो न भिद्यन्ते अभिन्ना एव तस्य तु पक्षे जीवानां सर्वात्मकब्रह्मणैकत्वेन सर्वात्मकत्वाद्ब्राह्मणस्य क्षत्रियादिकत्वं ब्राह्मणत्वं च भवति, एवं क्षत्रियादेरपि ब्राह्मणत्वं क्षत्रियादिकत्वं च भवति, ततश्च सर्वेषां सर्वजातिसमवायात्सर्वकर्मसंकरः प्रसज्येतेत्यर्थः । सर्वजात्यादिमत्त्वइति ॥ अस्य विदुषो जीवस्य सर्वजात्यादिमत्त्वे प्रतिनियतकर्मसु प्रवृत्तिहेतुर्न संभवति । ब्राह्मणत्वादिविशेषमुपादाय हि प्रतिनियतकर्मसु प्रवर्तते विशेषश्च सर्वात्मब्रह्माभिन्नत्वेन सर्वजातिमत्त्वान्नास्तीत्यर्थः ॥ ७४ ॥

ननु यद्यपि जीवस्य ब्रह्मणा सर्वात्मकेनाऽभेदो ऽस्ति तथापि ब्राह्मणो ऽहं क्षत्रियो ऽहमिति जात्यादिसमवायिस्थूलदेहाभिमाननिमित्तो भेदो ऽपि संभवति ततश्चाधिकारिव्यवस्थया कर्मव्यवस्था घटिष्यति शङ्कते† स्वादिविधिरिति ॥ परिहरति नैवं यस्मा-

---

* विशेषम्=अधिकारिविशेषम् ॥

† समुच्चयवादीति शेषः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

न चाध्यात्माभिमानो ऽपि
विदुषो ऽस्त्यासुरत्वतः ।
विदुषो ऽप्यासुरश्चेत्स्या-
न्निष्फलं ब्रह्मदर्शनम् ॥ ७५ ॥

अज्ञानकार्यत्वाच्च न समकालं नापि क्रमेण ज्ञानकर्मणोर्विरुद्धवस्तुतन्त्रत्वात्संगतिरस्तीत्येवं निराकृतो ऽपि कामं कृशं वा ऽवलम्ब्याह—

अथाध्यात्मं पुनर्याया-
दाश्रितो मूढतां भवेत्* ।

इति ॥ विदुषस्तत्त्वविदो ऽध्यात्माभिमानः शरीराद्यभिमानो नास्ति तस्याऽऽसुरमोहनिमित्तत्वेन तत्त्वज्ञानादेव निवृत्तेः । देहाद्यभिमाननिवृत्तौ चाधिकारव्यवस्था दूरापास्ता स्यादित्यर्थः । तर्हि देहाद्यभिमानसिद्धये ज्ञानिनो ऽपि मोहो ऽभ्युपगम्यतइत्यत आह विदुषो ऽपीति ॥ ब्रह्मज्ञानस्याज्ञानाऽनिवर्तकत्वे तस्य निष्फलत्वं प्रसज्येत, ततश्च विदुषो नास्त्येव मोह इत्यभ्युपगन्तव्यमित्यर्थः ॥ ७५ ॥

वृत्तानुद्रवपूर्वकमुत्तरश्लोकस्य संगतिमाह अज्ञानकार्यत्वादिति ॥ अज्ञानकार्यत्वे ऽपि वस्तुपरतन्त्रस्य ज्ञानस्यावस्तुपरतन्त्रस्य च कर्मणः समकालं क्रमेण वा संगतिर्न संभवतीत्येवमधस्तनश्लोकेन निराकृतमपि विदुषो ऽनुभवसिद्धस्य देहाद्यभिमानस्य युक्त्या निराकरणमयुक्तमित्येतदालम्ब्य पुनः प्रत्यवतिष्ठते इत्यर्थः । अ-

* मूढतामाश्रितो भवेदिति योजना ॥

† ज्ञानकर्मणोरुभयोरप्यज्ञानकार्यत्वे समाने ऽपि सदसद्विषयत्वेन विरोधात् समप्रधानतया ऽङ्गाङ्गिभावेन वा समुच्चयो न संघटतइत्यर्थः ॥

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

स करोत्येव कर्माणि
को ह्यज्ञं विनिवारयेत् ॥ ७६ ॥

सिद्धत्वाच्च न साध्यं, यतः—

सामान्येतररूपाभ्यां
कर्मात्मैवास्य योगिनः ।
निःश्वासोच्छ्वासवत्तस्मा-
न्न नियोगमपेक्षते ॥ ७७ ॥

थाध्यात्ममिति ॥ अवगतपरमार्थतत्त्वो ऽपि पुनः कार्यकारणसंघाते ऽहमभिमानवान्भवतीत्यर्थः । परि[illegible]ति आश्रित इति ॥ एवं चेन्नासौ विदितपरमार्थतत्त्वः किं त्वज्ञ एव, विपरीतदर्शनवत्त्वात् । न वयमज्ञस्य कर्मसंबन्धं वारयामः किं तु ज्ञानिन एव, त्वया ऽपि न ज्ञानिनः संबन्धः प्रतिपादितः । ततश्च नास्माकं क्षतिरित्यर्थः॥ ७६ ॥

विदुषः कर्मासंभवे हेत्वन्तरमाह सिद्धत्वाच्चेति ॥ विदुषः स्वरूपतया नित्यसिद्धत्वाच्च कर्मणो न नियोग*साध्यत्वमित्यर्थः । कथं स्वरूपतया सिद्धिरित्यत आह यतः सामान्येति ॥ सर्वं वस्तु सामान्यविशेषयोरन्तर्भूतं, ततश्च कर्मणो ऽपि सामान्यान्तःपातित्वं विशेषान्तःपातित्वं वा स्यात्, सामान्यविशेषयोश्च ब्रह्मस्वरूपत्वात्तदात्मकत्वाच्च विदुषः कर्मापि तस्य स्वरूपमेव, ततश्चासाध्यत्वादेव न नियोगविषयत्वं तदनुष्ठानं दूरत एव, समुच्चयस्तु ततो ऽपि दूरत एव, तस्मादनैकान्तिकपक्षे दुरुपपादः समुच्चय इत्यर्थः ॥ ७७ ॥

एवमभेदपक्षे निराकृते पुनर्भेदाभेदपक्षमुत्थापयति तस्य स्वरू-

---

* नियोगो, विधिः ॥

अस्तु तर्हि भिन्नाभिन्नात्मकं ब्रह्म, तथा च सति ज्ञानकर्मणी संभवतो भेदाभेदविषयत्वात्तयोः । तत्र तावदयं पक्ष एव न संभवति। किं कारणं, न हि भिन्नो ऽयमित्यभेदबुद्धिमनिराकृत्य भेदबुद्धिः पदार्थमालिङ्गते*। एवं ह्यनभ्युपगमे भिन्नाभिन्नपदार्थयोरलौकिकत्वं

पेणैवासंभवं दर्शयितुम्, अस्तु तर्हि भिन्नाभिन्नात्मकमिति ॥ उक्तेऽर्थे कर्मज्ञानकाण्डयोः प्रामाण्यानुपपत्तिः प्रमाणमित्याह तथा च सतीति ॥ अभेदं विना ब्रह्माहमस्मीति ज्ञानानुपपत्तेर्भेदं विना चानेककारकसाध्यकर्मानुपपत्तेश्च भिन्नाभिन्नात्मकं ब्रह्मेत्यर्थः । तिष्ठतु तावद्ब्रह्मणो भिन्नाभिन्नत्वं लोके ऽप्ययं पक्षो न संभवतीत्याह तत्र तावदिति ॥ ननु सन् घटः शुक्लः पटो मृच्छरावो दण्डी देवदत्त इत्यादौ सामान्यविशेषद्रव्यगुणादीनां सामानाधिकरण्यमत्यन्तमभेदे भेदे च घटो ऽश्वो महिष इत्यादावदर्शनादनुपपद्यमानं भिन्नाभिन्नत्वं कल्पयतीति शङ्कते किं कारणमिति ॥ तर्हि वक्तव्यमभेद इत्यत्र किं भेदाभावः किं वा भेदविरोधी किं वा भेदादन्यो ऽभिधीयतइति । न तावदाद्यौ, तथा सति भेदाभेदयोरेकत्र युगपत्समावेशासंभवात् । नापि तृतीयः, रूपरसादीनामपि भेदादन्यत्वेनाभेदत्वप्रसङ्गात् । एवंविधभेदाभेदयोरभ्युपगमे चालौकिकत्वप्रसङ्गात् । सामानाधिकरण्यप्रत्ययस्य कल्पितभेदेनापि सो ऽयं देवदत्तः खं छिद्रमित्यादाविव संभवादित्यभिप्रेत्योपसंहरति न हि भिन्नो ऽयमिति ॥ भेदबुद्धिरभेदबुद्धिमनिराकृत्य न हि पदार्थमालिङ्गत इत्यर्थः । अस्तु यथा तथा लोके, ब्रह्मणि पुनर्भिन्नाभिन्नत्वं

---

* आलिङ्गते=विषयीकरोति ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

प्रसज्येत । अथ निष्प्रमाणकमप्याश्रीयते, तदप्युभयपक्षाभ्युपगमादभेदपक्षे दुःखि ब्रह्म स्यादत आह—

भिन्नाभिन्नं विशेषैश्चे-
द्दुःखि स्याद्ब्रह्म ते ध्रुवम् ।
अशेषदुःखिता चेत्स्या-
दहो प्रज्ञा ऽऽत्मवादिनाम् ॥ ७८ ॥

तस्मात्सम्यगेवाभिहितं न ज्ञानकर्मणोः समुच्चय इत्युपसंह्रियते—

तमोऽङ्गत्वं यथा भानो-
रग्नेः शीताङ्गता यथा ।
वारिणश्चोष्णता यद्व-
ज्ज्ञानस्यैवं क्रियाङ्गता ॥ ७९ ॥

सर्वथैवानुपपन्नमित्याह अथ निष्प्रमाणकमपीत्यादिना ॥ "भिन्नाभिन्नं विशेषैश्चे"दित्यत्र सामान्येन चेति पदद्वयमध्याहर्तव्यम् । न केवलं दुःखित्वमात्रं किं तु सर्वजीवाभेदात्तद्गतमखिलमपि दुःखित्वं ब्रह्मगतमेवेति तत्प्राप्तिरनर्थायैव स्यादिति सोपहासमाह अशेषेति ॥ स्वाश्रितदुःखानुभव एव जीवानाम्, ब्रह्मणस्त्वशेषजीवाश्रितदुःखानुभवप्रसङ्गान्महत्तरः संसारः स्यात्ततश्च संसारिभ्यो ऽपि हीनं ब्रह्म भवेत् । अहो माहात्म्यं प्रज्ञाया नमो ऽस्तु ब्रह्मवादिभ्यः चरणकाशिष्येभ्य इत्यर्थः ॥ ७८ ॥

तमोऽङ्गत्वमिति ॥ ज्ञानस्य कर्माङ्गत्वाभावे कर्मणश्च ज्ञानाङ्गत्वाभावे समसमुच्चयाभावे च दृष्टान्तत्रयमिति द्रष्टव्यम् । क्रियाङ्गते-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

यथोक्तोपपत्तिबलेनैव पूर्वपक्षस्योत्सारितत्वाद्वक्तव्यं नावशेषितमित्यतः प्रतिपत्तिकर्मवत्पूर्वपक्षपरिहाराय यत्किंचिद्वक्तव्यमित्यत इदमभिधीयते—

सुक्तेः क्रियाभिः सिद्धत्वा-
दित्या*द्यनुचितं वचः ।
यद्भाषि तदन्याय्यं
यथा तदधुनोच्यते ॥ ८० ॥

यो ऽयं काम्यानां प्रतिषिद्धानां च त्यागः प्रतिज्ञायते सा प्रतिज्ञा तावन्न शक्यते ऽनुष्ठातुं, किं कार-

---

त्यत्र क्रियां प्रत्यङ्गता क्रिया अङ्गमस्येत्युभयथा द्रष्टव्यम् ॥ ७९ ॥

केवलकर्मणां ज्ञानसमुच्चितानां वा मोक्षसाधनत्वस्य निराकरणाद् ज्ञानस्यैव मोक्षसाधनत्वं सिद्धं, तत्र किमुत्तरग्रन्थसंदर्भेणेत्याशङ्क्य प्रमेयस्योपपादितत्वे ऽपि तदुक्तीनामनिराकरणे तत्पक्षो न निराकृत इति मन्दमतीनां शङ्का स्यात्तन्निवृत्तये तत्तदुक्तीनां क्रमेण खण्डनायोत्तरग्रन्थ इत्याह यथोक्तेति ॥ अतः प्रतिपत्तिकर्मवदिति ॥ उपयुक्तस्य द्रव्यस्यैव स्वयमेव परित्यागे ऽप्राप्ते चात्वाले कृष्णविषाणमुत्सृजेदिति नियमवर्†न्निराकृते ऽपि पूर्वपक्षे तदुक्तिनिरासायायं प्रयत्न इत्यर्थः ॥ ८० ॥

तत्र "कुर्वतः क्रियाः काम्या निषिद्धास्त्यजतस्तथे"‡ति यदुक्तं तत्तावन्निरस्यति योयमिति ॥ तत्र किमनुष्ठितानां परित्यागः किं वा

---

* नै० अ० १ श्लो० २, अतः कर्माणि संश्रयेदित्यन्तामित्यर्थः ॥

† दीक्षितेन कण्डूयनार्थं धृतं कृष्णमृगविषाणं चात्वाले प्रक्षिप्यतइति प्रतिपत्तिः ॥

‡ नै० अ० १ श्लो० १० ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

णम् । कर्मणो हि निर्वृत्तात्मनो द्वाभ्यां प्रकाराभ्यां निवृत्तिः संभवति । आरब्धफलस्योपभोगेनानारब्ध-फलस्याशुभस्य प्रायश्चित्तैरिति । तृतीयो ऽपि त्या-गप्रकारो ऽकर्त्रात्मावबोधात्, स त्वात्मज्ञानस्यानभ्यु-पगमाद्भवता नाभ्युपगम्यते तत्र यान्यनुपभुक्तफलान्य-नारब्धफलानि तानीश्वरेणापि केन चिदपि न शक्य-न्ते परित्यक्तुम् । अथाऽऽरब्धफलानि त्यज्यन्ते, तान्य-पि न शक्यन्ते त्यक्तुम् । किं कारणम् । अनिवृ-त्तेः । अनिर्वृत्तं हि चिकीर्षितं कर्म शक्यते त्य-क्तुं, प्रवृत्तिनिवृत्तौ प्रति कर्तुः स्वातन्त्र्यात् । निर्वृ-

---

तदनुष्ठानस्येति विकल्प्य नाद्य इत्याह कर्मणो हीति ॥ निर्वृ-त्तात्मनो, निष्पन्नस्वरूपस्य । ननु "क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावर" इति ज्ञानादपि सर्वकर्मनिवृत्तिः श्रूयते तत्र कथं द्वाभ्यां प्रकाराभ्यामित्युच्यते इत्यत आह तृतीयो ऽपीति ॥ भवता तादृ-शज्ञानानङ्गीकारात्तेन निवृत्तिर्नाभ्युपगम्यतइति प्रकारद्वैविध्यं द-र्शितमित्यर्थः । अस्तु द्वाभ्यां प्रकाराभ्यां निवृत्तिस्ततः किमित्यत आह तत्र यानीति ॥ तान्येव विशिनष्टि अनारब्धेति ॥ अना-रब्धानां कर्मणामनुपस्थितत्वादेव निवर्तनायोगादित्यर्थः । तर्ह्या-रब्धफलानि त्यज्यन्तामित्याशङ्क्य परिहरति अथेत्यादिना ॥ अ-निवृत्तेरित्युपभोगप्रायश्चित्ताभ्यां विना निष्पन्नस्यानिवृत्तेरित्यर्थः । एतदेव व्यतिरेकमुखेनोपपादयति ॥ अनिर्वृत्तं हीति । तदसंभवात्,

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

त्ते तु कर्मणि तदसंभवात्* दुरनुष्ठेयः प्रतिज्ञातार्थः। अशक्यप्रतिज्ञानाच्च। न शक्यते प्रतिज्ञातुं यावज्जीवं काम्यानि प्रतिषिद्धानि च कर्माणि न करिष्यामीति, सुनिपुणानामप्यपराधदर्शनात्प्रमाणाभावाच्च। न च प्रमाणमस्ति मोक्षकामो नित्यनैमित्तिके कर्मणी कुर्यात्काम्यप्रतिषिद्धे च वर्जयेदारब्धफले चोपभोगेन क्षपयेदिति। आनन्त्याच्च। न चोपचितानां कर्मणामियत्ता ऽस्ति, संसारस्यानादित्वात्। न च काम्यैः प्रतिषिद्धैर्वा तेषां निवृत्तिरस्ति, शुद्ध्यशुद्धिसाम्ये सत्यविरोधा† दित्यत आह—

न कृत्स्नकाम्यसंत्यागो
ऽनन्तत्वात्कर्तुमिष्यते‡।

स्यानन्यथासंभवात्। अननुष्ठानस्यैव परित्याग इति द्वितीयं पक्षं प्रत्याह अशक्यप्रतिज्ञानाच्चेति॥ किमिति न शक्यतइत्यत आह सुनिपुणानामिति॥ पुनरप्यनुष्ठितानां परित्यागपक्षं दूषयति आनन्त्याच्चेति॥ तदेव प्रपञ्चयति न चेति॥ नन्वस्त्रमस्त्रेण शाम्यतीति न्यायेन काम्यैः काम्यानां, निषिद्धैर्निषिद्धानां निवृत्तिरस्त्वित्यत आ-

---

* कृतः संस्कारो न निवर्ततइति न्यायेन निर्वृत्तस्य कर्मणस्त्यागासंभवादित्यर्थः॥

† निवर्त्यनिवर्तकभावो हि विरोधे भवति, विरोधश्च फलविरोधप्रयुक्तः, एवं च प्रकृते सर्वेषां काम्यानां शुद्धिरूपैकफलजनकत्वेन, निषिद्धानां चाशुद्धिरूपैकफलजनकत्वेन विरोधाभावान्न स इति भावः॥

‡ इष्यते = शक्यते॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

निषिद्धकर्मणश्चेत्तु
व्यतीतानन्तजन्मसु ॥ ८१ ॥
स्यान्मतं व्यतीतानन्तजन्मोपात्तानां कर्मणां—
क्षयो नित्येन तेषां चेत्
प्रायश्चित्तैर्यथैनसः ।
निष्फलत्वान्न नित्येन
काम्यादेर्विनिवारणम् ॥ ८२ ॥
प्रमाणाभावाच्च, कथम्—

ह न च काम्यैरिति ॥ उपपादिते ऽर्थे श्लोकमवतारयति आहेति ॥ यद्यपि कामशब्देन सह समस्तत्वात्कृत्स्नसंत्यागशब्दयोः पदान्तरेण सह संबन्धुमयोग्यत्वं तथापि निषिद्धकर्मण इत्यनेन कृत्स्नसंत्यागशब्दौ संभवात्संबध्येते । व्यतीतानन्तजन्मसु कृतस्यानुष्ठितस्य निषिद्धकर्मणश्च कृत्स्नस्यापि संत्यागो नेष्यते, अनन्तत्वादेवेत्यर्थः ॥ ८१ ॥

अस्तु तर्हि तेषां नित्यकर्मणा निवृत्तिरिति शङ्कते स्यान्मतमिति ॥ यथैव प्रतिषिद्धस्य कर्मणः प्रायश्चित्तैः क्षयो भवति एवं व्यतीतानन्तजन्मोपार्जितानां काम्यानां प्रतिषिद्धानां च कर्मणां नित्यकर्मभिः प्रक्षयो भविष्यतीत्यर्थः । परिहरति निष्फलत्वादिति ॥ नित्यानां कर्मणां निष्फलत्वात् काम्यप्रतिषिद्धलक्षणकर्मक्षयः फलं न भवति तेषामित्यर्थः ॥ ८२ ॥

उपात्तदुरितक्षयार्थानि नित्यानीति भट्टादिभिरभ्युपगमान्नित्यानां निष्फलत्वमसिद्धमित्याशङ्क्य तथापि काम्यकर्मनिवृत्तिस्ततो भवतीत्यत्र प्रमाणं न पश्याम इत्याह प्रमाणाभावाच्चेति ॥ पापापनुत्त्यर्थमिति ॥ यथा प्रायश्चित्तं पापक्षयनिमित्तमित्यत्र शास्त्रं प्रमा-

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

पापापनुत्तये वाक्या-
त्प्रायश्चित्तं यथा तथा ।
गम्यते काम्यहानार्थं
नित्यं कर्म न वाक्यतः ॥ ८३ ॥

अथापि स्यात्काम्यैरेव काम्यानां पूर्वजन्मोपचितानां क्षयो भविष्यतीति, तन्न । यतः—

पाप्मनां पाप्मभिर्नास्ति
यथैवेह निराक्रिया ।
काम्यैरपि तथैवास्तु
काम्यानामविरोधतः ॥ ८४ ॥

एवं तावत् "मुमुक्षोः क्रियमाणैः सिद्धत्वा*" दिति निराकृतम् । अथात्मज्ञानस्य सद्भावे प्रमाणाऽसंभव उक्तस्तत्परिहारायाह—

श्रुतयः स्मृतिभिः साक-
मानन्त्यात्कामिनामिह ।

णं नैवं काम्यप्रतिषिद्धकर्मक्षयफलत्वे नित्यानां कर्मणां शास्त्रं किंचित्प्रमाणमस्तीत्यर्थः ॥ ८३ ॥

अस्तु तर्हि काम्यैरेव काम्यानां निवृत्तिरित्याशङ्क्य श्लोकेन परिहरति अथापि स्यादित्यादिना ॥ ८४ ॥

यदुक्तं "यावन्त्यश्चेह विद्यन्ते"† इति तत्परिहारायोत्तरश्लोक इति

---

* नै० अ० १ श्लो० ९ ॥
† नै० अ० १ श्लो० १४ ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

विदधत्युरुयत्नेन
कर्मातो बहु कामदम् ॥ ८५ ॥

न च बाहुल्यं प्रामाण्ये कारणभावं प्रतिपद्यते, अत आह—

प्रामाण्याय न बाहुल्यं
न ह्येकत्र प्रमाणताम् ।
वस्तुन्यटन्ति मानानि
त्वेकत्रैकस्य मानता* ॥ ८६ ॥

वृत्तं कीर्तयन्नाह एवं तावदिति ॥ उभय इति ॥ काम्यमानविविधफलसाधनत्वमेव तत्र कर्मणां दर्शितं न पुनरात्मज्ञानाभावस्तस्य मोक्षसाधनत्वाभावो वा तत्र तत्र प्रदर्श्यते । तस्माद्यथावस्थितवस्तुविषयज्ञानप्रतिपादकप्रमाणाभावो नास्तीत्यर्थः† ॥ ८५ ॥

ननु कर्मप्रतिपादकवेदवाक्यानां बहुलत्वाद् आत्मप्रतिपादकानां चाल्पत्वात्कर्मण्येव तात्पर्यमित्यत आह न च बाहुल्यमिति ॥ प्रमाणानां स्वतः प्रमाणत्वेन स्वविषयसाधने प्रमाणान्तरानपेक्षत्वात्संवादात्प्रामाण्यमित्यनङ्गीकारात्कर्मकाण्डे ऽप्येकैकस्मिन्कर्मण्येकैकस्य वाक्यस्य प्रमाणत्वात्कर्मणां बहुत्वेन तत्र वाक्यबाहुल्यसं-

---

* मानानि एकस्मिन् वस्तुनि प्रमाणतां नाटन्ति, न प्राप्नुवन्ति, एकत्रैकस्यैव मानता इति योजना ॥

† दुःखनिवृत्तेः स्वत एवेप्सिततमत्वाल्लाघवाच्च तत्रैव सर्वेषां वाक्यानां तात्पर्यम्, तरति शोकमात्मविदिति सिद्धस्य दुःखनिवृत्तिरूपमुख्यफलकात्मज्ञानस्य यथार्थवस्तुविषयत्वेन तद्बोधकवेदान्तवाक्यानां प्रामाण्यमिति कथं प्रमाणाभाव इति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

यत्तूक्तं यत्नतो वीक्षमाणो ऽपी*ति, तत्रापि भवत एवापराधः, कस्मात्, यतः—

परीक्ष्य लोकानित्याद्या
आत्मज्ञानविधायिनीः।
नैष्कर्म्यप्रवणाः साध्वीः
श्रुतीः किं न शृणोषि ताः† ॥ ८७ ॥

नन्वा"त्मेत्येवोपासीत, आत्मा वा अरे द्रष्टव्य"इत्यपूर्वविधिश्रुतेः पुरुषस्यात्मदर्शनक्रियायां नियोगोऽव-

भवात्। आत्मनः पुनरेकरूपत्वात्प्रतिपादकवाक्यबाहुल्यानपेक्षणात् शाखाभेदेन वाक्यबाहुल्यस्याभ्युपगमेनाप्यविशेषान्न बाहुल्यं प्रामाण्यायापेक्षणीयमिति भावः॥ ८६ ॥

यत्पुनरुक्तं वेदान्तेषु विध्यसंभवात्प्रामाण्यं न संभवतीति, तदुत्थाप्य निरस्यति यत्तूक्तमित्यादिना ॥ आत्मज्ञानविधायिनीरिति ॥ आत्मज्ञानायाचार्योपगमनादिविधायिनीरित्यर्थः। नैष्कर्म्यप्रवणा इति फलवत्त्वमुक्तम्। साध्वीरित्युपक्रमाद्यभिमततात्पर्यवत्त्वम् ॥ ८७ ॥

आत्मज्ञानविधायिनीरिति यथाश्रुतमेव गृहीत्वा नियोगपरत्वं वेदान्तानां प्राप्तमिति शङ्कते नन्वात्मेत्यादिना ॥ ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेनेच्छया कर्तुमकर्तुमन्यथाकर्तुं शक्यत्वादन्वयव्यतिरेकसिद्धफलत्वेन च विध्यनपेक्षणान्नास्य विधेयत्वं किं तु श्रवणादे-

---

* नै० अ १ श्लो० १५ ॥

† "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं, तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय, येनाक्षरं पुरुषं वेद प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इति श्रुतिः २ मुण्डके ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सीयतइति । नैवम् । अपुरुषतन्त्रत्वाद्वस्तुयाथात्म्यज्ञानस्य सकलानर्थबीजात्माऽनवबोधोत्सारिणो मुक्तिहेतोरिति विध्यभ्युपगमे ऽपि ना ऽपूर्वविधिरयं, यत आह—

नियमः परिसंख्या वा
विध्यर्थो ऽपि भवेद्यतः ।

रेवेत्यभिप्रेत्य परिहरति नैवमिति ॥ ननु श्रोतव्यो मन्तव्य इति श्रवणादिविधिव्यतिरेकेण द्रष्टव्य इति दर्शने ऽपि विधिः श्रूयतइत्याशङ्क्य मैवं दर्शनस्याविधेयत्वप्रतिपादनात् प्राप्तत्वाच्च तत्रापूर्वविध्यसंभवादिति परिहरति विध्यभ्युपगमे ऽपीति ॥ विध्यर्थो विधिप्रत्ययस्य लिङादेरर्थः । तत्रानेकत्र पाक्षिकतया प्राप्तौ नियमः । अप्राप्तौ विधिः । तुल्यवत्प्राप्तौ परिसंख्या ॥

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते* ॥

इति वचनात् । अनात्मानात्मदर्शनस्य प्राबल्यात् आत्मदर्शनस्याप्राबल्यात्पाक्षिकत्वे नियमविधिरात्मा द्रष्टव्य इति । यदा चात्मानात्मदर्शने तुल्यवत्प्राप्ति ऽहमित्यात्मस्फुरणाव्यतिरेकेणाऽनात्मनो ऽपि स्फुरणात्तत्र परिसंख्येति । उभयथापि नापूर्वविधिरप्राप्त्यभावादि-

---

* तत्र स्वर्गकामो यजेतेत्यादौ यागादेः प्रकारान्तरेणाप्राप्तत्वाद्विधिः । व्रीहीनवहन्ति, तत्र यजेतेत्यादौ पुरोडाशसंपादनार्थं वितुषीकरणसंपादकतया ऽवहननस्य, पक्षे नखविदलनस्य च प्राप्तेः ; समे विषमे च यागस्य पाक्षिक्या प्राप्त्या च नियमः । इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्तइत्यादौ रशनाग्रहणलिङ्गेनाश्वाभिधानीगर्दभाभिधान्योर्ग्रहणस्य युगपत्प्राप्तेः परिसंख्येत्युदाहरणानि कर्मकाण्डे ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

अनात्माऽदर्शनेनैव
परात्मानमुपास्महे ॥ ८८ ॥

यच्चोक्तं "विश्वासो नान्यतो ऽस्ति न*" इति, तदपि निद्रातुरचेतसा त्वया स्वप्नायमानेन प्रलपितं, किं कारणं, न हि वयं प्रमाणबलेनैकात्म्यं प्रतिपद्यामहे। ऐकात्म्यं स्वत एवा,नुभवमात्रात्मकत्वात्। अत एव सर्वप्रमाणावतारासंभवं वक्ष्यति। प्रमाणव्यवस्थायाश्चा-

---

त्यर्थः। नियमपरिसंख्ययोः संभवे हेतुमाह यतो ऽनात्मादर्शनेनैवेति॥ पाक्षिकत्वेन तुल्यत्वेन वा आत्मानात्मदर्शनयोः प्राप्तौ अनात्मदर्शनव्युदासेनात्मदर्शनाय नियमपरिसंख्ये संभवत इत्यर्थः। यद्वा ऽऽत्मदर्शनस्य प्राप्तत्वादपूर्वविध्यसंभवे ऽपि तदुपासनस्याप्राप्तत्वाद्विधिरस्त्वित्यत आह अनात्मेति॥ आत्मोपासनमनात्मदर्शनव्युदासेनात्मदर्शनावृत्त्यैव सिध्यति। आत्मदर्शनानां पौनःपुन्येन स्वत एव प्राप्तत्वात्। ततश्च नोपासने ऽप्यपूर्वविधिरित्यर्थः॥ ८८॥

न हि वयमिति॥ प्रमाणगम्ये वस्तुनि तदभावादविश्वासो भवति, स्वतः सिद्धतया सततं प्रकाशमाने पुनरात्मनि न प्रमाणाभावादविश्वास इत्यर्थः। 'प्रत्यक्षादीनामनेवंविषयत्वात्तेषां स्वारम्भकनियमोपनिपातित्वा'दित्यादिना चायमर्थो वर्णयिष्यते† इत्याह अत एवेति॥ किं च प्रमाणादीनां सिद्धेरनुभवाधीनत्वान्नानुभवरूपस्यात्मनः सिद्धिः प्रमाणाधीनेत्याह प्रमाणव्यवस्थायाश्चेति॥ अ-

---

* नै० अ० १ श्लो० १५

† द्वितीयाध्यायोपक्रमे, इति शेषः॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

नुभवमात्राश्रयत्वात्। अत आह—

वाक्यैकगम्यं यद्वस्तु
नान्यस्मात्तत्र विश्वसेत्।
ना ऽप्रमेये स्वतः सिद्धे
ऽविश्वासः कथमात्मनि ॥ ८६ ॥

यदप्युक्तं "मन्त्रेण विधि*"मिति, तदप्यबुद्धिपूर्वकमिव नः प्रतिभाति। यस्मात्कालान्तरफलदायिषु† कर्मसु एतद्घटते। आत्मलाभकालएव फलदायिनि त्वात्मज्ञाने नैतत्सम्भवमित्याह—

ज्ञानात्फले ह्यवाप्ते ऽखि-
लप्रत्यक्षे भवघातिनि।

नुभवमात्राश्रयत्वा,दनुभवालम्बनत्वा,दनुभवमात्राधीनत्वादिति यावत्। वाक्यैकगम्यं यद्वस्तु धर्माधर्मादिलक्षणं नान्यस्मात्तत्र विश्वसेद् वाक्यादन्यतो न विश्वसेत्, ना, पुरुषः। अप्रमेये स्वतः सिद्धे ऽविश्वासः, विश्वासरहितः कथमात्मनि स्यादित्यक्षरयोजना। यद्वा अप्रमेये स्वतः सिद्धे आत्मनि कथं न विश्वास इत्यन्वयः ॥ ८६ ॥

दृष्टफलत्वादात्मज्ञानस्य विध्यभावे फलाभावाभिधानमनुभवविरुद्धमित्यभिप्रेत्याह तदप्यबुद्धीति ॥ विधिप्रयुक्तफलेषु हि विधिमन्त्रेण प्रवृत्तौ फलाभावो न तु स्वरूपप्रयुक्तफलेषु। आत्मज्ञानं तु भोजनादिवत् स्वरूपप्रयुक्तफलम्। यथैव हि भोजनस्य स्वरूपप्रयुक्तमेव तृप्तिलक्षणं फलम् एवमात्मज्ञानस्यापि संसारोपरमलक्षणं फलं

---

* नै० अ० १ श्लो० १६ ॥

† अदृष्टफलदायिष्वित्यर्थः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

उपकाराय तन्नेति
तन्न्याय्यं भाति नो वचः ॥ ९० ॥

यदपि जैमिनीयं वचनमुद्घाटयसि, तदपि तद्विवक्षा*ऽपरिज्ञानादेवोद्घाट्यते । किं कारणं, यतो न जैमिनेरयमभिप्राय आम्नायः सर्व एव क्रियार्थ इति । यदि ह्ययमभिप्रायोऽभविष्य "अथातो ब्रह्मजिज्ञासा†" "जन्माद्यस्य यतः‡" इत्येवमादि ब्रह्मवस्तुस्वरूपमात्रयाथात्म्यप्रकाशनपरं गम्भीरन्यायसंदृब्धं सर्ववेदान्तार्थमीमांसनं श्रीमच्छारीरकं नासूत्रयिष्यद्, अस्य-

---

स्वरूपप्रयुक्तमेव । तस्माद्विवक्षान्तरेणेत्यसमञ्जसमित्यर्थः । ज्ञानात्फलइति ॥ सहेतुकसंसारोपरमलक्षणे कैवल्ये फले ज्ञानात्प्रत्यक्षमनुभूयमाने विधिविकलमात्मज्ञानं फलाय न भवतीति वचनं प्रत्यक्षपराहतत्वादत्यन्तमुपेक्षणीयमित्यर्थः ॥ ९० ॥

यत्पुन"राम्नायस्य क्रियार्थत्वा§दित्युक्तं"तदनूद्य निरस्यति यदपि जैमिनीयमित्यादिना ॥ आम्नायः सर्व एव क्रियार्थो भवतीति जैमिनेरभिप्रायो न भवतीत्यत्र किं प्रमाणमित्यत आह यदि ह्ययमिति ॥ सिद्धस्वरूपस्याकर्त्तुरभोक्तुः प्रत्यगात्मनः प्रतिपादकवेदान्तवाक्यविचाराय पृथक्छास्त्रारम्भान्यथानुपपत्तिस्तन्न प्रमाणमित्यर्थः । तर्ह्याम्नायस्य क्रियार्थत्वादित्यस्य सूत्रस्य को ऽर्थ इत्यत आह अ-

---

* विवक्षा= तात्पर्यम् ॥

† व्याससूत्र० अ० १ पा० १ सू० १ ॥

‡ व्याससूत्र० अ० १ पा० १ सू० २ ॥

§ जैमिनिसूत्र० अ० १ पाद० २ सू० ७ ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

न्वयञ्च* । तस्माज्जैमिनेरेवायमभिप्रायो यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यमेवमैकात्म्यवाक्यानामप्यनधिगतवस्तुपरिच्छेदसाम्यादित्यत इदमभिधीयते—

अधिचोदनमाम्नाय†-
स्तस्यैव स्यात्क्रियार्थता ।
तत्त्वमित्यादिवाक्यानां
ब्रूत कर्मार्थता कथम् ॥ ६१ ॥

अपि चैकात्म्यपक्षइवादृष्टार्थकर्मसु भवत्पक्षे ऽपि प्र-

धिचोदनमिति॥ अधिचोदनं, चोदना नाम विधिः, चोदनामधिकृत्य वर्तत इत्यधिचोदनं, चोदनायां विधिप्रकरणे पठितानां सो ऽरोदीदित्यादिसिद्धार्थवादवाक्यानामानर्थक्यमनेन सूत्रेणाशङ्क्य "विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः‡" रिति विधिशेषत्वेन §सार्थकत्वं तेषां सिद्धान्तितं, न तु तद्विपरीतानां तत्त्वमस्यादिवाक्यानामित्यर्थः ॥ ६१ ॥

यत्पुनरुक्तं कुर्वन्नेवेह कर्माणीत्ययं मन्त्रः कृत्स्नमायुः कर्मस्वेव विनियुङ्क्त¶इति, तदप्ययुक्तम् । आत्मनः परमार्थतः कर्तृत्वभोक्तृत्वाद्यभावात्तद्विदः कर्माधिकारासंभवा‖दविद्वद्विषय एवायं मन्त्र इति

---

* भगवान् बादरायण इति शेषः ॥

† अधिचोदनं य आम्नाय, इति का० सं० पु० २ पुस्तके च ॥

‡ जैमिनिसूत्र० अ० १ पा० २ सू० ७ ॥

§ तस्माद्बर्हिषि रजतं न देयमित्यादिविध्येकवाक्यतयेत्यर्थः ॥

¶ नै० अ० १ श्लो० १८ ॥

‖ ज्योतिष्टोमादौ हि स्वर्गादिकामनावत एवाधिकारात् कर्तृत्वाद्यभिमानाभावे कामनाया असंभवादात्मविदः कर्मण्यधिकारासंभवादिति भावः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

वृत्तिर्दुर्लभ्या । यतः—

स्वर्गं यियासुर्जुहुया-
दग्निहोत्रं यथाविधि ।
देहाद् व्युत्थापितस्यैवं
कर्तृत्वं जैमिनेः कथम्* ॥ ८२ ॥

न च प्रत्याख्याताशेषशरीरादिकर्मसाधनस्वभावस्यात्ममात्रस्य कर्मस्वधिकारो, यस्मात्—

सर्वप्रमाणासंभाव्यो†
ह्यहंवृत्त्येकसाधनः ।

प्रदर्शयितुमाह अपि चेति ॥ यथा अस्मत्पक्षे ज्ञाने विध्यभावादप्रवृत्तिस्तथा भवत्पक्षे विध्यभ्युपगमे ऽप्यग्निहोत्रादिकर्मस्वप्रवृत्तिरित्यर्थः । कुत इत्यत आह यत इति ॥ देहान्तरोपभोग्यस्वर्गादिसाधनाग्निहोत्रादिविध्यन्यथानुपपत्त्या प्रमितस्य देहादिव्यतिरिक्तस्य निरवयवस्यात्मनो न परिस्पन्दपरिणामलक्षणक्रियाप्रवेशात्मकं कर्तृत्वमुपपद्यते । न च प्रयत्नाश्रयत्वेनापि कर्तृत्वं प्रयत्नस्यान्तःकरणधर्मत्वादनित्यस्य नित्यात्मगुणत्वानुपपत्तेश्चेत्यर्थः । स्वर्गं यियासुरग्निहोत्रं यथाविधि जुहुयादिति विधेर्देहाद् व्युत्थापितस्येत्यन्वयः । इति शब्दस्यैवंशब्दसामर्थ्याल्लभ्यते जैमिनेः पक्ष इत्यर्थः ॥ ८२ ॥

एवं कर्त्रन्वयं निराकृत्याधिकारान्वयं निराचष्टे न च प्रत्याख्यातेति ॥ प्रत्याख्यातमशेषं शरीरादिलक्षणं कर्मसाधनं येन त-

---

* देहहीनस्य स्वर्गसंयोगानुकूलव्यापारकर्तृत्वमिच्छाकर्तृत्वं च न संभवतीत्यर्थः ॥

† अनुभवस्वरूपत्वात् प्रमाणजन्यज्ञानाऽविषय इत्यर्थः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

युष्मदर्थमनादित्सु-
जैमिनिः प्रेर्यते कथम् ॥ ८३ ॥
प्रवृत्तिकारणाभावाच्च । यस्मात्—
सुखदुःखादिभिर्योग
आत्मनो नाऽहमेष्यते ।
पराक्त्वात्प्रत्यगात्मत्वा-
ज्जैमिनिः प्रेर्यते कथम् ॥ ८४ ॥

त्स्वभावस्यात एवात्ममात्रस्य न कर्मस्वधिकार इत्यर्थः । सर्वप्रमाणागोचरस्येत्कथं व्यवह्रियतइत्यत आह अहंवृत्तीति ॥ युष्मदर्थमहंकारादिलक्षणमनादित्सुः परमार्थतस्तत्संसर्गरहितो जैमिनिश्रब्दवाच्यशरीरोपलक्षितः प्रत्यगात्मा प्रेर्यते प्रवर्त्यते विधिना कथं न कथंचिदित्यर्थः । आत्मा प्रेर्यते कथमित्यात्ममात्रस्य प्रवर्त्यत्वासंभवे वक्तव्येपि जैमिन्यात्मग्रहणं तद्रूपात्मभार्थम् ॥ ८३ ॥

इदानीं भोक्तृत्वयं निराकुर्वन् प्रवृत्तिकारणेति ॥ प्रवृत्तिकारणं, प्रयोजनं तदभावाच्च न प्रवृत्ति*रित्यर्थः । कुतः प्रयोजनाभाव इत्यत आह यस्मादिति ॥ आत्मनः सुखदुःखादिभिर्योगो नास्तीति यस्मात्तस्मादित्यर्थः । ननु कथं सुखदुःखादिभिरयोगः, सुख्यहं दुःख्यहमिति सुखदुःखादिसंबन्धानुभवादित्याशङ्क्याह अहमेति ॥ अहमा अन्तःकरणेन सुखदुःखादेः संबन्धः सुख्यहमित्यादावीष्यते न त्वात्मनेत्यर्थः । कुत आत्मनो नेष्यतइत्यत आह पराक्त्वेति सुखादीनां साध्यत्वेन पराक्त्वादात्मनश्च साक्षित्वेन प्रत्यक्त्वात्तेषां पराग्रूपान्तःकरणपरिणामत्वादात्मधर्मत्वानुपपत्तेरित्यर्थः ॥ ८४ ॥

---

* फलाभावे तद्विषयकेच्छाया असंभवादिच्छाभावे च प्रयत्नस्यासंभव इत्यर्थः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

किं च—

न तावद्योग एवास्ति
शरीरेणात्मनः सदा ।
विषयैर्दूरतो नास्ति
स्वर्गादौ स्यात्कथं सुखम् ॥ ९५ ॥

यस्मादन्यथा नोपपद्यते—

नराभिमानिनं तस्मात्
कारकाद्यात्मदर्शिनम् ।
मन्त्र आहोररीकृत्य
कुर्वन्निति न निश्चयम् ॥ ९६ ॥

भोगसाधनैः संबन्धाभावादप्यात्मनोऽभोक्तृत्वम् । तथा ह्यसङ्गत्वादात्मनोऽहंप्रत्ययालम्बनेन शरीरेणापि न संबन्धोऽस्ति । अहंप्रत्ययानालम्बनैः पुनर्विषयैः शब्दादिभिरतिशयेन नास्ति संबन्धः । तथा सति स्वर्गादौ कथमस्य सुखादिना संबन्धः स्यादित्याह किं च न तावदिति ॥ ९५ ॥

एवं कर्त्रन्वयाधिकारान्वयभोक्त्रन्वयानामात्मनः परमार्थतोऽसंभवादनाद्यविद्यावशाद्देहेन्द्रियादावहं ममेति मिथ्याभिमानवत एव कर्माधिकारी मन्त्रेण प्रदर्श्यतइति फलितमाह यस्मादित्यादिना ॥ नराभिमानिनं, नरत्वाभिमानिनं मनुष्यत्वाभिमानिनं* कारकाद्यात्मदर्शिनं, कर्तृत्वाद्यात्मदर्शिनं कर्तृत्वभोक्तृत्वप्रमातृत्वादिष्वात्माभिमानिनमविद्यावन्तमङ्गीकृत्य कुर्वन्नेवेत्यादिमन्त्रः कर्म कर्त्तव्यम-

---

* अनात्मभूते देहादौ आत्मत्वाभिमानिनमित्यर्थः ॥

DR.RUPAK NATH (DR.RUPAK NATH)
www.astrology-tantra.com

यच्चोक्तं "विरहय्ये"ति,* तदपि न सम्यगेव । तथापि तु न या का चित्क्रिया यत्र क्व चाध्याहरणीया किं तु या यत्राभिप्रेतसंबन्धं घटयितुं शक्नोति, आकाङ्क्षां च वाक्यस्य पूरयति सैवाध्याहरणीया । एवं विशिष्टा च क्रिया ऽस्माभिरभ्युपगतैव सा तूपादिष्टितवाक्यार्थोऽविरोधिन्येव नाऽभूतार्थप्रादुर्भावफले†ति षड्भाव-

---

भिधत्ते न निर्द्दयं नरत्वाद्यभिमानहीनं विद्यावन्तम्, "एवं त्वयि नान्यथेतो ऽस्ति न कर्म लिप्यते नरे" इतिश्रुतेरित्यर्थः । एवं प्रकारे त्वयि जिजीविषति नरे नरमात्राभिमानिनि इत एतस्मात्कर्म कुर्वतो वर्तमानात् प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाऽशुभं कर्म न लिप्यते कर्मणा न लिप्यते इति श्रुत्यक्षरयोजना ॥ ८६ ॥

विरहय्येति यच्चोक्तं तच्च निरस्यति यच्चोक्तं विरहय्येतीति ॥ सो ऽयं देवदत्तः सो ऽयं ग्राम इत्यादिवाक्येषु क्रियापदमन्तरेणापि वाक्यार्थप्रतीतेर्दर्शनान्न वाक्यार्थप्रतीतौ क्रियापदापेक्षेति भावः । ननु तत्रापि पश्य गच्छेति क्रियापदं प्रयोक्तव्यमेव, तन्न प्रयुज्यते द्वारं विव्रियतामित्यर्थे द्वारमिति प्रयोगवदित्याशङ्क्यैवमपि तद्वाक्यार्थप्रतिपत्त्युपयोगिक्रियाभिधायिन एव पदस्याध्याहरणीयत्वात्, प्रवर्तकक्रियापदमेवाध्याहरणीयमिति नियन्तुमशक्यत्वाद्, वेदान्तवाक्येषु चास्त्यस्तीत्यादिक्रियापदस्याभ्युपगतत्वान्न कश्चिद्दोष इत्याह तथापि त्विति ॥ नाऽभूतार्थप्रादुर्भावफलेति ॥ फलेत्युत्पत्तिविकृ-

---

* नै० अ० १ श्लो० १९ ॥

† अभूतो ऽसिद्धः, साध्यमानो यो ऽर्थो यागादिस्तस्य प्रादुर्भाव उत्पत्तिः, सैव फलं यस्याः, तथा नेत्यर्थः, ॥

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

विकाररहितात्मवस्तुनो निर्धूताशेषद्वैतानर्थस्यापराधीनप्रकाशस्य विजिज्ञापयिषितत्वादस्यस्मीत्यादिक्रियापदं स्वमहिमसिद्धार्थप्रतिपादनसमर्थमभ्युपगन्तव्यं न हि विपरीतार्थप्रतिपादनमिति—

धावेदिति न दानार्थे
पदं यद्वत्प्रयुज्यते ।
एधीत्यादि तथा नेच्छे*-
त्स्वतःसिद्धार्थवाचिनि† ॥ ६७ ॥

न च यथोक्तवस्तुवृत्तप्रतिपादनव्यतिरेकेण तत्त्वम-

त्यादिफला न भवतीत्यर्थः । नाभूतार्थप्रादुर्भावफलेत्यत्र इतिशब्दस्य हेत्वर्थस्यास्मीत्यादिक्रियापदमित्यनेन संबन्धः । कुतो नाभूतार्थप्रादुर्भावफलेत्यत आह स्वेभावेति ॥ अनर्थनिवृत्त्यर्थमपि न क्रियाध्याहारापेक्षेत्याह निर्धूतेति ॥ तर्हि प्रतीत्यर्थमपेक्षतामित्यत आह अपराधीनेति ॥ उक्तमेवार्थं दृष्टान्तेनोपपादयति धावेदितीति ॥ हिरण्यं दद्यादित्येतस्मिन्नर्थे हिरण्यं धावेदित्यादि पदमयोग्यत्वाद्यथा न प्रयुज्यते तद्वदेधि भवेत्यादिपदं वृद्ध्यादिविकारहीनात्मवस्तुप्रतिपादकवाक्ये न प्रयोक्तव्यमित्यर्थः । एधीत्येतदस्तेर्धातोर्लोण्मध्यमपुरुषैकवचनम् ॥ ६७ ॥

ननु तत्त्वमस्यादिवाक्यानां स्वतःसिद्धार्थवाचकत्वमसिद्धं तेषां तद्दहरस्मीत्युपासीतेत्युपासनाविधिपरत्वादित्यत आह न चेति ॥

---

* प्रयोक्तुमिति शेषः ॥

† वाक्ये इति शेषः ॥

DR.RUPNATHJI(DR.RUPAK NATH)

www.astrology-tantra.com

सिद्धवाक्यं* वाक्यार्थान्तरं वक्तीति शक्यमध्यवसितुमित्या-
ह—

तत्त्वमस्यादिवाक्यानां
स्वतःसिद्धार्थबोधनात्† ।
अर्थान्तरं‡ न संद्रष्टुं
शक्यते त्रिदशैरपि ॥ ९८ ॥

यस्मादेवम्§—

अतः सर्वाश्रमाणां तु
वाङ्मनःकायकर्मभिः ।
स्वनुष्ठितैर्न मुक्तिः स्याद्
ज्ञानादेव हि सा यतः ॥ ९९ ॥

तस्माच्च कारणादेतदप्युपपन्नम्—

स्वमनोरथसंक्लृप्त-
प्रज्ञाध्मातधियामतः ।

उपक्रमोपसंहारादिषड्विधलिङ्गाधिगतपरिनिष्ठितवस्तुप्रतिपादन-तात्पर्यविरोधादित्यर्थः ॥ ९८ ॥

यत्पुनः पूर्ववादिनोपसंहृत"मतः सर्वाश्रमाणा¶"मिति, तत्राह ॥ अत इति ॥ ९९ ॥

---

* तत्त्वमस्यादिवाक्यानामिति का० सं० पुस्तके २ पुस्तके च पाठः ।।

† स्वतःसिद्धपरमात्मरूपार्थबोधनादित्यर्थः ।।

‡ अर्थान्तरबोधकत्वमित्यर्थः । अभिधेयान्तरमित्यर्थो वा ।।

§ पूर्वपक्षिमतं यस्मादुक्तविधया निरस्तमत इत्यग्रे संबन्धः ।।

¶ नै० अ० १ श्लो० २१ ।।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

श्रोत्रियेष्वेव वाचस्ताः
शोभन्ते नात्मवेदिषु ॥ १०० ॥

इति श्रीमच्छङ्करपूज्यपादशिष्यसुरेश्वराचार्यकृतौ नैष्कर्म्यसिद्धौ प्रथमो ऽध्यायः समाप्तः ॥

तत्र चास्माभिरपि यदुक्तम् "इति हृष्टधियः*"मित्यादि तदपि युक्तमेवोक्तमित्युपसंहरति तस्माच्चेति ॥ १०० ॥

इति श्रीमज्ज्ञानोत्तममिश्रविरचितायां नैष्कर्म्यसिद्धिचन्द्रिकायां प्रथमो ऽध्यायः ॥ १ ॥

---

* नै० अ० १ श्लो० ३२ ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

अथ द्वितीयोऽध्यायः ॥

श्रीपरमात्मने नमः ॥

प्रत्यक्षादीनामनेवंविषयत्वात्, तेषां स्वारम्भकविषयोपनिपातित्वाद्, आत्मनश्चाशेषप्रमेयवैलक्षण्यात्,* सर्वानर्थैकहेत्वज्ञानापनोदिज्ञानदिवाकरोदयहेतुत्वं व-

---

श्रीमत्परब्रह्मणे नमः ॥

द्वितीयोऽध्यायः ॥

वृत्तसंकीर्तनपूर्वकं वर्तिष्यमाणस्याध्यायस्य तात्पर्यमाह प्रत्यक्षादीनामिति ॥ प्रत्यक्षादिशब्देन श्रोत्रादीनां† मिह ग्रहणम् । तेषामनेवंविषयत्वा,दद्वैतात्माऽविषयत्वादित्यर्थः । कुतस्तदविषयत्वमित्यत आह तेषामिति ॥ तेषां, श्रोत्रादीनां स्वारम्भकशब्दादिवदाकाशादिभूतारब्धत्वात्तद्विषयत्वादात्माविषयत्वमित्यर्थः । श्रोत्रं, स्वग्राह्यजातीयविशेषगुणवद्द्रव्यारब्धं बाह्येन्द्रियत्वाच्चक्षुरादिवत् । त्वगिन्द्रियं वायवीयं नियमेन स्पर्शव्यञ्जकत्वाद्, व्यजनादिजनितवायुवत् । तथा चक्षुस्तैजसं नियमेन रूपग्राहकत्वाद् दीपवत् । रसनमप्याऽऽप्यं नियमेन रसव्यञ्जकत्वाद् आस्योदकवत् । घ्राणं पार्थिवं नियमेन गन्धव्यञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृतव,दित्यनुमानात्, "यथा सर्वासामपां समुद्रमेकायनम् एवं सर्वेषां स्पर्शानां त्वगि-

---

* प्रमेयं हि भवति प्रमाणसापेक्षं, प्रकृते तु आत्मनो ऽनुभवस्वरूपत्वेन तत्र प्रमाणान्तराऽनपेक्षणान्न तस्य प्रमेयत्वमित्यर्थः ॥

† पञ्चेन्द्रियाणामिति शेषः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

त्त्वमात्रयाथात्म्यप्रकाशनपटीयस्त्वमस्यादेर्वचस एवेति बह्वीभिरुपपत्तिभिः प्रदर्शितम् । अतस्तदर्थप्रतिपत्तौ यत्कारणं तदपनयाय द्वितीयाध्याय आरभ्यते—

श्रावितो वेत्ति वाक्यार्थं
न चेत्तत्त्वमसीत्यतः ।
त्वंपदार्थानभिज्ञत्वा-
दतस्तत्प्रक्रियोच्यते ॥ १ ॥

कायनम्, एवं सर्वेषां रसानां जिह्वैकायनम्, एवं सर्वेषां गन्धानां नासिकैकायनम्, एवं सर्वेषां रूपाणां चक्षुरेकायनम्, एवं सर्वेषां शब्दानां श्रोत्रमेकायनम्" मित्यागमाच्च श्रोत्रादीनां भौतिकत्वं तद्विषयत्वं चावगन्तव्यम् । आत्मा पुनः शब्दादिहीनत्वात्तद्विषयित्वाच्च न तेषां विषय इत्याह आत्मनश्चेति ॥ कथं पुनरात्माऽज्ञाननिवृत्तिरित्यत आह सर्वानर्थेति ॥ एवं प्रथमाध्यायेन समन्वये* प्रदर्शिते तत्र प्रत्यक्षादिविरोधाशङ्कायां तत्परिहाराय द्वितीयाध्याय आरभ्यते इत्याह अतस्तदर्थेति ॥ तस्य वाक्यस्यार्थप्रतिपत्तौ यत्कारणं पदार्थाऽपरिज्ञानं तस्य प्रत्यक्षादिविरोधाऽऽशङ्कासमुद्भूताऽसंभावनाविपरीतभावनानिरासेनाऽपनयनाय द्वितीयाध्यायारम्भ इत्यर्थः । पूर्वोत्तराध्याययोर्हेतुहेतुमल्लक्षणसंबन्धो दर्शितः । श्रावित इति ॥ वाक्यार्थज्ञानस्य पदार्थप्रतिपत्तिपूर्वकत्वात्† त्वंपदार्थाज्ञाने सति तत्त्वमसीत्यतो वाक्याद् वाक्यार्थं श्रावितो यदि न जानाति अतस्तत्प्रक्रिया तस्य त्वंपदार्थस्य प्रक्रिया प्रतिपादनं

---

* समन्वये=संबन्धे, संगताविति यावत् ॥

† वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वादित्यर्थः ॥

DR.RUPNATHJI (DR.RUPAK NATH)

www.astrology-tantra.com

योऽयमहं ब्रह्मेति वाक्यार्थस्तत्प्रतिपत्तिर्वाक्यादेवेति प्रत्यक्षादीनामनेवंविषयत्वादित्यवादिषं तस्य विशुद्ध्यर्थमनैकान्तिकत्वं* पूर्वपक्षत्वेनोपस्थाप्यते—

कृत्स्नानात्मनिवृत्तौ† च
कश्चिदाप्नोति निर्वृतिम् ।
श्रुतवाक्यस्मृतेश्चान्यः
स्मार्यते च वचोऽपरः ॥ २ ॥

क्रियते इत्यर्थः ॥ १ ॥

वृत्तसंकीर्तनपूर्वकमुत्तरश्लोकस्य तात्पर्यमाह यो ऽयमिति ॥ वाक्यादेवेत्यत्र इतिशब्दः प्रकारवचनः । अहं ब्रह्मेत्येवंप्रकारा तत्प्रतिपत्तिरित्यर्थः । वाक्यव्यतिरेकेणापि प्रतिपत्तिदर्शनाद् न वाक्यस्य नियतहेतुत्वमित्यनैकान्तिकत्वमेव दर्शयति कृत्स्नेति ॥ कश्चिद्विमलमतिः कृत्स्नप्रपञ्चविलापने भेदकोपाधेरभावादेकत्वं वाक्यमन्तरेणापि प्रतिपद्यते । यथा "विराडात्मा यन्मदन्यं नास्ति कस्मान्नु बिभेमीती"ति । कश्चिच्छ्रुतं वाक्यं स्मृत्वा प्रतिपद्यते यथा भृगुः "यतो वा इमानि भूतानि जायन्ते" इति वाक्यस्मृते"रानन्दो ब्रह्मेति व्यजाना"दिति । कश्चिच्चाचार्येण वाक्यं स्मार्यमाणो ऽसंभावनाविपरीतभावनानिराकरणमुखेन साक्षादहमस्मि परं ब्रह्मेति वाक्यार्थं प्रतिपद्यते यथा श्वेतकेतुर्नवकृत्वस्तत्त्वमसीति । श्वेतकेतुभृग्वोरेतयोरुभयोरपि वाक्यस्मरणमेव हेतुर्न वाक्यमिति त्रिष्वपि पक्षेषु न वाक्यं हेतुरित्यर्थः ॥ २ ॥

---

* व्यभिचारित्वम् ॥

† कृत्स्नानात्म्यनिवृत्ताविति का० सं० पु०पाठः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

एतत्प्रसङ्गेन श्लोकान्तरोपन्यासमुभयत्रापि संभावनायाह—

वाक्यश्रवणमात्राच्च
पिशाचकवदाप्नुयात् ।
त्रिषु याद्दच्छिकी सिद्धिः
स्मार्यमाणे तु निश्चिता* ॥ ३ ॥

नायमनैकान्तिको हेतुर्यतः—

सर्वोऽयं महिमा ज्ञेयो
वाक्यस्यैव यथोदितः ।

कथं तर्हि वाक्यस्य हेतुत्वाशङ्केति तत्राह एतत्प्रसङ्गेनेति ॥ वाक्यव्यतिरेकेण विराट्प्रभृतीनां त्रयाणां ज्ञानं दृष्टं पिशाचकस्य पुनर्वाक्यश्रवणादपि तद् दृष्टमित्युभयत्रापि ज्ञानोत्पत्तिदर्शनान्न वाक्यमेव नियमेन ज्ञानजन्महेतुरिति ज्ञापनायेत्यर्थः । पिशाचकवदिति॥ पिशाचको नाम कश्चिदरण्यं गतः स्वकर्मणा तत्राधीयमानं तत्त्वमस्यादिवाक्यमाकर्ण्य जन्मान्तरसंस्कारवशात्तदैव वाक्यार्थं प्रतिपेदे इति लोके प्रसिद्धमित्यर्थः । अयं पुनरत्र विशेष इत्याह त्रिष्विति ॥ ३ ॥

इदानीं सिद्धान्तयति नायमिति ॥ लिङ्गस्मरणस्य गमकत्वे ऽपि न यथा लिङ्गस्यागमकत्वम् एवं वाक्यस्मरणस्य गमकत्वे ऽपि न वाक्यस्यागमकत्वं वाक्यस्मरणस्योभयत्रापि द्वारत्वादित्याह सर्वो

---

* त्रिषु=विराड्भृगुपिशाचकेषु, यादृच्छिकी=प्रयत्नान्तराऽजन्या, सिद्धिः=ब्रह्मात्मैक्यप्रतिपत्तिः । तत्त्वमसीति वाक्ये पुनः पुनः स्मार्यमाणे तु श्वेतकेतौ सा निश्चिता विक्षेपान्तराऽतिरस्कार्येत्यर्थः । स्मर्यमाणे त्विति का० सं० पु० पाठः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

वाक्यार्थं न ह्यृते वाक्या-
त्कश्चिज्जानाति तत्त्वतः ॥ ४ ॥

वाक्यं च प्रतिपादनाय प्रवृत्तं सत्प्रतिपादयत्येव, सर्व-प्रमाणानामप्येवंवृत्तत्वात्—

नाहंग्राह्ये न तद्धीने
न प्रत्यङ्नापि दुःखिनि ।

ऽयमिति ॥ यत्पुनरुक्तं “कृत्स्नानात्मनिवृत्ता*” विति तत्रापि प्रपञ्चा-भावाद् व्यतिरिक्तनिरतिशयानन्दरूपब्रह्मावगतिर्न वाक्यं विना संभ-वति तस्य वेदान्तवाक्यव्यतिरिक्तप्रमाणागोचरत्वादित्याह वाक्या-र्थमिति ॥ ४ ॥

ननु वाक्यमपि प्रमाणान्तरसंवादाभावात्स्वार्थं निश्चाययितुं न प्र-क्नोतीत्यत आह वाक्यं चेति ॥ स्वविषयावबोधनाय प्रवृत्तानां प्रमा-णानां प्रमाणान्तरसंवादापेक्षया कुण्ठीभावः कश्चिदपि न दृश्य-ते इत्यर्थः ॥ ननु न वयं प्रमाणान्तरसंवादाभावादप्रतिपादकं ब्रूमः किं तु तद्विरुद्धार्थत्वादिति तत्राह नाहमिति ॥ अहंग्राह्यमहं मनुष्य इ-त्यहंप्रत्ययवेद्यं यच्छरीरं तस्मिंस्तत्त्वमसीति वाक्यश्रवणाद्विरोधप्रति-भासो न भवति, तस्य त्वंपदानभिधेयतया तत्पदार्थेन सामानाधि-करण्यानङ्गीकारात् । न तद्धीनइति ॥ चक्षुषा पश्यामि श्रोत्रेण शृणो-मीत्येवं करणत्वेनानुभवाद् अहं चक्षुः पश्यामीत्यनुभवाच्चाहंप्रत्य-यरहिते ऽपि न विरोधप्रतिभासः । तेनापि सदसीति सामानाधि-करण्यानङ्गीकारात् । तथा प्रत्यक्, प्रतीचि प्रत्यगात्मन्यपि† न वि-

---

* नै० अ० २ श्लो० २ ॥

† प्रति, प्रातिलोम्येन मिथ्याध्यस्तनिखिलप्रपञ्चवैलक्षण्येनाञ्चति, शोभते इति प्रत्यगिति व्युत्पत्तिः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

विरोधः सदसीत्यस्मा-
द्वाक्याभिज्ञस्य जायते ॥ ५ ॥
नाविरक्तस्य संसारा-
न्निविवृत्सा* ततो भवेत् ।
न चानिवृत्ततृष्णस्य
पुरुषस्य मुमुक्षुता ॥ ६ ॥
न चामुमुक्षोरस्तीह
गुरुपादोपसर्पणम् ।

रोधप्रतिभासः । त्वंपदलक्ष्यस्य तस्य तत्पदलक्ष्येणैकत्वाविरोधात् । अत्र प्रत्यक्शब्दो ऽव्ययत्वात्सप्तम्यर्थे वर्तते । अञ्चुगतिपूजनयोरिति-धातोर्ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां चेति क्विन्प्रत्ययान्तात् प्रत्यक्शब्दः । दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिरित्यस्ताती तद्धिते कृते तस्य चाञ्चेर्लुगिति लुकि कृते तद्धितश्चासर्वविभक्तिरित्यव्ययत्वोपपत्तेः । तथा दुःखिनि, सुखदुःखादिधर्मवदन्तःकरणविशिष्टे† ऽपि न विरोधप्रतिभासः । तस्यापि त्वंशब्दवाच्यस्य तत्पदलक्ष्येणैकत्वानङ्गीकारात् । एवं वाक्यतात्पर्याभिज्ञस्य सर्वेष्वपि पदार्थेषु न विरोधबुद्धिस्तेन प्रमाणान्तरविरोधाभावादप्रतिपादकत्वं वाक्यस्य न स्यादित्यर्थः ॥ ५ ॥

तर्हि वाक्यस्य प्रमाणान्तरसंवादादेश्चाभावात्तद्विरोधाभावाच्च वाक्यश्रवणमात्रेण वाक्यार्थं सर्वे एव प्रतिपद्येरन् न च तथा प्रतिपद्यन्त इत्याशङ्क्य तेषां वैराग्यमुमुक्षुत्वाद्यधिकारिविशेषणाभावा'द-

---

* निविवृत्सा—निवर्तितुमिच्छा ॥
† जीवे इति शेषः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

न विना गुरुसंबन्धं
वाक्यस्य श्रवणं भवेत्* ॥ ७ ॥
तथा पदपदार्थौ च
न स्तो वाक्यमृते क्व चित्† ।
अन्वयव्यतिरेकौ च
तावृते‡ स्तां किमाश्रयौ ॥ ८ ॥
अन्वयव्यतिरेकाभ्यां
विना वाक्यार्थबोधनम् ।
न स्यात्तेन विना ध्वंसो
नाज्ञानस्योपपद्यते ॥ ९ ॥
विना ऽज्ञानप्रहाणेन
पुरुषार्थः§ सुदुर्लभः ।

धिकारिणः प्रमितिजनको वेद' इति न्यायाच्च नायं दोष इत्युत्तरश्लोकपञ्चकेन प्रतिपादयति नाविरक्तस्येत्यादिना ॥ न चानिवृत्ततृष्णस्येति ॥ संसारादनिर्विण्णोरित्यर्थः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

अतो ऽपेक्षितवाक्यार्थज्ञानसिद्ध्यर्थमन्वयव्यतिरेकाभ्यां त्वंपदार्थ-

---

* तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्, आचार्यवान् पुरुषो वेदेत्यादिश्रुतिविहितं श्रवणमित्यर्थः ॥

† वाक्यस्य पदसमूहरूपत्वेन तद्राहित्ये तद्घटकीभूतपदस्य तदर्थस्य चासंभव इत्यर्थः ॥

‡ तौ=पदपदार्थौ ॥

§ पुरुषार्थः=मोक्षः । धर्मादौ पुरुषार्थत्वं तु पुरुषार्थोपकारकतया बोध्यम् ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

तस्माद्यथोक्तसिद्ध्यर्थं*
परो ग्रन्थोऽवतार्यते ॥ १० ॥
वर्चस्कं त्वन्नकार्यत्वा-
द्यथाऽनात्मेति गम्यते ।
तद्भागः सेन्द्रियो देह-
स्तद्वत्किमिति नेक्ष्यते† ॥ ११ ॥
आद्यन्तयोरनात्मत्वे प्रसिद्धे मध्ये कः प्रतिबन्धः—
प्रागनात्मैव जग्धं स-
दात्मतामेत्यविद्यया‡ ।

परिशोधनायोत्तरग्रन्थसंदर्भं तत्त्वुपसंहारव्याजेनाह तस्मादिति ॥ १० ॥

यत्तु न "नाहंग्राह्यो न तद्ग्राह्यः§" इति तस्य शरीरेन्द्रियवर्गस्य चानात्मत्वं सूचितं तत्प्रपञ्चनायाह वर्चस्कमिति ॥ वर्चस्कस्य पुरीषस्यान्नपरिणामरूपस्य यथाऽनात्मत्वं गम्यते तद्वत्तद्भागयोरन्नपरिणामयोर्देहेन्द्रिययोरनात्मत्वमनुमानादवगन्तव्यमित्यर्थः ॥ ११ ॥

न केवलमन्नकार्यत्वादनात्मत्वमनुमातव्य,मन्नात्मत्वादप्यन्नवद्देवानात्मत्वमनुमातव्यमित्याह आद्यन्तयोरिति ॥ आद्यन्तयोरोदनपुरीषयोरनिवारिता ऽनात्मत्वप्रतिपत्तिरुदीयमाना मध्ये देहेन्द्रि-

---

* परम्परया मोक्षकारणीभूतवैराग्यसिद्ध्यर्थम् ॥

† नेक्ष्यते=नानुमीयते । देहेन्द्रियादि नात्मरूपम् अन्नकार्यत्वात् पुरीषवदिति प्रयोगः ॥

‡ प्रागनात्मरूपमेवान्नं भक्षितं सदध्यस्तात्मभावकदेहेन्द्रियादिरूपतां प्राप्नोतीत्यर्थः ॥

§ नै० अ० २ श्लो० ५ ॥

DR. RUPNATHJI (DR. RUPAK NATH)

www.astrology-tantra.com

स्रगालेपनवद्देहं
तस्मात्पश्येद्विविक्तधीः ॥ १२ ॥

अथैवमपि मद्वचनं नाद्रियसे स्वयमेवैतस्माच्छरीरादशुचिराशेर्निराशो* भविष्यसि—

मन्यसे तावदस्मीति
यावदस्मान्न नीयसे ।
श्वभिः क्रोडीकृते देहे
नैवं त्वमभिमंस्यसे ॥ १३ ॥
शिर आक्रम्य पादेन
भर्त्संयत्यपरान् शुनः ।
दृष्ट्वा साधारणं देहं
कस्मात्त्वक्तो ऽसि तत्र भोः† ॥ १४ ॥

ययोः केन प्रतिबद्धेत्यर्थः । आगन्तुकत्वादप्यनात्मत्वमनुमेयमित्याह स्रगालेपनवदिति ॥ १२ ॥

इदानीमपायित्वादप्यनात्मत्वमनुमेयमित्याह अथैवमपीति ॥ मन्यसे इति ॥ तावदेव तव देहे ऽहंबुद्धिर्भवति यावदस्माद्देहादुत्क्रम्य न लोकान्तरं गमिष्यसि गते तु सारमेयादयस्तमिमं देहं क्रोडीकुर्वीरन् क्रोडीकृते तस्मिन्निदानीमिवाभिमानो न भवतीत्यर्थः ॥ १३ ॥

---

* निराशः—वियुक्तः, तत्राभिमानशून्य इति यावत् । तथा चान्ते चेदगत्या ऽभिमानो निवर्तनीयः तर्हि वरमिदानीमेव तत्त्याग इति भावः ॥

† इदानीं त्वदभिमानास्पदं त्वाच्छिरो देहपातोत्तरमेकः श्वा स्वीयत्वेनाभिमन्यमानो ऽपरान् शुनो भर्त्सयति, ते ऽपि तत्रोत्पन्नाभिमाना अपरानित्येवं तत्र सारमेयानामपि साधारणो ऽभिमानः । तदेवमतिगर्हिते ऽपि शरीरे तवाभिमानः परं मौढ्यमित्यर्थः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

श्रुतिपरिप्रापितो ऽयमर्थो ऽनात्मा बुद्ध्यादिर्देहान्त इतीदमाह—

बुसव्रीहिपलालांशै-
र्बीजमेकं त्रिधा यथा ।
बुद्धिमांसपुरीषांशै-
रन्नं तद्वदवस्थितम् ॥ १५ ॥

यथोक्तार्थप्रतिपत्तौ सत्यां* न रागद्वेषाभ्यां विक्रियते विपश्चिदित्यस्यार्थस्य प्रतिपत्तये दृष्टान्तः—

वर्चस्के संपरित्यक्ते
दोषतश्चावधारिते ।

शरीरमेव तत्त्वमिति शरीरे ममत्वं विशेषतो न करणीयं शुनामपि साधारणत्वादित्याह शिर आक्रम्येति ॥ भर्त्सयत्येकः श्वेति शेषः ॥ १४ ॥

यदुक्तं "तन्नाग्नेः सेन्द्रियो देहः†" इति तदसिद्धमिति नाशङ्कनीयं श्रुतिसिद्धत्वादित्याह श्रुतीति ॥ यद्वा न केवलमनुमानादेव देहेन्द्रिययोरनात्मत्वावगमः किं त्वागमादपीत्याह श्रुतीति‡॥ "अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं यो ऽणिष्ठस्तन्मन" इति शरीरस्य मनसश्चान्नकार्यत्वं दर्शयतीत्यर्थः ॥ १५ ॥

एवं स्थूलसूक्ष्मदेहद्वयव्यतिरिक्तात्मवेदनस्य दृष्टमेव फलं सर्वानर्थ-

* देहादावात्मत्वाभिमाननिवृत्तिपूर्वकमात्मस्वरूपज्ञाने सतीत्यर्थः ॥
† नै० अ० २ श्लो० ११ ॥
‡ छान्दोग्योपनिषदि ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PAṆḌITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH M. A.,

AND

G. THIBAUT PH. DR.

No. 41.

नैष्कर्म्यसिद्धिर्नाम वेदान्तप्रकरणम् ।

श्रीमन्निखिलतन्त्रापरतन्त्रपूज्यपादसुरेश्वराचार्यवर्यप्रणीतम् ।

श्रीमदनुपमज्ञानविभवज्ञानोत्तममिश्रविरचितया

चन्द्रिकाख्यया व्याख्ययाऽनुगतम् ।

संक्षिप्तटिप्पणीसमलंकृतम् ।

NAISHKARMYASIDDHI

A TREATISE ON VEDANTA,

BY

SURESVARACHARYA,

WITH A COMMENTARY CALLED CHANDRIKÁ

BY JŃÁNOTTAMA MIŚRA.

EDITED & ANNOTATED BY PAṆḌIT RÁMA ŚÁSTRÍ MÁNAVALLÍ,

PROFESSOR OF POETRY, SANSKRIT COLLEGE, BENARES.

Fasciculus II.

BENARES:

PUBLISHED BY MESSRS. BRAJ B. DAS & CO.

PRINTED AT THE BENARES PRINTING PRESS.

1891.

DR.RUPNATHJI (DR.RUPAK NATH)

www.astrology-tantra.com

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

यदि दोषं वदेत्तस्मै
किं तन्नोच्चरितुर्भवेत् ॥ १६ ॥
तद्वत्सूक्ष्मे तथा स्थूले
देहे* त्यक्ते विवेकतः ।
यदि दोषं वदेत्ताभ्यां
किं तत्र विदुषो भवेत्† ॥ १७ ॥

एतावदेव ह्यहं ब्रह्मास्मीति वाक्यार्थप्रतिपत्तौ कारणं यदुत बुद्ध्यादौ देहान्ते ह्यहं ममेति निःसंधिबन्धनो ग्रहस्तद्व्यतिरेके हि न कुतश्चिद्विभजते एकले‡ एव प्रत्यगात्मन्यवतिष्ठतद्वृत्याच्च ॥

बीजभूतरागद्वेषयोर्निवृत्तिरिति सदृष्टान्तमाह यथोक्तेत्यादिना ॥ उच्चरितुरुत्स्रष्टुरित्यर्थः ॥ १६ ॥

तद्वदिति ॥ १७ ॥

वाक्यार्थप्रतिपत्तिप्रतिबन्धकत्वादपि देहद्वये ऽहंकारममकारलक्षणो भेदाभिमानो विवेकिभिः परिहरणीय इति श्रोतॄणां यत्नगौरवसाधनायाह एतावदेवेति ॥ निःसन्धिबन्धन इति ॥ बाधकप्रत्ययशून्य इत्यर्थः ॥ विवेकस्य पुनः फलमाह तद्व्यतिरेके हीति ॥ समैकात्म्य प्रपश्यत इति ॥ शत्रुदेहे मित्रदेहे स्वदेहे च नि-

---

* आत्मत्वाभिमाने इति शेषः ॥

† स्थूलसूक्ष्मरूपत्वेनोभयविधे ऽपि देहे ऽभिमाने निवृत्ते स्वोत्सृष्टमलदोषकीर्तने यथा कोपो न भवति तथा विदुषो ऽस्य देहादिदोषोद्भावने परेण बहुशो ऽपि कृते द्वेषादि नोदेतीत्यर्थः । ताभ्याम्=स्थूलसूक्ष्मदेहद्वयार्थम् । ते उद्दिश्येति यावत् ॥

‡ एकले=अद्वितीये इत्यर्थः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

रिपौ बन्धौ स्वदेहे च
समैकात्म्यं प्रपश्यतः।
विवेकिनः कुतः कोपः
स्वदेहावयवेष्विव* ॥ १८ ॥

इतश्चानात्मा देहादिः—

घटादिवच्च दृश्यत्वा-
त्तैरेव करणैर्दृशेः।
स्वप्ने चानन्वयाज्ज्ञेयो
देहो ऽनात्मेति सूरिभिः ॥ १९ ॥

देहादिकार्यकरणसंघातव्यतिरेकाव्यतिरेकदर्शिनः प्रत्यक्षत एव विरुद्धं कार्यमुपलभ्यते—

चक्षुर्भिरुह्यते यत्त-
त्सर्वशक्त्या शरीरकम्।

विशेषैकात्म्यमनुसंधानस्येत्यर्थः ॥ १८ ॥

इदानीं दृश्यत्वादागमापायित्वाच्च देहस्यानात्मत्वमित्याह इ-तश्चेति ॥ यैः करणैर्घटादयो दृश्यन्ते तैरेव करणैर्दृशेर्द्रष्टुरात्मनो दे-हस्य दृश्यत्वात् स्वप्ने च व्याघ्रादिशरीरेण व्यवहरतो जाग्रति दृष्टे देहे स्वत्वमित्यभिमानाभावेनास्यानन्वयाच्चानात्मत्वं वेदितव्यमित्य-र्थः ॥ १९ ॥

वक्ष्यमाणविवेकफले श्रद्धाजननाय मिथ्याज्ञानविवेकज्ञानयोर्-

---

* स्वावयवेषु अन्यतमेनान्यतमस्याभिघाते कृते ऽपि यथा द्वेषो नोत्पद्यते तथैवे-त्यर्थः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

तूलायते तदेवाहं-
धियाऽऽघातमचेतसाम् ॥ २० ॥

प्रसिद्धत्वात्प्रकरणार्थोपसंहारायाह—

स्थूलं युक्त्या निरस्यैवं
नभसो नीलतामिव।
देहं सूक्ष्मं निराकुर्या-
दतो युक्तिभिरात्मनः ॥ २१ ॥

कथं देहं सूक्ष्मं निराकुर्यादित्युच्यते—

अहंममत्वयत्नेच्छा
नात्मधर्माः कृशत्ववत्।

नुभवसिद्धः फलभेद इति दर्शयति देहादीति ॥ चतुर्भिरिति ॥ स्वदेहः परदेहो वा वाहने स्थापयित्वा चतुर्भिरुह्यो भवति स एवाविदुषामहंबुद्धिपरिगृहीतस्तूलायते तूलवदाचरतीति प्रत्यक्षमेव विरुद्धं कार्यमित्यर्थः। यद्वा स्वभावतः सुषुप्तादावशक्योद्वाह्यो जागरिते ऽहंधीमात्रेण सुखोद्वाहितामापाद्यमानः शिबिकादिवहस्योद्वाहकमहंकर्त्तारमेवानयतीति दर्शयति देहादीत्यादिना ॥ यद्वा एकमेव शरीरमहंबुद्धिरहितमतिगौरवान्महता क्लेशेन नीयते तदेवाहंबुद्धिगृहीतमत्यन्तलाघवात्तूलवदाचरतीत्येवं विरुद्धकार्यदर्शनादनात्मैवायं देह इत्याह देहादीत्यादिना ॥ २० ॥

लौकायतिकव्यतिरिक्तसर्ववादिनामात्मनः स्थूलदेहव्यतिरेके विवादाभावात्सर्वजनप्रसिद्धत्वाच्च न तत्प्रतिपादनायातीवाग्रहः क्रियते इत्याह प्रसिद्धत्वादिति ॥ २१ ॥

कथमिति ॥ अहंममत्वेति ॥ अहंकारममकारबुद्धिसुखदुःखेच्छा-

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

कर्मत्वेनो*पलभ्यत्वा-
द्पायित्वाच्च वस्त्रवत् ॥ २२ ॥

वैधर्म्ये दृष्टान्तः—

नोष्णिमानं दहत्यग्निः
स्वरूपत्वाद्यथा ज्वलन् ।
तथैवात्मा ऽऽत्मनो विद्या†-
दहं नैवाविशेषतः ॥ २३ ॥

द्वेषप्रयत्नादयो वस्तुतो नात्मनो धर्मा भवितुमर्हन्तीत्यर्थः । तत्र हेतुः कर्मत्वेनोपलभ्यत्वादिति ॥ उपलभ्यत्वादित्युक्ते प्रत्यगात्मनो ऽप्यस्मत्प्रत्ययगोचरतयोपलभ्यमानत्वमस्तीति तद्व्यावर्तनाय विशिनष्टि कर्मत्वेनेति ॥ अहंकारादयो ऽनात्मधर्माः दृश्यत्वात्काश्यादिवत् । सैव प्रतिज्ञा अपायित्वाद्वस्त्रादिवदिति प्रयोगः । एवमिच्छादीनामनात्मधर्मत्वप्रतिपादनेन तद्धर्मवतो ऽन्तःकरणस्य सूक्ष्मदेहस्यानात्मत्वं साधितमिति द्रष्टव्यम् ॥ २२ ॥

विपक्षे बाधकमाह वैधर्म्येति ॥ अहंकारादेरात्मधर्मत्वे स्वरूपत्वे च दृश्यत्वासम्भवो ऽपि स्यादित्यत्र लोकप्रसिद्धदृष्टान्तो ऽभिधीयते इत्यर्थः । नोष्णिमानमिति ॥ यथा ज्वलन्नप्यग्निः स्वरूपभूतं धर्मभूतं‡ चोष्णिमानं न दहति न विषयीकरोति स्वरूपत्वाद्धर्मत्वाद्वा

---

* कर्मत्वेन=दर्शनकर्मत्वेन, दृश्यत्वेनेति यावत् ॥

† विद्यात्=विषयीकुर्यात् ॥

‡ धर्मभूतमिति पुस्तकद्वये ऽपि ग्रन्थमध्ये नोपलभ्यते, परं द्वितीयपुस्तके सूक्ष्माक्षरैरुपरि लिखितम् । "स्वरूपत्वाद्धर्मत्वाद्वेत्यग्रिमग्रन्थपर्यालोचनया तस्यापेक्षितत्वाद् ग्रन्थमध्ये निवेदितम् ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

एकस्यात्मनः कर्मकर्तृभावः सर्वथा नोपपद्यते इति श्रुत्वा मीमांसकः प्रत्यवतिष्ठते, अहंप्रत्ययग्राह्यग्राहक* आत्मेति । तन्निवृत्त्यर्थमाह--

यत्कर्मको हि यो भावो
नासौ तत्कर्तृको यतः ।
घटप्रत्ययवत्तस्मा-
न्नाहं स्याद् द्रष्टृकर्मकः† ॥ २४ ॥

अत्राह । प्रत्यक्षेणात्मनः कर्मकर्तृत्वाभ्युपगमे तत्पादोपजीविना‡ ऽनुमानेन प्रत्यक्षोत्सारणमयुक्तमिति

तद्वदात्मा ऽप्यात्मनः स्वरूपभूतं धर्मभूतं वा अहमहङ्कारादिकं न विद्यात् स्वरूपत्वाविशेषाद्धर्मत्वाविशेषाद्वेत्यर्थः ॥ २३ ॥

इदानीं भाट्टमतमाशङ्क्य निराकरोति एकस्येत्यादिना ॥ अहंप्रत्यय आत्मकर्मको न भवति आत्मकर्तृकत्वाद् घटप्रत्ययवदित्यनुमानमाह यत्कर्मक इति ॥ २४ ॥

ननु मामहं जानामीत्यात्मनो ऽहंप्रत्ययं प्रति कर्तृत्वकर्मत्वयोः प्रत्यक्षानुभवात्तत्कर्मत्वनिराकरणानुमानं कालात्ययापदिष्टमिति शङ्कते अत्राहेति ॥ अहमित्यत्रान्तःकरणस्य प्रत्यगात्मदृश्यत्वादहंप्रत्ययस्यापि तद्वत्त्वेनोपलभ्यमानस्य तद्धर्मत्वमेव युक्तम् । द्रष्ट्रात्मगतत्वे तद्दृश्यत्वानुपपत्तेः । तस्मादन्तःकरणमेवाहंप्रत्ययसाक्षिणा दृश्यते इत्यनुभवो न त्वात्मा । मामहं जानामीत्यनुभवस्यान्तःकरण-

---

* अहंप्रत्ययग्राह्यत्वाद ग्राहक इति का० सं० पुस्तके ४ पु० च ॥

† तथा च परस्पराऽसमानाधिकरणयोः कर्मत्वकर्तृत्वयोरेकत्राहंप्रत्यये समावेशो न संभवतीति भावः ॥

‡ हेतुप्रत्यक्षमुपजीव्य प्रवृत्तेन ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

चोद्यम् । तन्निराकरणाय प्रत्यक्षोपन्यासः ।—

यत्र यो दृश्यते द्रष्टा
तस्यैवासौ गुणो* न तु ।
द्रष्टुर्यो दृश्यतां† यस्मा-
न्नैवेयाद्दृष्टृबोधवत् ॥ २५ ॥

प्रत्यक्षेणैव भवदभिमतस्य प्रत्यक्षस्याभासीकृतत्वा-त्तुच्छमेवानुमानम् । अतस्तदेव प्रक्रियते । तत्र च वि-कल्पदूषणाभिधानम्‡—

विशिष्टविषयत्वात्केवलात्मविषयत्वाभावादित्यभिप्रेत्य परिहरति त-न्निराकरणायेति ॥ यत्रान्तःकरणे यो ऽहंप्रत्ययो द्रष्टा साक्षिणा दृश्यते तस्यैवान्तःकरणस्याहंप्रत्ययो धर्मो भवति द्रष्टुर्दृश्यत्वाद् द्रष्टृ-स्थत्वे द्रष्टृदृश्यत्वायोगात्तस्मादन्तःकरणधर्म एवासावहंप्रत्यय इत्य-र्थः ॥ २५ ॥

अतस्तदेव प्रक्रियत इति ॥ आत्मोपलभ्यस्याहंकारस्यात्मधर्मत्वमनु-पपन्नमिति प्रकारान्तरेण पुनः साध्यत इत्यर्थः । आत्मधर्मश्चेदहंप्रत्य-यः किमयमात्मना ऽधिगम्यते किं वा तदंशेनेति विकल्प्योभयथा ऽपि न संभवतीत्युच्यते इत्याह तत्र चेति ॥ स्वगतस्य गुणस्य स्वग्रह-णमन्तरेण स्वगतत्वेन ग्रहणायोगात् स्वस्य च स्वेनाभिन्नत्वादेव ग्रहणानुपपत्तेः स्वांशेनापि स्वस्यात्मत्वादेव ग्रहणायोगान्निरंशत्वा-देव स्वांशेन स्वस्य ग्रहणमिति वक्तुमशक्यत्वाच्च । एवमुक्तन्यायेना-

---

* गुणः=धर्मः, परिणाम इति यावत् ॥

† द्रष्टृस्थं दृश्यतामिति का० सं० पु० पाठः ॥

‡ विकल्प्य दूषणाभिधानमिति २ पु० विकल्पादिदूषणेति ४ पुस्तके पाठः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

नात्मना न तदंशेन
गुणः स्वस्थो ऽवगम्यते।
अभिन्नत्वात्समत्वाच्च
निरंशत्वादकर्मतः॥ २६॥

न युगपन्नापि क्रमेणोभयथा चैकस्य धर्मिणो ग्राह्यग्राहकत्वमुपपद्यतइति प्रतिपादनायाह—

द्रष्टृत्वेनोपयुक्तत्वा-
त्तदैव स्यान्न दृश्यता।
कालान्तरे चेद्‌ दृश्यत्वं
न ह्यद्रष्टृकमिष्यते॥ २७॥

सन्तु काममनात्मधर्मा ममत्वादयो ऽप्युक्तन्यायवत्त्वात्, अनात्मतयैव च तेषु व्यवहारात्। अहंरूपस्य तु प्रत्यगात्मसंबन्धितयैव प्रसिद्धेः, "अहं ब्रह्मास्मी"ति श्रुतेश्चानात्मधर्मत्वमयुक्तमिति चेत्तन्न—

त्मनः कर्मत्वाभावात्तद्गतो ऽपि गुणो न तेन गृह्यते इत्यर्थः॥ २६॥

ग्राह्यस्य ग्राहकत्वे ऽपि किं युगपदेव ग्राह्यग्राहकभावः किं वा क्रमेण। न तावदाद्यः। युगपदेव ग्राहकत्वेन परिसमाप्तस्य निरंशस्य तदैव ग्राह्यत्वेनावस्थानायोगात्। नापि क्रमेण। तदा ग्राहकाभावादेव ग्राह्यत्वानुपपत्तेरित्याह न युगपदिति॥ २७॥

ननु ममत्वयत्नेच्छादीनामनात्मधर्मत्वं तद्वदहंप्रत्ययस्यानात्मधर्मत्वमयुक्तं तस्यात्मधर्मत्वं युक्तं प्रसिद्धे,रहं ब्रह्मास्मीति विद्यादशायामपि तस्यानुवृत्तेश्चेति शङ्कते सन्तु काममिति॥ श्लोकेन परि-

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

अहंधर्मस्त्वभिन्नत्वे-
दहं ब्रह्मेति वाक्यतः ।
गौरो ऽहमित्यनेकान्तो
वाक्यं तद्व्यपनेष्ट तत् ॥ २८ ॥

कथं वाक्यं तद्व्यपनेष्ट तदित्युच्यते—

यो ऽयं स्थाणुः पुमानेष
पुंधिया स्थाणुधीरिव ।
ब्रह्मास्मीति धिया ऽशेषा-
महंबुद्धिं निवर्तयेत्* ॥ २९ ॥

अहंपरिच्छेदव्यावृत्तौ† न किंचिद्व्यावृत्तं द्वैतजा-

हरति तन्नेति ॥ गौरो ऽहमिति सामानाधिकरण्ये ऽपि यथा गौरत्वं नात्मधर्मस्तथा ऽहमस्मीत्यहंप्रत्ययस्यात्मसामानाधिकरण्येन प्रसिद्धावपि नात्मधर्मत्वं सिध्यति । अहं ब्रह्मास्मीति तु सामानाधिकरण्यं बाधायां न पुनस्तदेकत्वविवक्षयेत्यर्थः ॥ २८ ॥

अहं ब्रह्मेति सामानाधिकरण्यवाक्यस्याहंप्रत्ययव्यपनेतृत्वं प्रश्नपूर्वकं दृष्टान्तेन प्रतिपादयति कथं वाक्यमित्यादिना ॥ स्थाणुः पुरुष इति सामानाधिकरण्यं यथा स्थाणोर्बाधकं तथा ऽहं ब्रह्मास्मीति सामानाधिकरण्यमहंकारस्य बाधकमित्यर्थः ॥ २९ ॥

---

* पुरुषे दोषवशात् स्थाणुत्वभ्रमे सति पश्चाद्दोषनिवृत्तौ स्थाणुत्वेन गृहीतः पुरुष इति जायमानया धिया स्थाणुत्वबुद्धिर्निवर्तते, एवमहंप्रत्ययो ब्रह्मास्मीति धिया निवर्तते । एवं चाहं ब्रह्मास्मीति सामानाधिकरण्यवाक्यमेवाहंप्रत्ययनिवर्तकमित्यर्थः । अशेषा ह्यहं बुद्धिर्निवर्तत इति ४ पु० पाठः ॥

† अहंपरिच्छेदव्यावृत्तौ=अहंप्रत्ययप्रयुक्तभेदग्रहनिवृत्तौ सत्यामित्यर्थः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

तमवशिष्यते, द्वितीयसंबन्धस्य तन्मूलत्वादत आह—

निवृत्तायामहंबुद्धौ
ममधीः प्रविलीयते ।
अहंबीजा हि सा सिध्ये*
त्तमोभावे कुतः फणी ॥ ३० ॥

विवक्षितदृष्टान्तांशज्ञापनाय दृष्टान्तव्याख्या—

तमोभिभूतचित्तो हि
रज्ज्वां पश्यति रोषणम् ।
भ्रान्त्या भ्रान्त्या विना तस्मा
न्नोरगं स्रजि वीक्षते† ॥ ३१ ॥

इत्थमहंकारस्यात्मधर्मत्वनिराकरणे प्रयोजनमाह अहंपरिच्छेदेति ॥ रज्ज्वज्ञानव्यावृत्तौ सर्पव्यावृत्तिवदहंकारव्यावृत्तौ ममकारव्यावृत्तिरित्यर्थः ॥ ३० ॥

तमोभावे कुतः फणीति ॥ प्रसिद्धान्धकारस्याभावे फणिनः सर्पस्याभावो दृष्टान्तत्वेनोपन्यस्त इति शङ्कानिरासाय दृष्टान्तो व्याख्यायतइत्याह विवक्षितेति॥ अज्ञानाभिभूतचित्तो हि भ्रान्त्या रज्ज्वां रोषणं सर्पं पश्यति तस्मात्तमसा विना स्रजि नोरगं वीक्षते इत्यर्थः ॥ ३१ ॥

---

* संसिध्येदिति का० सं० पु० पाठः ॥

† तमोऽभिभूतचित्तो भ्रान्त्या स्रजि रज्जौ उरगं वीक्षते, रज्जुमुरगत्वेन गृह्णाति, तस्मात् भ्रान्त्या विना स्रज्युरगं न वीक्षतइति संबन्धः । तथा च स्रज्युरगत्वग्रहो यथा भ्रान्तिनिबन्धन एवमहंवृत्तिरविद्याजन्या, तन्निवृत्तौ तज्जन्याहंवृत्तेर्निवृत्त्या केवलब्रह्माकाराकारितैव चित्तवृत्तिरवतिष्ठतइति पूर्वप्रतिज्ञातार्थसिद्धिरिति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अनन्वयाच्च* नात्मधर्मो ऽहंकारः—

आत्मनश्चेदहंधर्मो
यायान्मुक्तिसुषुप्तयोः ।
यतो नान्वेति तेनाय-
मन्यदीयो भवेदहम् ॥ ३२ ॥

आत्मधर्मत्वाऽभ्युपगमे ऽपरिहार्यदोषप्रसक्तिश्च—

यद्यात्मधर्मो ऽहंकारो
नित्यत्वं† तस्य बोधवत् ।
नित्यत्वे मोक्षशास्त्राणां
वैयर्थ्यं प्राप्नुयाद् ध्रुवम् ॥ ३३ ॥

स्यात्परिहारः स्वाभाविकधर्मत्वाभ्युपगमे ऽप्याम्रा-
दिफलवदिति चेत्तन्न—

सुषुप्त्यादावननुभवाच्चाहंकारस्यानात्मधर्मत्वमवगम्यतइत्याह अ-
नन्वयाच्चेति ॥ अहंकारो नात्मधर्मः, अयावदात्मभावित्वाद्देहव-
दित्यर्थः‡ ॥ ३२ ॥

इतश्चाहंकारस्याऽनात्मधर्मत्वमित्याह आत्मधर्मत्वेति ॥ अस्तु तर्हि
नित्यत्वमपीत्यत आह नित्यत्वइति ॥ ३३ ॥

ननु यावद्द्रव्यभावित्वाभावे ऽपि श्यामत्वादेर्धर्मत्वं दृश्यते तस्मा-

---

* अनन्वयाच्च=अननुवृत्तत्वाच्च ॥

† नित्यत्वमित्यस्य प्राप्नुयादित्यत्र संबन्धः ।

‡ एवं चाहंप्रत्ययस्य बुद्धिधर्मत्वमेव, यावद्बुद्धिभावित्वान्नात्मधर्मत्वमिति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

आत्मादेः परिणामित्वाद्
गुणहानिर्गुणान्तरे ।
अविकारि तु तद् ब्रह्म
न हि द्रष्टुरिति श्रुतेः ॥ ३४ ॥

अहङ्कारस्यागमापायित्वात्तद्धर्मिणस्त्वानित्यत्वं प्राप्नोति—

आगमापायिनिष्ठत्वा-
दनित्यत्वमियाद्दृशिः* ।
उपयन्नपयन्† धर्मो
विकरोति हि धर्मिणम् ॥ ३५ ॥

दहङ्कारस्यानित्यत्वे ऽपि नित्यात्मधर्मत्वमुपपद्यतइति शङ्कते स्यादिति ॥ परिहरति तन्नेति। आत्मादिद्रव्यस्य परिणामित्वेन गुणान्तरोदयसंभवात्तेन स्वाभाविकस्यापि गुणस्य नित्यनिवृत्तिः संभवति, ब्रह्मणस्तु कूटस्थत्वेन गुणान्तराभावात्तद्धर्मस्याहङ्कारस्य न निवृत्तिः संभवति, ततश्चात्मनो नित्यत्वात्तद्धर्मस्याहङ्कारस्यापि नित्यत्वमेवेति भावः ॥ ३४ ॥

पूर्वमहङ्कारस्यानित्यत्वान्नित्यात्मधर्मत्वमनुपपन्नमित्युक्तम् । इदानीमात्मनो नित्यत्वादनित्याहङ्कारधर्मित्वमयुक्तमित्याह अहङ्कारस्य चेति ॥ आगमापायिनो ऽहङ्कारस्य निष्ठा स्थितिर्यस्मिन्नसौ आगमापायिनिष्ठस्तस्य भावस्तत्त्वं तस्मादित्यर्थः ॥ ३५ ॥

---

* दृशोरिति १ पुस्तके । २ पुस्तके तु ग्रन्थमध्ये दृशिरित्येव परमुपरि सूक्ष्माक्षरैर्दृशोरिति लिखितम् ॥

† उपयन्=प्रादुर्भवन् । अपयन्=तिरोभवन् ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अस्त्वनित्यत्वं कस्मादात्मनो नेष्यते इति चेत्? न—
ति चेत्तन्न—

सदाऽविलुप्तसाक्षित्वं
स्वतःसिद्धं न पार्यते ।
अपह्नोतुं घटस्येव
क्षणाग्रीयधिया ऽऽत्मनः ॥ ३६ ॥

एतस्माच्च हेतोरहङ्कारस्यानात्मधर्मत्वमवसीयता-
म्—

प्रमाणैश्चावगम्यत्वा-
द्वटादिवदहंदृशः ।
यतो राद्धिः प्रमाणानां
स कथं तैः प्रसिध्यति ॥ ३७ ॥

इदानीं सौगतमतमाशङ्कते अस्त्विति ॥ निरस्यति तन्नेति ॥ सति देहे तावदात्मनः प्रत्यभिज्ञया स्थायित्वावगमो नित्यत्वे चाकृता-भ्यागमकृतविप्रणाशादिदोषप्रसङ्गाद्, जातिस्मरणादिदर्शनान्मुख्ये-र्थे बाधाभावात्प्रत्यभिज्ञायाः सादृश्यनिबन्धनत्वकल्पनानुपपत्तेश्च नि-त्यत्वमात्मनः स्वतःसिद्धं निह्नोतुं न शक्यते इत्यर्थः ॥ ३६ ॥

प्रमाणैश्चेति ॥ अहमहङ्कारः प्रमेयत्वाद् दृशेरात्मनो घटादिवद्भ-वति । यथा प्रमाणगम्यो घटकरकादिरात्मनो धर्मो न भवति तदहङ्कारोऽप्यात्मनो धर्मो न भवतीत्यर्थः । नन्वात्मापि प्रमाण-गम्य एवेत्यत आह यत इति ॥ राद्धिः, सिद्धिः । प्रमाणानां सिद्धेः प्रागेव सिद्धत्वेनात्मनः प्रमाणसाधकत्वान्न प्रमाणाधीना तत्सिद्धिरि-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

धर्मधर्मिणोश्चेतरेतरविरुद्धात्मकत्वादसङ्गतिः—

धर्मिणश्च विरुद्धत्वा-
न्न दृश्यगुणसङ्गतिः ।
मारुतान्दोलितज्वालं
शैत्यं नाग्निं सिसृप्सति* ॥ ३८ ॥

तस्मादिदमुपगम्यताम्—

द्रष्टृत्वं दृश्यता चैव
नैकस्मिन्नेकदा क्वचित् ।
दृश्यदृश्यो न च द्रष्टा
द्रष्टृदर्शी दृशिर्न च ॥ ३९ ॥

त्यर्थः ॥ ३७ ॥

पूर्वं दर्शनक्रियां प्रत्यात्मनः कर्तृत्वात्तत्कर्मत्वाच्चाहङ्कारस्य न तयोर्धर्मधर्मिभाव इत्युक्तम् । इदानीं तु चिदचिद्रूपत्वेन शीतोष्णवद्विरुद्धस्वभावत्वान्न तयोर्धर्मधर्मिभाव इत्याह धर्मधर्मिणोश्चेति ॥ यथा शैत्यमग्नेर्धर्मो न भवति विरोधात्तद्वदहङ्कारोऽप्यात्मधर्मो न भवति विरोधादेवेत्यर्थः ॥ ३८ ॥

उक्तयुक्तिबलाद्द्रष्टृत्वदृश्यत्वे व्यवस्थिताधिकरणे एवेत्युपसंहरति तस्मादिति ॥ एवं च सत्येतदपि सिद्धमित्याह दृश्यदृश्य इति ॥ स्वदृश्येन विज्ञानेन स्वयमात्मा दृश्यो न भवति, दृशिश्च विज्ञानं स्वद्रष्टारमात्मानं न विषयीकरोतीति चैतद् द्वयं सिद्धं भवतीत्यर्थः । यद्वा तस्य दृश्यत्वासंभवादिति हेतुमाह दृश्यदृश्य इति ॥ द्रष्टुर्हि दृ-

---

* सिसृप्सति=उपगच्छति, संबध्यत इति यावत् ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सर्वसंव्यवहारलोपश्च प्राप्नोति, यस्मात्—

द्रष्टापि यदि दृश्याया
आत्मेयात्कर्मतां धियः ।
यौगपद्यमदृश्यत्वं
वैयर्थ्यं चाप्नुयाच्छ्रुतिः* ॥ ४० ॥

कुतो यस्मात्—

नालुप्तदृष्टेर्दृश्यत्वं
दृश्यत्वे द्रष्टृता कुतः ।

श्यत्वं वदता स्वेन दृश्येन दर्शनेन वा वक्तव्यमन्यस्याभावात्तत्र न तावत्स्वेन दृश्यत्वं संभवति, स्वात्मनि क्रियाविरोधात् । नापि दृश्येन दृश्यत्वं संभवति, जडस्य चेतनविषयीकरणायोगात् । नापि दृशिना विज्ञानेन दृश्यत्वं संभवति तस्य विषयगोचरस्य विषयिगोचरत्वायोगात् । ततश्च न द्रष्टुर्दृश्यत्वमित्यर्थः ॥ ३९ ॥

द्रष्टुर्दृश्यत्वे दृशेश्च द्रष्टृदर्शित्वे दोषमाह सर्वसंव्यवहारेति ॥ यदि द्रष्टा आत्मा स्वदृश्याया धियः कर्मतामियात्तदा द्रष्टापि दृश्यतइति स्यात्, तथा च बुद्ध्यात्मनोरुभयोरपि युगपदेकैकस्यैव द्रष्टृत्वं दृश्यत्वं स्यात्, तथा च सति द्रष्टृत्वादेवोभयोरदृश्यत्वं, दृश्यादृश्यत्वे चात्मनः कूटस्थद्रष्टात्मविषयायाः श्रुतेर्वैयर्थ्यं स्यादित्यर्थः ॥ ४० ॥

वैयर्थ्यमेवोपपादयितुमाह कुत इति ॥ लुप्तदृष्टेर्घटादेरेव दृश्यत्वनियमादात्मनोऽपि दृश्यत्वे दृष्टिलोपः स्यात्तथा च न हि द्रष्टुर्दृष्टे रित्यादिश्रुतेर्वैयर्थ्यं प्रसज्यतइत्यर्थः । ननु जानन्तं मां जा-

---

* न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ऽविनाशित्वादिति श्रुतिः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

स्याच्चेद्दृगेकं निर्दृश्यं
जगद्वा स्याद्साक्षिकम् ॥ ४१ ॥

उक्तयुक्तिं दृढीकर्त्तु*मागमोदाहरणोपन्यासः—

आर्त्तमन्यद्दृशेः सर्वं
नेति नेतीति वा ऽसकृत् ।
वदन्ती निर्गुणं ब्रह्म
कथं श्रुतिरुपेक्ष्यते ॥ ४२ ॥
महाभूतान्यहंकार
इत्येतत्क्षेत्रमुच्यते ।

नासीत्यनुभवाद् द्रष्टुरपि दृश्यत्वं दृश्यस्य च द्रष्टृत्वमित्याशङ्क्याह स्याच्चेद् दृगेकमिति ॥ तथा सति दृश्यस्य द्रष्टृत्वाविरोधाद् द्रष्टृस्वभावतापत्तौ सर्वं द्रष्टृरूपमेवासीदिति दृश्यशून्यो द्रष्टैवावशिष्येत । तथा चेद् द्रष्टुरपि दृश्यताविरोधाद् दृश्यस्वभावतापत्तौ सर्वं दृश्यमेवासीदिति द्रष्टृशून्यं जगदेवावशिष्येतेत्यर्थः ॥ ४१ ॥

उक्तन्यायस्य प्रशिथिलमूलत्वपरिहाराय मूलप्रमाणं दर्शयति उक्तयुक्तीति ॥ उदाह्रियत इत्युदाहरणं वाक्यं, तदुपन्यास इत्यर्थः । आर्त्तमन्यदिति । "नान्यो ऽतो ऽस्ति द्रष्टे"त्युपक्रम्या"तो ऽन्यदार्त"मिति द्रष्ट्रात्मव्यतिरिक्तस्य सर्वस्य दृश्यजातस्य विनाशित्वेन नित्यात्मधर्मत्वनिराकरणान्नेति नेतीति मूर्त्तामूर्त्तद्वयनिषेधाच्च सर्वदृश्यासंस्पर्शित्वमात्मनः प्रदर्शयन्ती श्रुतिर्नोपेक्ष्येत्यर्थः ॥ ४२ ॥

उक्तेऽर्थे स्मृतिरपि प्रमाणमित्याह महाभूतानीति ॥ महाभूतादि-

---

* उक्तयुक्तिदृढिम्ने इति २ पुस्तके का० सं० पु० ४ पुस्तकयोश्च लेखकप्रमादाल्लिखितं, परमुक्तयुक्तिद्रढिम्ने इति पाठान्तरं बोध्यम् ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

न ह्यद्वैतयोगो ऽस्ति
विश्वेश्वरमतादपि ॥ ४३ ॥

अधुना* प्रकृतार्थोपसंहारः—

एवमेतद्विरुग् ज्ञेयं
मिथ्यासिद्धमनात्मकम् ।
मोहमूलं सुदुर्बोधं
द्वैतं युक्तिभिरात्मनः ॥ ४४ ॥

कुतो मिथ्यासिद्धत्वं द्वैतस्येति चेत्—

न पृथङ्नात्मना सिद्धि-
रात्मनो ऽन्यस्य वस्तुनः ।

धृत्यन्तं सर्वं चेत्रमेवेति भगवता ऽप्युक्तत्वादात्मा समस्तप्रपञ्चशून्य इत्यवगम्यत इत्यर्थः ॥ ४३ ॥

एवं श्रुतिस्मृतिमूलयुक्तिसद्भावादहङ्कारादिः सर्वो ऽपि द्वैतप्रपञ्च आत्मनः सकाशाद्विलक्षण इत्युपसंहरतीत्याह ॥ अधुना प्रकृतेति ॥ विरुक्, पृथगित्यर्थः । नन्वात्मनः पृथक्त्वे ऽपि द्वैतं सांख्यानामिव पारमार्थिकं स्यादित्यत आह मिथ्यासिद्धमिति ॥ तथा ऽप्यन्यथाख्यातिप्रभृतीनामिव मिथ्यात्वं स्यादत आह अनात्मकमिति ॥ अनात्मकं सत्स्वभावरहितमित्यर्थः । सत्यात्मकार्यस्य कथमेवंविधत्वमित्यत आह मोहमूलमिति ॥ तदेव कथमित्यत आह सुदुर्बोधमिति ॥ प्रमाणयुक्तिभ्यां दुर्निरूपमित्यर्थः ॥ ४४ ॥

एतदेवोत्तरश्लोकेनोपपाद्यत इत्याह कुतो मिथ्यासिद्धत्वमिति ॥

---

* अधुना=अनात्मनः क्षेत्ररूपत्वेन साविकारत्वे सिद्धे इत्यर्थः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

आत्मवत्कल्पितस्तस्मा-
दहङ्कारादिरात्मनि ॥ ४५ ॥

तस्मादज्ञानविजृम्भितमेतत्—

दृश्याः शब्दादयः क्लृप्ता
द्रष्टृ च ब्रह्म निर्गुणम् ।
अहं तदुभयं बिभ्रद्
भ्रान्तिमात्मनि यच्छति* ॥ ४६ ॥

तत एवेयमभिन्नस्यात्मनो भेदबुद्धिः—

दृगेका सर्वभूतेषु
भाति दृश्यैरनेकवत् ।
जलभाजनभेदेन
मयूखस्त्विभेदवत्† ॥ ४७ ॥

न पृथगिति ॥ सद्रूपाज्ञानस्वभावादात्मनो ऽनन्यत्वादेव न पृथक्सत्ताप्रतीती जडस्य संभवतः । नापि प्रत्यगात्माभेदेन प्रत्यगात्मवत् सिद्धिः, जडाजडयोरभेदायोगात् । तस्मादहङ्कारादिरात्मनि कल्पित इत्यर्थः ॥ ४५ ॥

फलितमाह तस्मादिति ॥ दृश्यत्वेन सत्यत्वेनानृतत्वेनात्यन्तविविक्तयोरात्मानात्मनोर्वस्तुतः संभेदाभावे ऽप्यहङ्कारोपाधौ द्वयोः प्रतिबिम्बितत्वाद्दर्पणतले प्रतिबिम्बितयोर्लोहितमुखयोर्लोहितं मुखमिति परस्परसंभेदाध्यासवद् भ्रान्त्यैव कर्तृत्वादिसम्बन्धप्रतिभास इत्यर्थः ॥ ४६ ॥

---

* पूर्वश्लोकस्यार्थो नै० अ० २ श्लो० ५३ व्याख्यायां स्फुटीभविष्यति ॥

† नानाविधजलभाजनप्रतिबिम्बितः सूर्य इवैको ऽप्यात्मा देहभेदादनेक इव प्रतीयते भ्रान्तानामित्यर्थः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

यथोक्तार्थस्य प्रतिपत्तये दृष्टान्तः—

मित्रोदासीनशत्रुत्वं
यथैकस्यान्यकल्पनात् ।
अभिन्नस्य चितेस्तद्वद्
भेदोऽन्तःकरणाश्रयः ॥ ४८ ॥

अपहारो* यथा भानोः
सर्वतो जलपात्रकैः ।
तत्क्रियाकृतिदेशाप्ति-
स्तथा बुद्धिभिरात्मनः ॥ ४९ ॥

न केवलमनात्मसम्बन्ध एवाहंनिबन्धनः, प्रतिदेहमात्मनो भेदोऽपि तन्निबन्धन एवेत्याह तत एवेयमिति ॥ मयूखस्रग्वी, रश्मिमाली ॥ ४७ ॥

अन्तःकरणोपाधिनिबन्धनो भेद इत्यत्र दृष्टान्तान्तरमाह यथोक्तार्थेति ॥ यथैकस्यैव देवदत्तस्य पुरुषान्तरकल्पनावशान्मित्रोदासीनशत्रुत्वमेवमभिन्नस्यापि चैतन्यस्य बुद्ध्युपाधिनिबन्धनो भेदो न स्वतो नास्ति परत इत्यर्थः । चितेरित्यर्थविवक्षया धातुनिर्देशः । तत्रश्चाभिन्नस्य चितेरिति पुल्लिङ्गसमभिव्याहार उपपद्यते ॥ ४८

ननु स्वमहिमप्रतिष्ठस्य पूर्णस्य चैतन्यस्य सर्वान्तःकरणप्रतिबिम्बितत्वं तद्धर्मवत्त्वं चायुक्तमित्याशङ्क्याह अपहार इति ॥ यथा खमध्यस्थस्यैवादित्यस्य जलपात्रेण स्वगतत्वेनापहारस्तत्क्रियादिश्च भवति तद्वत्स्वमहिमप्रतिष्ठितस्यापि चैतन्यस्यान्तःकरणप्रतिबि-

---

* अपहारः=प्रतिबिम्बरूपेण ग्रहणम् ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

न च विरुद्धधर्माणामेकत्वानुपपत्तिः । किं कारणम्—

कल्पितानामवस्तुत्वा-
त्स्यादेकत्वापि संभवः ।
कमनीया शुचिः स्वाद्वी-
त्येकस्यामिव योषिति ॥ ५० ॥

न चायं क्रियाकारकफलात्मक आभास ईषदपि परमार्थवस्तु स्पृशति, तस्य मोहमात्रोपादानत्वात्—

स्थितत्वं, तत्क्रिया तद्गतध्यानादिक्रिया, तदाकृतिः, स्वच्छत्वपरिच्छिन्नत्वादिः, तद्देशेन हृदयप्रदेशेन च सम्बन्धश्च सम्भवतीत्यर्थः ॥ ४९ ॥

ननु सर्वभूतेष्वेक एव चेदात्मा तर्हि तस्य युगपदेव परस्परविरुद्धसुखदुःखरागद्वेषभ्रान्तिसम्यग्ज्ञानाद्याश्रयत्वं प्रसज्येत तच्चानुपपन्नं तत्कथमुक्तं दृगेकं सर्वभूतेष्विति तत्राह न च विरुद्धेति ॥ विरुद्धधर्माणामप्यविद्यापरिकल्पितत्वादेकस्मिन् धर्मिणि समावेशो नानुपपन्नः । यथैकस्मिन्नेव स्त्रीदेहे वस्तुभेदमन्तरेणापि वासनावशात्कामुकपरिव्राजकशुनां कमनीया, शुचिः, स्वाद्वी,ति विरुद्धधर्मपरिकल्पना तद्वदित्यर्थः* ॥ ५० ॥

विरुद्धधर्माणामात्मनि संभवे तस्यासङ्गत्वव्याघात इत्यत आह न चायमिति ॥ अनिर्वचनीयाज्ञानपरकल्पितद्वैतप्रपञ्चसम्बन्धे-

---

* एतदेवोक्तं पञ्चदश्याम्—
भार्या स्नुषा ननान्देति याता मातेत्यनेकधा ।
प्रतियोगिधिया योषिद् भिद्यते न स्वरूपतः ॥ इति ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अभूताभिनिवेशेन
स्वात्मानं वञ्चयत्ययम्* ।
असत्यपि द्वितीये ऽर्थे
सोमशर्मपिता यथा ॥ ५१ ॥

नात्मनो ऽसङ्गत्वं न व्याहन्यते वस्तुतस्तत्सम्बन्धाभावात् । न ह्यविद्यापरिकल्पितनीलिमगुणेन गगनं नीलीक्रियते ततश्च नासङ्गत्वव्याघात इत्यर्थः । अभूताभिनिवेशेनेति ॥ असत्यपि द्वैतप्रपञ्चे मिथ्याभिनिवेशेनैवाहं सुखी दुःखीति स्वमात्मानमयं लोको वञ्चयतीत्यर्थः । तत्र दृष्टान्तः सोमशर्मपितेति ॥ कश्चिदतिदरिद्रो ब्रह्मचारी बह्वाशी भिक्षमाणः कदा चिद्दुर्भिक्षकाले सक्तुमुष्टिं बद्ध्वा निर्वेदात्कस्मिंश्चित्पर्वते वृक्षच्छायायां शयान एवं मनोरथयति स्म । सक्तुमुष्टिबन्धनं मुक्त्वा तेन कांश्चन गाः क्रीत्वा वर्द्धयिष्यामि, ताश्च पञ्चषड्वत्सरादनेकाननडुहः प्रसविष्यन्ति, ततो यथेष्टं कर्षयिष्यामि, ततो धनधान्यादि समग्रं भविष्यति, ततो दासीदासादिबहुलं गृहं संपादयिष्यामि, ईदृशीं संपदं दृष्ट्वा योग्यतमः कश्चित्स्वकन्यां मह्यं प्रदास्यति, पश्चाद्यथाविधानं गार्हस्थ्यमनुभविष्यामि, ततो वंशकरं पुत्रमुत्पाद्य सोमशर्मेति नाम कृत्वा पश्चात्कुटुम्बसौख्यानुभवसमये रुदन्तं मातरमनुगतं सोमशर्माणं स्वकार्यपारवश्यात्तमनादृत्य गच्छन्तीं स्वां भार्यां दृष्ट्वा पुत्रनिमित्तकोपेन स्वां भार्यामताडयत्ततो भिक्षापात्रं कराघातात् द्विधा ऽपतत्सक्तवश्च वायुवेगादपासरन्, पश्चादहो कष्टं नष्टो ऽस्मि मन्दभाग्यो ऽहं सक्तवश्च ममापागच्छन् किं करिष्यामीति प्रबुद्धः सन् पिता व्यलपत् तदेतद् दृष्टान्त-

* अयं=जीवः । स्वात्मानम्=स्वरूपभूतमात्मानम् ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

वस्तुयाथात्म्यानवबोधपटलावनद्धाक्षः सन्—

सुभ्रूः सुनासा सुमुखी
सुनेत्रा चारुहासिनी।
कल्पनामात्रसंमोहा-
द्रामेत्यालिङ्गते ऽशुचिम् ॥ ५२ ॥

सर्वस्यानर्थजातस्य जिहासितस्य मूलमहंकार एव, तस्यात्मानात्मोपरागाद् न तु परमार्थत आत्मनो ऽविद्यया तत्कार्येण* वा संबन्धो ऽभूदस्ति भविष्यति वा, तस्यापरिलुप्तदृष्टिस्वाभाव्यात्—

दृश्यानुरक्तं तद्दृ
दृश्यं द्रष्टनुरञ्जितम्।

तयोदाहरतीत्यर्थः ॥ ५१ ॥

कल्पनाया अयथावस्तुव्यवहारहेतुत्वे दृष्टान्तान्तरमाह वस्तुयाथात्म्येति ॥ ५२ ॥

यदुक्त"मह्नं तदुभयं विभ्रद्भ्रान्तिमात्मनि यच्छती†"ति तत्प्रपञ्चयितुमाह सर्वस्येति ॥ आत्मनः कूटस्थनिर्विभागचैतन्यमात्रशरीरस्य द्वैतानर्थसम्बन्धहेतुरविद्यानिर्मितशरीरो ऽहंकार एव। कुतः, तस्याहंकारस्य द्वैतेनानर्थेनात्मना चोपरक्तत्वेन द्वैतस्यात्मनि प्रापकत्वादित्यर्थः। नन्वहंकारव्यतिरेकेणैवात्मनः सर्वैरपि सम्बन्धसंभवादनर्थः स्यादित्याशङ्क्य जानाम्यनुभवामीत्यनर्थरूपसम्ब-

---

* तत्कार्येण=अविद्याकार्येण, अहंकारादिनेत्यर्थः ॥

† नै॰ अ॰ २ श्लो॰ ॥ ४६ ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

अहंवृत्त्योभयं रक्तं
तन्नाशे ऽद्वैतमात्मनः ॥ ५३ ॥

इह केचिच्चोदयन्ति यो ऽयमन्वयव्यतिरेकाभ्यामनात्मतयोत्सारितो ऽहङ्कारो वाक्यार्थप्रतिपत्तये सो ऽयं विपरीतार्थः संवृत्तो यस्मादहं ब्रह्मास्मीति ब्रह्माहंपदार्थयोः सामानाधिकरण्यश्रवणाद् अनात्मार्थेन सामानाधिकरण्यं प्राप्नोति । लक्षणया च प्रत्यगात्मनि तस्य वृत्तिरिति सोच्यते प्रसिद्धलक्षणा* गुणवृत्तिः—

न्यः कालत्रये ऽप्यहंकारव्यतिरिक्ताधिष्ठानचैतन्ये न संभवतीत्याह न तु परमार्थत इति ॥ दृश्यानुरक्तमिति ॥ दृश्यैः शब्दादिभिरनुरक्तं संबद्धमन्तःकरणं स्वात्मनि प्रतिबिम्बितचैतन्याभासात्तेषां द्रष्टृ भवति । तदेव च कूटस्थात्मचैतन्यानुरञ्जितं सत्तस्य चैतन्यस्य दृश्यमवभास्यमिव भवति । तदेवमुक्तन्यायेनाहंवृत्त्योभयमपि द्रष्टृ दृश्यं चेत्येतदनुरक्तमहमिदं जानामीति । तेनात्यन्तविविक्तयोर्द्रष्टृदृश्ययोः संबन्धहेतुरहंकार एवेति तन्निवृत्तावात्मनो ऽद्वैतत्वं युक्तमित्यर्थः ॥ ५३ ॥

ननु तत्त्वमस्यादिवाक्यार्थप्रतिपत्त्यर्थं त्वंपदार्थशोधनत्वेनाहंकारस्यानात्मत्वमुक्तं तदयुक्तम् । तस्यानात्मत्वे ऽहं ब्रह्मास्मीति श्रूयमाणसामानाधिकरण्यानुपपत्तिप्रसङ्गादिति शङ्कते इह केचिदिति ॥ ननु न सामानाधिकरण्यश्रवणानुपपत्तिः । अहंशब्दस्य प्रत्यगात्मवाचि-

---

* प्रसिद्धिलक्षणेति १ पु० २ पुस्तके च । ४ पुस्तके तु प्रसिद्धा लक्षणेति पाठः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

नाज्ञासिषमिति प्राह
सुषुप्तादुत्थितोऽपि हि ।
अथोदाहादिवत्तेन
लक्षणं परमात्मनः ॥ ५४ ॥
प्रत्यक्त्वादतिसूक्ष्मत्वा-
दात्मदृष्ट्यनुशीलनात् ।
अतो वृत्तीर्विहायान्या
ह्यहंवृत्त्योपलक्ष्यते ॥ ५५ ॥

त्वोपपत्तेरित्याशङ्क्य तर्हि तस्य तत्र वृत्तिप्रकारो वाच्य इत्याह वक्तव्या चेति ॥ तत्र तावदहंशब्दस्य प्रत्यगात्मनि प्रसिद्धया मुख्यया वृत्त्या लक्षणया वृत्त्या गुणवृत्त्या च वृत्तिस्तां दर्शयन् परिहरति सोच्यतइत्यादिना ॥ तत्र लक्षणावृत्तिं तावद्दर्शयति नाज्ञासिषमिति ॥ सुषुप्त्यवस्थायामहंकाराभावे ऽपि नाहमज्ञासिषमिति केवलात्मन्यहंशब्दस्य प्रयोगदर्शनादहं ब्रह्मास्मीत्यत्राप्यहंकारसद्भावे ऽप्यहंशब्दस्य मुख्यार्थपरिग्रहे प्रमाणान्तरविरोधात् तत्संबद्धार्थान्तरे प्रत्यगात्मनि जहल्लक्षणावृत्त्या वृत्तिराश्रीयते । यथा अयो दहतीत्यत्रायःशब्दस्य मुख्यार्थपरिग्रहे दग्धृत्वप्रतीतिविरोधान्मुख्यार्थपरित्यागेन मुख्यार्थसम्बद्धार्थान्तरे च वन्हौ जहल्लक्षणया वृत्तिराश्रीयते तद्वदित्यर्थः ॥ ५४ ॥

इदानीमहंशब्दस्यात्मनि गुणवृत्तिमाह प्रत्यक्त्वादिति ॥ स्वव्यतिरिक्तसकलानात्मापेक्षया आन्तरत्वाद्, द्रव्यत्वे सति स्पर्शादिरहितत्वेन सूक्ष्मत्वाद्, अन्नमयकोशमारभ्य आत्मदृष्ट्यनुशीलनाच्चाहंकारगुणानामात्मनि विद्यमानत्वाद् घटादिविषयवृत्तीर्विहायाहंवृ-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

आत्मना चाविनाभाव-
मन्यथा विलयं व्रजेत् ।
न तु पक्षान्तरं यायाद्-
तश्चाहंधियोच्यते ॥ ५६ ॥

कीदृक् पुनर्वस्तु लक्ष्यम्—

नामादिभ्यः परो भूमा
निष्कलोऽकारकोऽक्रियः ।
स एवात्मवतामात्मा
स्वतःसिद्धः स एव नः ॥ ५७ ॥

त्त्या तच्छब्देन चोपलक्ष्यतइत्यर्थः । यद्वा आत्मदृष्ट्यनुशीलनादात्मनः स्वरूपभूतया दृष्ट्या अनुशीलनात्तदाभासोदयेन निरन्तरं सम्बन्धादित्यर्थः ॥ ५५ ॥

इदानीमन्तःकरणविशिष्टे अहंशब्दस्य मुख्यवृत्त्या ऽपि वृत्तिरस्तीत्याह आत्मनेति ॥ अहंकारो हि स्वस्थितावात्मना चाविनाभावं प्राप्नुयात्, अन्यथा तस्य नाश एव न पुनः पक्षान्तरमस्ति, न पुनर्विद्यमानस्यैवात्मव्यतिरेकेण क्षणमप्यवस्थानमस्ति, तथा चाहंशब्देनासौच्यतइत्यर्थः । अहंधिया, ऽहंधीहेतुना ऽहंशब्देनेति यावत् ॥ ५६ ॥

एवमहंशब्दवाच्यं दर्शितमिदानीं प्रश्नपूर्वकं लक्ष्यं दर्शयति कीदृगिति ॥ नामादिभ्यः प्राणान्तेभ्यः परो ऽन्यो"यत्र नान्यत्पश्यती"-त्यारभ्य"स भूमे"त्युक्तलक्षणो ऽत एव क्रियाकारकतत्साध्यफलशून्यः सर्वेषामात्मवतामात्मा स एव लक्ष्य इत्यर्थः । ननु प्रमाणान्तरसिद्धस्य लक्ष्यत्वाद् ब्रह्मणः प्रमाणान्तरसिद्ध्यभावात्कथं लक्ष्यत्वमित्याशङ्क्य

DR.RUPAK NATH (DR.RUPNATHJI)
www.astrology-tantra.com

अज्ञानोत्थबुद्ध्यादिकर्तृत्वोपाधिमात्मानं परिगृह्यैवान्वयव्यतिरेकाभ्यामहं सुखी दुःखी चेत्यहंकारादेरनात्मधर्मत्वमुक्तम् । केवलात्माभ्युपगमे ऽप्रसक्त्वात् फलाभावाच्च । अथेदानीमविद्यापरिकल्पितं साक्षित्वमाश्रित्य कर्तृत्वाद्यशेषपरिणामप्रतिषेधमाह—

एष सर्वधियां नृत्त*-
मविलुप्तैकदर्शनः ।
वीक्षते ऽवीक्षमाणो ऽपि†
निमिषत्तद्ध्रुवो ऽध्रुवम् ॥ ५८ ॥

लक्ष्यत्वे ऽन्वयव्यतिरेकेणैव सिद्धत्वं प्रयोजकं न तु प्रमाणान्तरसिद्धत्वं तच्चास्माकमस्तीत्याह स्वतःसिद्ध इति ॥ ५७ ॥

पूर्वं द्रष्टृन्वयदृश्यव्यतिरेकयोः प्रदर्शनेनाहंकारादेरनात्मत्वमुक्तम्, इदानीं साक्ष्यन्वयसाक्ष्यव्यतिरेकयोः प्रदर्शनेन द्रष्टृत्वादिव्यतिरेकः प्रदर्श्यतइत्याह अज्ञानोत्थेति ॥ अज्ञानोत्थो बुद्ध्यादिलक्षणः कर्तृत्वोपाधिर्यस्य तं प्रकारमात्मानमादायेत्यर्थः । किमित्यविद्याध्यारोपितं रूपमङ्गीकृतमित्यत आह केवलेति ॥ शुद्धचैतन्यस्यान्वयव्यतिरेकव्यवहारायोग्यत्वाद् व्यवहारसाध्यफलाभावाच्चेत्यर्थः । अथेदानीमिति ॥ परिणामिबुद्ध्युपाधिप्रयुक्तद्रष्टृन्वयव्यतिरेकेणानाद्यविद्योपाधिप्रयुक्तं साक्षित्वमाश्रित्य कर्तृत्वादिप्रतिषेधः क्रियतइत्यर्थः । एषमात्मा अविलुप्तैकदर्शनः अपरिणाम्यद्वयचित्स्वभावः, सर्वासां धियां नृत्तं निमिषज्जडं वीक्षते । तथा स्वयं ध्रुवो

---

* सर्वधियां वृत्तमिति ४ पुस्तके पाठः ॥

† वीक्षते ऽवीक्ष्यमाणो ऽपीति २ पुस्तके । ४ पुस्तके तु वीक्ष्यते ऽवीक्ष्यमाणोऽपीति पाठः ॥

DR.RUPNATHJI (DR.RUPAK NATH)

www.astrology-tantra.com

ननु सर्वसिद्धान्तानामपि स्वदृष्ट्यपेक्षयोपपन्नत्वादितरेतरदृष्ट्यपेक्षया च दुःस्थितसिद्धिकत्वान्नैकत्रापि विश्वासं पश्यामो, न च सर्वतार्किकैरदूषितमसमर्थितं च। अतो न सर्वतार्किकोपद्रवापसर्पणाय वर्त्म संभावयामः। उच्यते। विस्रब्धैः संभाव्यतामनुभवमात्रशरणत्वात्सर्वतार्किकप्रस्थानानां, तदभिधीयते—

इमं प्राश्निकमुद्दिश्य
तर्कज्वरभृशातुराः।
त्वाच्छिरस्कवचोजालै*-
र्मोहयन्तीतरेतरम् ॥ ५९ ॥

ऽध्रुवं वीक्षतइत्यर्थः। वीक्षते ध्रुवत्वात्परिणामित्वप्रसक्तावाह अवीक्षमाणो ऽपीति॥ कर्तृत्वशून्य एव स्वात्मोपरक्तं स्वरूपेणैवादित्यवदवभासयतीत्यर्थः॥ ५८॥

उत्तरश्लोकव्यावर्त्यामाशङ्कामाह ननु सर्वेति॥ सर्वेषां सिद्धान्तानामन्योन्यपराहतत्वान्न कुत्रापि विश्वासः कर्त्तुं शक्यतइत्यर्थः। ननु सर्ववादिनां क्वचित्संप्रतिपत्तिसंभवात्तत्र विश्वासो ऽस्त्वित्यत आह न चेति॥ श्लोकमवतारयन्परिहरति उच्यते इति॥ अनुभवस्तावत्सर्ववादिसंप्रतिपन्नस्तत्र न कस्यापि विप्रतिपत्तिः, स चास्माकमात्मा, तत्र सर्वैर्विश्वासः कर्त्तव्यः सर्वैरभ्युपगतत्वादित्यर्थः। इममिति॥ अनुभवमेव प्राश्निकं गुणदोषसाक्षिणं मध्यस्थमुद्दिश्य सर्ववादिनो ऽमुकत्वादमुकत्वादिति हेतुजालैरितरेतरं मोहयन्ति तस्मात्त-

---

* स्वशिरस्कवचोजालैरिति ४ पुस्तके व्याख्याकाराऽसंमतः पाठः॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

अत्रापि चोदयति । अनुभवात्मनो ऽपि विक्रियाभ्युपगमे ऽनभ्युपगमे ऽपि दोष एव यस्मादाह—

वर्षातपाभ्यां किं व्योम्न-
श्चर्मण्यैव तयोः फलम् ।
चर्मोपमश्चेत्सो ऽनित्यः
खतुल्यश्चेदसत्समः ॥ ६० ॥

बुद्धिजन्मनि पुंसश्च
विकृतिर्यद्यनित्यता ।
अथाविकृतिरेवायं
प्रमातेति न युज्यते ॥ ६१ ॥

अस्य परिहारः—

स्मिन् प्राश्निके नाविश्वास इत्यर्थः ॥ ५९ ॥

अनुभवरूपे ऽप्यात्मनि विवादं दर्शयन् शङ्कते अत्रापीति ॥ विकारहेतौ सत्यपि विकार्यस्यैव चर्मणो विकारो दृश्यते न त्वविकार्यस्य व्योम्नः । तथा च सति भवदभिमत आत्मापि चर्मवद्विकार्यो नभोवदविकार्यो वा, उभयथापि दोष एवेत्याह वर्षातपाभ्यामिति ॥ असत्समः, अप्रमातृत्वप्रसङ्ग इत्यर्थः ॥ ६० ॥

एतदेव स्पष्टयति बुद्धिजन्मनीति ॥ घटादिविषयज्ञानोत्पत्तौ यद्यात्मा विक्रियते* तर्ह्यनित्यत्वं स्यान्न विक्रियते चेत्प्रमातृत्वाभावः† इत्यर्थः ॥ ६१ ॥

प्रतिबन्दी न्यायेनाक्षेपं परिहरति अस्य परिहार इति ॥ धू-

---

* आत्मनो बुद्ध्यवच्छिन्नत्वादिति भावः ॥

† अन्तःकरणावच्छिन्नचैतन्यस्यैव प्रमातृपदार्थत्वादिति भावः ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

ऊर्ध्वं गच्छति धूमे खं
भिद्यते स्विन्न भिद्यते ।
न भिद्यते चेत्स्यात्स्नुत्वं
भिद्यते चेद्भिदा ऽस्य का ॥ ६२ ॥

इत्येतत्प्रतिपत्त्यर्थं*माह—

अविक्रियस्य भोक्तृत्वं
स्यादहंबुद्धिविभ्रमात् ।
नौयानविभ्रमाद्यद्व-
न्नगेषु गतिकल्पनम् ॥ ६३ ॥

यथोक्तार्थाविष्करणाय दृष्टान्तान्तरोपादानम्—

मे ऊर्ध्वं गच्छति सति खमाकाशमवकाशदानाय भिद्यते विदीर्णं भवति वा न वा, न भवति चेद्धूमस्य स्यास्नुत्वं नोर्ध्वगतिः स्यात्, भवति चेत्का ऽस्य भिदा न का चिद् विभागलक्षणा क्रिया, समवायित्वाभावात्, तत्र च भेदादिविकारमन्तरेणैवाकाशमवकाशस्वरूपेणैव दृश्यतइत्यर्थः ॥ ६२ ॥

एतावता किमुक्तं भवतीत्यत आह इत्येतदिति ॥ अहंबुद्धिरहंप्रत्ययस्तन्निमित्तो विभ्रमो ऽहंबुद्धिविभ्रमः, तस्मात्सुखदुःखादिपरिणामत्वेन भोक्त्रन्तःकरणेनाभेदाध्यासादहं भोक्तेति विभ्रमो भवेत् । यथा नौयाननिमित्तो विभ्रमो नौयानविभ्रमः, तस्मात्तीरस्थेषु नगेषु गमनरहितेषु गच्छन्ति वृक्षा इत्यध्यवसायस्तद्वदित्यर्थः ॥ ६३ ॥

कूटस्थरूपेणैव परमात्मा ऽहंकारादिद्वैतप्रपञ्चमवभासयति न

---

* आकाशवदात्मनो निर्विकारत्वप्रतिपत्त्यर्थमित्यर्थः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

यथा जात्यमणेः शुभ्रा
ज्वलन्ती निश्चला शिखा* ।
संनिध्यसंनिधानेषु
घटादीनामविक्रिया ॥ ६४ ॥

अयमत्रांशो विवक्षित इति ज्ञापनायाह—

यद्वस्था व्यनक्तीति
तद्वस्थैव सा पुनः ।
भण्यते न व्यनक्तीति
घटादीनामसंनिधौ ॥ ६५ ॥

तत्र च—

विकारमापद्यते इत्यत्र विभ्रमदृष्टान्तव्यतिरेकेण वास्तवदृष्टान्तो ऽप्यस्तीत्याह यथोक्तार्थेति ॥ जातौ भवो जात्यस्तस्य मणेः शिखा प्रकाश्यघटादिसंनिधावसंनिधावप्यविक्रिया विकारशून्या, तद्वदात्मापीत्यर्थः ॥ ६४ ॥

ननु तत्र शिखायाः स्वरूपेणाविक्रियत्वमसंप्रतिपन्नमित्याशङ्क्य तद्दर्शयति अयमत्रेति। अयमत्र दृष्टान्ते दार्ष्टान्तिकोपयोगी विवक्षितोंश इति प्रतिज्ञापनायेत्यर्थः। यद्वस्थेति ॥ यद्वस्थावती शिखा व्यनक्तीति भण्यते तद्वस्थावत्येव न व्यनक्तीत्यपि भण्यते घटाद्यसंनिधानात्। ततश्च प्रकाश्यसंनिध्यसंनिधिभ्यां व्यनक्ति न व्यनक्तीति व्यपदेशो न तु विकारतदभावाभ्यां, तस्मात्स्वरूपेणाविक्रियत्वं सिद्धमित्यर्थः ॥ ६५ ॥

---

* ज्वलन्ती=भास्वरा। शिखा=कान्तिः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सर्वधीव्यञ्जकस्तद्-
त्परमात्मा प्रदीपकः* ।
संनिध्यसंनिधानेषु
धीवृत्तीनामविक्रियः ॥ ६६ ॥
न प्रकाशक्रिया का चि-
दस्य स्वात्मनि विद्यते ।
उपचारात्क्रिया साऽस्य
यः प्रकाश्यस्य संनिधिः ॥ ६७ ॥

मैवं शङ्किष्ठाः सांख्यराद्धान्तोऽयमिति । यतः—

यथा विशुद्ध आकाशे
सहसैवाभ्रमण्डलम् ।

दृष्टान्तगतमर्थं दार्ष्टान्तिके समर्पयति तद्वच्चेति ॥ परमात्मा प्रकाशोऽपि तद्वद्धीवृत्तीनां संनिध्यसंनिधाने निर्विकार एव सर्वधीव्यञ्जको न व्यङ्ग्य इति चोच्यते इत्यर्थः ॥ ६६ ॥

एतदेव प्रपञ्चयति न प्रकाशेति ॥ ननु प्रकाशक्रियाऽभावे धीवृत्तीः प्रकाशयतीति कर्तृत्वव्यपदेशो न स्यादित्याशङ्क्य जन्यक्रियाभावेऽपि आदित्यानामिव प्रकाश्यसंनिध्युपाधिकः प्रकाशयतीति कर्तृत्वव्यपदेश उपचाराद्भवतीत्याह उपचारादिति ॥ ६७ ॥

नन्वनात्मैव संसरति नात्मा, आत्मा तु कूटस्थविज्ञानधातुः समस्तबुद्धिवृत्तिसाक्षी सकलसंसारधर्मातीत इति सांख्यसिद्धान्तोऽयं भवता सिद्धान्तत्वेन स्वीकृत इत्याशङ्क्य ततो वैषम्यं दर्शयितु-

---

* परमात्मप्रदीपक इति ४ पु० पाठः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

भूत्वा विलीयते तद्-
दात्मनीहाखिलं जगत् ॥ ६८ ॥

तस्मादेष कूटस्थो न द्वैतं मनागपि स्पृशति । यतः—

शब्दाद्याकारनिर्भासाः
क्षणप्रध्वंसिनीदृशा ।
नित्यो ऽक्रमदृगात्मैको
व्याप्नोतीव धियो ऽनिशम् ॥ ६९ ॥

एवं च सति बुद्धेः परिणामित्वं युक्तम्—

अतीतानागतेहत्यान्
युगपत्सर्वगोचरान् ।

माह नैवमिति ॥ यथा विशुद्धइति ॥ अस्य द्वैतेन्द्रजालस्यात्माज्ञानविवर्तत्वादात्ममात्रं जगदिति वेदान्तसिद्धान्तः । न चैवमभ्युपगम्यते सांख्यैः । अन्यदेव किं चिदचेतनं त्रिगुणं प्रधानं तदेव जगतः कारणं तच्च स्वतन्त्रं, प्रपञ्चश्च पारमार्थिक इति सांख्याभ्युपगमात् । ततो महदस्ति वैषम्यमित्यर्थः ॥ ६८ ॥

"भूत्वा विलीयते" इत्युक्तत्वात्प्राग्विलयादात्मसंस्पर्शो ऽभ्युपगम्यतइति शङ्कां परिहर्तुमाह तस्मादेष इति ॥ कुतो न स्पृशतीत्याशङ्क्य श्लोकेन हेतुमाह यत इति ॥ एवं विशिष्टा बुद्धिवृत्तीर्नित्यो ऽक्रमदृक् परमात्मैक एव दृशा स्वरूपचैतन्येन व्याप्नोतीव यस्मात्तस्मादयमात्मा समस्तद्वैतसंस्पर्शरहित इत्यर्थः ॥ ६९ ॥

कस्तर्हि घटादिज्ञानाकारेण परिणमतइत्यत आह एवं चेति ॥ आत्मनः समस्तद्वैतासंस्पर्शित्वे सति बुद्धेः परिणामित्वं युक्त-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

वेत्त्यात्मवन्न धीर्यस्मा-
त्तेनेयं परिणामिनी ॥ ७० ॥

ततश्चैतत्सिद्धम्—

अपश्यन् पश्यतीं बुद्धि-
मशृण्वन् शृण्वतीं तथा ।
निर्मलोऽविक्रियोऽनिच्छ-
न्निच्छन्तीं चाप्यलुप्तदृक्* ॥ ७१ ॥
द्विषन्तीमद्विषन्नात्मा
कुप्यन्तीं चाप्यकोपनः ।
निर्दुःखो दुःखिनीं चैव
निःसुखः सुखिनीमपि ॥ ७२ ॥
असुह्यमानो मुह्यन्तीं
कल्पयन्तीमकल्पयन् ।

मित्यर्थः । बुद्धेः परिणामित्वे हेतुमाह अतीतानागतेहत्यानिति ॥ अतीतांश्च अनागतांश्च इहत्यांश्च अतीतानागतेहत्यास्तान्, सर्वे च ते गोचराश्चेति सर्वगोचरास्तान्, बुद्धिरात्मवद्युगपद्यस्मान्न वेत्ति तस्मात् क्रमदृष्ट्वादियं च परिणामिनीति क्रमवत्क्षतिपयसिद्धकार्यदर्शनान्यथानुपपत्त्या क्रमवत्क्षतिपयपरिणामः कल्प्यत इत्यर्थः ॥७०॥

आत्मनः पुनर्दर्शनश्रवणादिविक्रियारहितस्य दर्शनश्रवणादिविक्रियावदशेषबुद्धिसाचित्वमपि सिद्धमित्याह ततश्चेत्यारभ्य श्लोकपञ्चकेन ॥ समक्षपरोक्षयोर्विषयभेदात्कोपद्वेषयोर्विशेषो द्रष्टव्यः ।

---

* अलुप्तदृक्—स्वतःप्रकाश इत्यर्थः ॥

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

स्मरन्तीमस्मरंश्चैव
शयानामस्वपन्मुक्तः ॥ ७३ ॥
सर्वाकारां निराकारः
स्वार्थो ऽस्वार्थां निरिङ्गनः ।
निस्त्रिकालस्त्रिकालस्थां*
कूटस्थः क्षणभङ्गुराम् ॥ ७४ ॥
निरपेक्षश्च सापेक्षां
पराचीं प्रत्यगद्वयः ।
सावधिं निर्गतेयत्तः
सर्वदेहेषु पश्यति ॥ ७५ ॥

एतस्माच्च कारणादयमर्थो व्यवसीयताम्—

स्व एवार्थो यस्य सः स्वार्थः । स्वेन ममत्वेन गृहीतः पुत्रादिरर्थो यस्याः सा ऽस्वार्था । निरिङ्गनः, अपरिस्पन्दः ॥७१॥ ७२॥ ७३॥ ७४॥ ७५॥†

दुःखादीनां साक्षित्वादप्यात्मनो न दुःखाद्याकारपरिणामो युक्त इत्याह एतस्माच्चेति ॥ ननु दुःख्येव साक्षी भवेदित्यत आह

---

* निस्त्रिकालः=सार्वकालिको ऽनादिरिति यावत् । त्रिकालस्थाम्=कालविशेषस्थां, सादिम् । कूटस्थः=अविनश्वरः ॥

† अत्रोपरि "श्लोकपञ्चकेने"त्यस्याग्रे अपश्यन्निततीति प्रतीकमुपन्यस्य(७१) अङ्कः, द्विषन्तीमिति प्रतीकं विलिख्य 'समक्षे'त्यादि 'द्रष्टव्य'इत्यन्तग्रन्थोत्तरं(७२)अङ्कः, 'अमुह्यमाना'मिति प्रतीकमात्रं प्रदर्श्य (७३) अङ्कः, 'सर्वाकारा'मिति प्रतीकमादाय 'स्वएवार्थ' इत्याद्यपरिस्पन्द इत्यन्तग्रन्थोत्तरं (७४) अङ्कः, तदुत्तरं 'निरपेक्षश्चे'ति प्रतीकमादाय (७५) अङ्क इति क्रमेण २ पुस्तके पाठः। प्रतीकमात्रमत्र पृथगुपन्यस्तं नास्ति तद्व्याख्येति १ पुस्तकानुरोधात् 'ततश्चेत्यारभ्ये'त्यादि श्लोकपञ्चकस्य व्याख्याकारेण समस्तैव प्रतीकग्रहणादुपरितन एव पाठो ऽत्र स्थापितः ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

दुःखी* यदि भवेदात्मा
कः साक्षी दुःखिनो भवेत् ।
दुःखिनः साक्षिता ऽयुक्ता
साक्षिणो दुःखिता तथा ॥ ७६ ॥

पूर्वस्यैव व्याख्यानार्थमाह—

नर्ते स्याद्विक्रियां दुःखी†
साक्षिता का विकारिणः ।
धीविक्रियासहस्राणां
साक्ष्यतो ऽहमविक्रियः ॥ ७७ ॥

एवं सर्वस्मिन्व्यभिचारिण्या‡त्मवस्त्वेवाऽव्यभिचारीत्यनुभवतो व्यवस्थापनायाह—

प्रमाणतन्निभेष्वेवं
नोच्छिद्यतेऽस्य संविदः ।

दुःखिन इति ॥ ७६ ॥

दुःखिनः साक्षित्वं कथमयुक्तमित्याकाङ्क्षायां तत्र हेतुरुच्यते इत्याह पूर्वस्येति ॥ दुःखित्वं नाम विकारित्वं, विकारिणः साक्षित्वमनुपपन्नम्, आत्मा च समस्तबुद्धिवृत्तिसाक्षी, तस्मान्निरस्तसमस्तपरिणाम इत्यर्थः ॥ ७७ ॥

न केवलं युक्तिमात्रसिद्धमेतत्किं तु विद्वदनुभवसिद्धमित्याह

---

* दुःखी=दुःखादिपरिणामसहित इत्यर्थः । न ऋते इति च्छेदः ॥

† विक्रियाम्=उत्पत्त्यादिकामित्यर्थः ॥

‡ व्यभिचारिणि=मिथ्यारूपे ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

मत्तोऽन्यद्रूपमाभाति
यत्तत्स्यात्क्षणभङ्गि हि ॥ ७८ ॥
उत्पत्तिस्थितिभङ्गेषु
कुम्भस्य वियतो यथा ।
नोत्पत्तिस्थितिनाशाः स्यु-
र्बुद्धेरेवं ममापि न* ॥ ७९ ॥

सुखदुःखतत्संबन्धानां च प्रत्यक्षत्वान्न ध्वनाभावाग्राह्यमेतत् —

सुखदुःखादिसंबद्धां
यथा दण्डेन दण्डिनम् ।

एवं सर्वस्मिन्निति ॥ प्रमाणतन्निभेषु, प्रमाणतदाभासेषु† बुद्धिपरिणामेषु व्यभिचारिषु तदनुयायिनः संविद्रूपस्य साक्षिरूपस्य मम नोच्छित्तिः संभवति, उच्छेदसाक्षित्वेनापि स्फुरणात्ततो मद्व्यतिरिक्तं यन्मत्संबन्धितया प्रतीयते तदुच्छिद्येत नात्मेत्यर्थः ॥ ७८ ॥

उक्तमेवार्थं दृष्टान्तेनोपपादयति उत्पत्तीति ॥ बुद्धेरेवमिति ॥ बुद्धेरुत्पत्त्यादौ ममोत्पत्त्यादिर्नास्तीत्यर्थः‡ ॥ ७९ ॥

सुखदुःखादिपरिणामानामनात्मधर्मत्वमप्यनुभवसिद्धमित्याह सुखदुःखेति ॥ सुखदुःखादेरहंकारसंबन्धोऽहं सुखीत्यादिप्रत्यक्षसिद्ध इत्यर्थः । सुखदुःखादिसंबद्धामिति ॥ यथा दण्डेनासंहत-

---

* ममापि नेति का० स० पुस्तके २ पुस्तके च । ४ पुस्तके तु ममापि नो इति पाठः ॥

† प्रमाणम्=अन्तःकरणवृत्तयः । तदाभासा विपर्ययवृत्तयः ॥

‡ साक्षित्वादिति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

राधको वीक्षते बुद्धिं
साक्षी तद्वदसंहतः ॥ ८० ॥

एतस्माच्च हेतोर्धियः परिणामित्वं युक्तम्—

येनैवास्या भवेद्योगः
सुखकुम्भादिना धियः ।
तं विदन्ती तदैवान्यं
वेत्ति ना*तो विकारिणी ॥ ८१ ॥

अस्याश्च क्षणभङ्गुरत्वे स्वयमेवात्मा साक्षी । न हि कूटस्थाऽवबोधमन्तरेण बुद्धेराविर्भावतिरोभावादि-

---

स्तटस्थ एव सन् कश्चिद्राधकः साधकः द्रष्टा दण्डिनं वीक्षते तद्वदयमपि साक्षी सुखादिधर्मविशिष्टां बुद्धिं सुखादिभिरसंहतस्तटस्थ एव सन् वीक्षते इत्यर्थः ॥ ८० ॥

बुद्धेः परिणामित्वेन "अतीतानागतेष्वा†"निति सूचितं क्रमद्रष्टृत्वं कतिपयद्रष्टृत्वं च प्रपञ्चयति एतस्माच्चेति ॥ यदा बुद्धिर्बाह्येन कुम्भादिना आन्तरेण सुखादिना च संबद्धा सती कुम्भादिकं वेत्ति तदैव पटादिकं दुःखादिकं च न वेत्ति ततो बुद्धिर्विकारिणीत्यर्थः ॥ ८१ ॥

केन तर्हि प्रमाणेन बुद्धेः परिणामित्वमवगम्यते इत्याशङ्क्याह अस्याश्चेति ॥ अस्याः क्षणभङ्गुरत्वे स्वयमात्मैव साक्षी प्रमाणमित्यर्थः । ननु बुद्धिः स्वयमेव स्वभावाभावौ साधयेत्किं साक्षिणेत्याशङ्क्य

---

* न वेत्ति=न विषयीकरोति । क्रमेण सुखाकारेण परिणता सती घटाद्याकारेण परिणमतीत्यर्थः ॥

† नै० अ० २ श्लो० ७० ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सिद्धिरस्ति—

परिणामिधियां वृत्तं
नित्याक्रमदृगात्मना।
षड्भावविक्रियामेति
व्याप्तं खेनाङ्कुरो यथा॥ ८२॥

सत आत्मनश्चाविकारित्वे युक्तिः—

स्मृतिस्वप्नप्रबोधेषु
न कश्चित्प्रत्ययो धियः।
दृशाऽव्याप्तोऽस्त्यतो
नित्यमविकारी स्वयं दृशिः॥ ८३॥

स्वभावस्य स्वग्राह्यत्वे कर्मकर्तृविरोधप्रसङ्गात् स्वाऽभावस्य स्वयमेव साधकत्वे सुषुप्त्यभावप्रसङ्गाद् आत्मैव सर्वकल्पनाधिष्ठानतया साधक इत्यपरात्मत्वमित्याह न हि कूटस्थेति॥ यद्वा बुद्धेः परिणामित्वे तद्विषयस्यात्मनोऽपि परिणामिता स्यादित्यत आह अस्याश्चेति॥ बुद्धिपरिणामसाक्षित्वादात्मा न परिणामीत्यर्थः। कथं बुद्धिपरिणामसाक्षित्वमात्मन इत्यत आह न हीति॥ परिणामिधियामिति॥ यथाऽऽकाशेन व्याप्त एवाङ्कुरो जायते तद्वन्नित्याक्रमदृगात्मना व्याप्तमेव परिणामिधियां वृत्तं स्वरूपं षड्भावविक्रियां प्राप्नोति तस्मादात्मैव बुद्धिपरिणामसाधक इत्यर्थः॥ ८२॥

एवं बुद्धेर्विकारित्वमुपपाद्येदानीमविकारित्वमात्मन उपपादयति सत आत्मनश्चेति॥ धियः प्रत्ययेषु स्मृतिविपर्यासप्रमाणात्मकेषु मध्ये कश्चिदपि प्रत्ययश्चैतन्येनाव्याप्तो नास्ति* ततः समस्तबु-

---

* तदव्याप्तौ प्रत्ययस्यैवासंभवादिति भावः॥

एवं तावत्पराभ्युपगतप्रक्रियाप्रख्यानेन निरस्ताशेषविकारैकात्म्यं प्रतिपादितमुपपत्तिभिः। अथाधुना श्रौतीं प्रक्रियामवलम्ब्योच्यते—

अस्तु वा परिणामो ऽस्य
दृशेः कूटस्थरूपतः।
कल्पितो ऽपि स्वपैवासौ
दण्डस्येवास्तु वक्रता ॥ ८४ ॥

षट्सु भावविकारेषु*
निषिद्धेष्वेवमात्मनि।
दोषः कश्चिदिहाशङ्क्यस्तु
न शक्यस्तार्किकैरपि ॥ ८५ ॥

द्विवृत्तिसाक्षित्वादात्मा कूटस्थ एवेत्यर्थः ॥ ८३ ॥

"एष सर्वधियां नृणां"†मित्यारभ्य सांख्यसिद्धान्तमवलम्ब्य बुद्धिरेव परिणामिनी नात्मा स तु कूटस्थ इति दर्शित,मिदानीमात्मनः परिणामाभ्युपगमे ऽपि तस्य मायामयत्वान्न कश्चिद्दोष इति स्वसिद्धान्तमवलम्ब्याह एवं तावदिति ॥ अस्तु वेति ॥ आन्तरो बाह्यश्चात्मनः परिणामः कल्पितो ऽप्यङ्गीकृतो ऽप्यस्तु तथापि तस्यात्मनः कूटस्थरूपत्वादसावविद्यानिबन्धन एव न तु परमार्थतः, तस्मान्न कश्चिद्विरोध इत्यर्थः ॥ ८४ ॥

एवमात्मनः षड्भावविकाररहितत्वप्रतिपादनेन कर्तृत्वभोक्तृत्वा-

---

* जन्मादिष्वित्यर्थः ॥

† नै० अ० २ श्लो० ५८ ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

प्रकृतमेवोपादाय बुद्धेः परिणामित्वमात्मनश्च कूटस्थत्वं युक्तिभिरुच्यते—

प्रत्यर्थं तु विभिद्यन्ते
बुद्धयो विषयोन्मुखाः।
न भिदा ऽवगतेस्तद्व-
त्सर्वास्वास्विन्निभा यतः॥ ८६॥

स्वसंबद्धार्थं एव*—

सावशेषपरिच्छेदि-
न्यत एव न कृत्स्नवित्।
नो चेत्परिणमेद्बुद्धिः
सर्वज्ञा सा ऽऽत्मवद्भवेत्॥ ८७॥

दिसर्वानर्थसंबन्धो ऽपि तस्य निराकृतो द्रष्टव्य इत्याह षट्स्विति॥ ८५॥

प्रकृतमेवोपादाय श्रौतमेव मतमालम्ब्येत्यर्थः। सांख्यसिद्धान्तमेवावलम्ब्येति केचित्। प्रत्यर्थं त्विति॥ यथा प्रतिविषयं बुद्धयः स्वतो भिद्यन्ते तद्वदवगतेश्चैतन्यस्य न भेदो ऽस्ति चिदाकारत्वात् सर्वासां बुद्धिवृत्तीनां, तस्माद्घटपटादिबुद्ध्युपाधिभेदपरामर्शमन्तरेण स्वतो भेदानवभासाद् उपाधिपरामर्शमन्तरेणाविभाव्यमानभेदस्येव नभसः स्वतः एकत्वमेवं चैतन्यस्येत्यर्थः॥ ८६॥

बुद्धेः परिणामलक्षणधर्मसंबन्धप्रतिपादनायोत्तरश्लोक इत्याह स्वसंबद्धार्थ इति॥ बुद्धिः परिणामिनीति यतः, अत एव कतिपयप-

---

* उच्यते इति शेषः॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अतो ऽवगतेरेकत्वात्—

चण्डालबुद्धेर्यद् द्रष्टृ
तदेव ब्रह्मबुद्धिदृक् ।
एकं तदुभयोर्ज्योति-
र्भास्यभेदादनेकवत् ॥ ८८ ॥

कस्मात्—

अवस्थादेशकालादि-
भेदो नास्त्यनयोर्यतः ।
तस्माज्जगद्धियां वृत्तं
ज्योतिरेकं सदेक्षते ॥ ८९ ॥

सर्वदेहेष्वात्मैकत्वे प्रतिबुद्धपरमार्थतत्त्वस्यापि अप्रतिबुद्धदेहसंबन्धाद्दुःखसंबन्ध इति चेत् तन्न—

रिच्छेदिनी भूत्वा न कृत्स्नविद्भवति। यदि न परिणमेत्तदा सर्वज्ञा स्यात् ततः परिणामिनी बुद्धिरित्यर्थः ॥ ८७ ॥

अवगतेरेकत्वमस्तु ततः किमित्यत आह अतो ऽवगतेरिति ॥ आत्मैक्यं पूर्वमुपपादितं सिध्यतीत्यर्थः । अनेकत्वप्रतीतेरन्यथासिद्धिमाह भास्येति ॥ ८८ ॥

भेदस्य वास्तवत्वं कस्मान्न स्यादित्याशङ्क्य भेदकाभावादिति परिहरति कस्मादित्यादिना ॥ आदिशब्देन भेदका गुणादयो गृह्यन्ते तेषामवस्थादीनां साक्ष्यत्वान्न साक्षिभेदकत्वमित्यर्थः ॥ ८९ ॥

ननु यद्देहस्थे मनसि यस्य ब्रह्मत्वं भाति ततो देहान्तरस्थे मनसि तदभावात्तद्गतदुःखादिसंबन्धात् दुःखी सुखी

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

बोधात्प्रागपि दुःखित्वं
नान्यदेहोत्थमस्ति नः ।
बोधादूर्ध्वं कुतस्तत्स्या-
द्यत्र स्वगतमप्यसत्* ॥ ९० ॥

न चेयं स्वमनीषिकेति ग्राह्यं, कुतः, श्रुत्यवष्टम्भात्—

शब्दाद्याकारनिर्भासा
हानोपादानधर्मिणी ।

स्यादिति शङ्कते सर्वदेहेष्विति ॥ समस्तकल्पनाबीजभूताज्ञानोत्थिते ऽप्यन्यगतत्वेन कल्पनान्न तद्दुःखेन दुःखित्वं ब्रह्मात्मैक्यापरोक्षेण मूलाज्ञाने बाधिते दुःखित्वसंभावना ऽपि नास्त्येव । अन्यस्य तद्गतदुःखित्वस्य स्वगतदुःखित्वस्य च बाधितत्वादिति परिहरति नेति ॥ यत्र यस्मिन्नात्मनि पूर्वं स्वगतत्वेन भातमपि दुःखमिदानीमहं ब्रह्मास्मीति बुद्ध्या बाधितं तत्र कथं पूर्वमन्यगतत्वेन भातमिदानीं मम स्यादित्यर्थः । यत्र प्राक्तनमिति पाठे यदन्यगतं दुःखित्वं प्रागप्यन्यस्मिन्नसदविद्याविजृम्भितं तत्कथमविद्यायां निवृत्तायामन्यस्मिन्नात्मनि वा स्यादित्यर्थः ॥ ९० ॥

बुद्धिरेव परिणामिनी कूटस्थ आत्मेति यो ऽयमर्थः प्रतिपादितः स तु तार्किकैरिव न केवलतर्कावष्टम्भादस्माभिः प्रतिपाद्यते किं तु श्रुत्यवष्टम्भादित्याह न चेयमिति ॥ शब्दाद्याकारेति ॥ श्रुतिर्दृष्टिमन्तःकरणवृत्तिमाहेत्यन्वयः । कथमाहेत्यत आह भास्येत्याहेति ॥

---

* यत्र प्राक्तनमप्यसदिति सर्वेषु परिगृहीतपुस्तकेषु पाठः । व्याख्याकारेण पाठद्वयमपि योजितं तत्र प्रथममुपरितनस्यैव पाठस्योल्लेखात्तथा निवेशितम् ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

भास्येत्याह श्रुतिर्दृष्टि-
मात्मनोऽपरिणामिनः ॥ ६१ ॥

का त्वसौ श्रुतिः—

दृष्टेर्द्रष्टारमात्मानं
न पश्येद्दृश्यमानया ।
विज्ञातारमरे केन
विजानीयाद्धियां पतिम् ॥ ६२ ॥

यस्मात्सर्वप्रमाणोपपन्नोऽयमर्थस्तस्मादतोऽन्यथा-वादिनो जात्यन्धा इवानुकम्पनीया इत्याह—

तदेतदद्वयं ब्रह्म
निर्विकारं कुबुद्धिभिः ।

शब्दाद्याकारनिर्भासवती ज्ञानोपादानधर्मिणी भूत्वा आत्मनः प्रकाश्येत्याचष्टे न तु तया आत्मा प्रकाश्य इत्याहेत्यर्थः । यद्वा दृष्टिर्द्विविधा पारमार्थिकी अपारमार्थिकी च, तत्र पारमार्थिकी दृष्टिः आत्मनः स्वरूपमित्याचष्टे, या ऽन्या शब्दाद्याकारनिर्भासवती जन्मविनाशवती च दृष्टिः सा स्वरूपभूतया दृष्ट्या भास्येत्याह न तु तया स्वरूपभूता दृष्टिर्भास्येत्याहेत्यर्थः ॥ ६१ ॥

अर्थमुपवर्ण्य श्रुतिमवतारयति का त्वसाविति ॥ "न दृष्टेर्द्रष्टारं पश्येत्" । "विज्ञातारमरे केन विजानीया"दिति च वाक्यद्वयमत्र प्रमाणमित्यर्थः ॥ ६२ ॥

एवं श्रुतिस्मृतिविद्वत्प्रत्यक्षानुमानादीनां संभवादविश्वासो न वेदान्तसिद्धान्ते करणीय इत्यभिप्रेत्याह यस्मादिति ॥ जात्यन्ध-

www.astrology-tantra.com

जात्यन्धगजदृष्ट्येव
कोटिशः परिकल्प्यते ॥ ६३ ॥

प्रमाणोपपन्नस्यार्थस्यासंभावनात्तदनुकम्पनीयत्वंसि-
द्धि,स्तदेतदाह—

यद्यद्विशेषणं दृष्टं
नात्मनस्तदनन्वयात् ।
खस्य कुम्भादिवत्तस्मा-
दात्मा स्यान्निर्विशेषणः ॥ ६४ ॥

अतश्चात्मनो भेदासंस्पर्शो भेदस्य मिथ्यात्वाभा-
व्यादत आह—

गजदृष्ट्येवेति ॥ यथा जात्यन्धाः स्वस्पर्शगृहीतहस्तपादाद्यवयवेषु अयं गजो ऽयं गज इति तत्र तत्रावयवेषु गजभावं कल्पयन्ति तद्वत्स्वस्वदुस्तर्कदूषितबुद्धिभिश्चार्वाकाद्यैस्तर्काभासदृष्टप्रकारेण कूटस्थमद्वितीयं ब्रह्माप्यन्यथा कल्प्यतइत्यर्थः ॥ ६३ ॥

न्यायेन स्वसिद्धान्तव्यवस्थापकाः कथं शोच्याः स्युरित्याशङ्क्य श्रुतिन्यायाभ्यां निर्णीतस्यार्थस्य तर्काभासैरसंभवकरणाच्छोच्यत्वमित्याह प्रमाणोपपन्नस्यार्थस्येति ॥ श्रुतिन्यायाभ्यां निर्णीतमर्थमाह तदेतदाहेति ॥ यथा घटाकाशः करकाकाश इत्यत्राकाशविशेषणीभूतघटादिभिरनन्वयादाकाशस्य निर्विशेषत्वमेवं घटो भातीत्यादौ भानविशेषणीभूतघटादीनां भानैक्याभावात् भानस्वभावस्यात्मनो निर्विशेषत्वं सिद्धमित्यर्थः ॥ ६४ ॥

आत्मनो भेदाभासासंस्पर्शे हेत्वन्तरमाह अवगत्यात्मन इति ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अवगत्यात्मनो यस्मा-
दागमापायि कुम्भवत् ।
साहङ्कारमिदं विश्वं
तस्मात्तत्स्यात्कचादिवत् ॥ ६५ ॥

सर्वस्यैवानुमानव्यापारस्य फलमियदेव यद्विवेकग्रहणं, तदुच्यते—

बुद्धेरनात्मधर्मत्व-
मनुमानात्प्रसिध्यति ।
आत्मनो ऽप्यद्वितीयत्व-
मात्मत्वादेव सिध्यति ॥ ६६ ॥

यद्वा विशेषणानामात्मासंस्पर्शित्वे ऽप्यन्यत्वेन स्वरूपेण संभवो ऽङ्गीकृत इति शङ्काव्यावृत्त्यर्थमाह अवगत्यात्मन इति॥ अवगत्यात्मनः सकाशात्साहङ्कारमिदं विश्वं कुम्भवदागमापायि उत्पत्तिविनाशवदत एवं कुम्भवन्नात्मस्वरूपं ततः केशोण्ड्रकादिवत् बाध्यमित्यर्थः । यद्वा यस्मादात्मनः सकाशात्साहंकारमिदं विश्वं कुम्भवदागमापायित्वया सिध्यति तद्विश्वं ततः केशोण्ड्रकादिवत्स्वरूपं न भवतीत्यर्थः ॥ ६५ ॥

ननु तर्ह्यात्मनो ऽन्वयव्यतिरेकलक्षणानुमानव्यापाराधीनसिद्धिकत्वादात्मनः स्वप्रकाशत्वाभ्युपगमो भज्येतेत्यत आह सर्वस्यैवेति ॥ सर्वस्यैवानुमानव्यापारस्य बुद्ध्यादिप्रपञ्चविवेचकत्वमेव फलं नात्मस्वरूपबोधकत्वं ततो न स्वप्रकाशत्वभङ्ग इत्यर्थः । तर्ह्यात्मनो ऽद्वितीयत्वगोचरात्प्रमाणात्स्वप्रकाशत्वभङ्ग इत्याशङ्क्याह आत्मनो ऽप्यद्वितीयत्वमिति ॥ द्वितीयाभाव एव तत्र प्रमाणगोचरः । अ-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

यद्यप्ययं ग्रहीतृग्रहणग्राह्यगृहीतितत्फलात्मकश्चाब्रह्मस्तम्बपर्यन्तः संसारो ऽन्वयव्यतिरेकाभ्यामनात्मतया निर्माल्यवद्रूपविद्धस्तथापि तु नैवासौ स्वतःसिद्धात्मव्यतिरिक्ताऽनात्मप्रकृतिपदार्थव्यपाश्रयः साङ्ख्यानामिव, किं तर्हि स्वतःसिद्धाऽनुदिताऽनस्तमितकूटस्थाऽऽत्मप्रज्ञानमात्रशरीरप्रतिबिम्बिताऽविचारितसिद्धात्मानवबोधाश्रय एव, तदुपादानत्वात्तस्येत्येतमर्थं निर्वक्तुकामः प्राह—

ऋते ज्ञानं न सन्त्यर्था
अस्ति ज्ञानमृते ऽपि तान् ।

द्वितीयत्वं तु स्वरूपमेव तत् आत्मत्वादात्मस्वभावबलात् स्वत एव सिध्यति स्वरूपस्य स्वप्रकाशत्वादित्यर्थः ॥ ९६ ॥

साङ्ख्यसिद्धान्तसाम्यमाशङ्क्य ततो वैषम्यं दर्शयति यद्यपीत्यादिना ॥ गृह्यते ऽनेनेति ग्रहणं प्रमाणम्, गृहीतिरर्थज्ञानम्, तत्फलमर्थावच्छिन्नं स्फुरणं तथाभूतस्य संसारस्याऽऽत्माऽसंस्पर्शित्वमात्मनो ऽसंसारित्वं संसारस्य च प्रधानकार्यत्वेन तदाश्रयत्वं च साङ्ख्याः स्वीकुर्वन्ति । वयं त्वात्मन्यध्यस्ताऽनिर्वचनीयाऽज्ञानविजृम्भिततया तदाश्रयः संसारः प्रत्यगात्मनि परिकल्पित इत्यभ्युपगच्छामः, तत्रैव साम्यमित्यर्थः । यद्वा ऽनुदितानस्तमितकूटस्थात्मप्रज्ञानमात्रशरीरप्रतिबिम्बितश्चासावविचारितसिद्धात्मानवबोधाश्रयश्चेति विग्रहः । ऋते ज्ञानमिति ॥ जानातीति ज्ञानं द्रष्टा तं विना न सन्ति न प्रतीयन्ते चाहंकारादयो ऽर्थाः । तान्विना ऽपि

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

एवं धियो हिरुग्ज्योति-
र्विविच्यादनुमानतः ॥ ९७ ॥

यस्मात्प्रमाणप्रमेयव्यवहार आत्माऽनवबोधाश्रय एव तस्मात्सिद्धमात्मनोऽप्रमेयत्वं, नैव हि कार्यं स्वकारणमतिलङ्घ्याऽन्यत्राऽऽकारके आत्मस्वरूपनिबध्नात्यत आह—

व्यवधीयन्त एवामी
बुद्धिदेहघटादयः ।
आत्मत्वादात्मनः केन
व्यवधानं मनागपि ॥ ९८ ॥

द्रष्टाऽस्ति प्रतीयते च । तस्मादर्थानां सत्ताप्रतीत्योर्नित्यसापेक्षत्वात्तेभ्यः स्वयंज्योतिःस्वरूपं निरपेक्षसिद्धिकमात्मानं घटद्रष्टारं घटादिवानुमानतो विविच्याद्विवेकं कुर्यात् ततश्च दृश्यप्रपञ्चादात्मनि निष्कृष्टे सति प्रपञ्चस्य स्वातन्त्र्येण सिद्ध्यभावादात्माऽज्ञानोपादानत्वे तदाश्रयत्वमर्थात्सिध्यतीत्यर्थः ॥ ९७ ॥

एतेनात्मनोऽप्रमेयत्वमपि साधितं भवतीत्याह यस्मादिति ॥ व्यवधीयन्त इति ॥ बुद्धिसिद्धेरात्मचैतन्याभासोदयापेक्षत्वात्तदनपेक्षस्वतःसिद्धात्मस्वभावापेक्षया बुद्धेर्व्यवधानम्, देहस्य पुनर्बुद्ध्यपेक्षत्वादिन्द्रियापेक्षत्वाच्च ततोऽपि व्यवधानम्, घटादीनां पुनर्देशकालादिसंनिधानापेक्षत्वाद्बुद्ध्याद्यपेक्षत्वाच्च देहादपि व्यवधानम्, न त्वात्मनो व्यवधानमस्ति । व्यवहितं च प्रमाणगम्यम्, तस्मादात्मनोऽप्रमेयत्वं सिध्यतीत्यर्थः ॥ ९८ ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

स्वयमनवगमात्मकत्वादनवगमात्मकत्वं च मोहमात्रोपादानत्वात्—

प्रमाणमन्तरेणैषां
बुद्ध्यादीनामसिद्धता।
अनुभूतिफलार्थत्वा-
दात्मज्ञः किमपेक्षते ॥ ९९ ॥

वक्ष्यमाणेतरेतराध्याससिद्ध्यर्थमुक्तव्यतिरेकानुवादः—

घटबुद्धेर्घटाद्वार्थाद्
द्रष्टुर्यद्वद्विभिन्नता।

बुद्ध्यादीनां व्यवहितत्वे स्वयमेव हेतुमाह स्वयमिति ॥ यद्वा व्यवहितानां प्रमाणाधीनसिद्धिकत्वे हेतुमाह स्वयमिति ॥ अनवगमात्मकत्वादस्फुरणस्वभावत्वादित्यर्थः। अनुभूतिफलार्थत्वादिति ॥ अनुभूतिरेव फलमनुभूतिफलं तदर्थत्वात् स्वतस्तद्रहितानां प्रमाणाद्यपेक्षाऽस्ति तस्माद् व्यवधानमित्यर्थः। नन्वात्माप्युपनिषत्प्रमाणमपेक्षत इत्याशङ्क्य चित्स्वभावत्वादज्ञाननिवृत्तिव्यतिरेकेण प्रमित्यन्तरं नापेक्षत इत्याह आत्मज्ञ इति ॥ ९९ ॥

आत्मानात्मनोरुक्तन्यायेनात्यन्तविविक्तस्वभावयोः संयोगसमवायतादात्म्यादिसंबन्धासंभवादन्तरेण च संबन्धं प्रकाश्यप्रकाशकभावायोगादाध्यासिकसंबन्धो वाच्यः, तस्य चाध्यासस्य विद्यमानभेदयोस्तदग्रहपूर्वकत्वादुक्त एव व्यतिरेकः पुनर्विवक्षिताध्याससिद्ध्यर्थमनूद्यत इत्याह वक्ष्यमाणेति ॥ दृश्याद् द्रष्टुरिवाहंकारदशायामकर्मतया भासमानसाक्षिवेद्यात् दुःखिनः साक्षि-

DR.RUPAK NATH (DR.RUPNATHJI)
www.astrology-tantra.com

अहंबुद्धिरहंगम्यात्
दुःखिनश्च तथा दृशेः ॥ १०० ॥

एवमेतयोरात्मानात्मनोः स्वतः परतः सिद्धयोर्लौकिकरज्जुसर्पाध्यारोपवदविद्योपाश्रय एवेतरेतराध्यारोप इत्येतदाह—

अभ्रयानं यथा मोहा-
च्छशभृत्यध्यवस्यति ।
सुखित्वादीन् धियो धर्मान्
तद्वदात्मनि मन्यते ॥ १०१ ॥
दग्धृत्वं च यथा वह्ने-
रयसो मन्यते कुधीः* ।
चैतन्यं तद्वदात्मीयं
मोहात्कर्तरि मन्यते ॥ १०२ ॥

सर्व एवायमात्मानात्मविभागः प्रत्यक्षादिप्रमाणवर्त्मन्यनुपातितो ऽविद्योत्सङ्गवर्त्येव न परमात्मव्यपाश्र-

---

चैतन्यस्यापि व्यतिरेकः सिद्ध इत्यर्थः ॥ १०० ॥

एवं व्यतिरेकं प्रदर्श्य तदग्रहनिबन्धनो ऽध्यासः प्रदर्श्यत इत्याह एवमेतयोरिति ॥ अभ्रयानमिति ॥ १०१ ॥

एवमात्मन्यनात्मधर्माध्यासमभिधायानात्मन्यात्मधर्माध्यासं सदृष्टान्तमाह दग्धृत्वमिति ॥ १०२ ॥

उत्तरश्लोकपूर्वपादद्वयेन पूर्वोक्तार्थो ऽनूद्यत इति तात्पर्यमाह

---

* मन्यते ऽन्वधीरिति २ पुस्तके पाठः ॥

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

यः । अस्यास्त्वविद्यायाः सर्वानर्थहेतोः कुतो निवृत्ति-रिति चेत्तदाह—

दुःखराशेर्विचित्रस्य
सेयं भ्रान्तिश्चिरन्तनी ।
मूलं संसारवृक्षस्य
तद्बाधस्तत्त्वदर्शनात् ॥ १०३ ॥

तद्बाधस्तत्त्वदर्शनादिति कुतः सम्भाव्यतइति चे-दत आह, आगोपालाविपालपण्डितमियमेव प्रसि-द्धिः—

अप्रमोत्थं प्रमोत्थेन
ज्ञानं ज्ञानेन बाध्यते ।
अहिरज्ज्वादिवद्बाधो
देहाद्यात्ममतेस्तथा ॥ १०४ ॥

सर्व एवायमित्यारभ्य न परमात्मव्यपाश्रय इत्यन्तेन ॥ अविद्योत्सङ्ग-वर्ती, अविद्याश्रय इत्यर्थः । इदानीं चतुर्थपादव्यावर्त्यां शङ्कामाह अ-स्याश्चेति ॥ श्लोकमवतारयति तदाहेति ॥ चिरन्तनी भ्रान्तिरविद्या सा मूलमत एवाश्रयस्तस्याश्चाद्वैतसाक्षात्कारान्निवृत्तिरित्यर्थः । नन्वद्वैतसाक्षात्कारस्याविद्यानिवर्तकत्वं क्वापि न दृश्यतइति शङ्कि-त्वा अधिष्ठानसाक्षात्कारस्याध्यासबाधकस्य लोके दृष्टत्वाद्बाध्य-नुमेयमित्याह तद्बाधस्तत्त्वदर्शनादिति ॥ १०३ ॥

कुतः संभाव्यतइत्यादि ॥ मिथ्याज्ञानसम्यग्ज्ञानयोर्बाध्यबाधक-

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

लौकिकप्रमेयवैलक्षण्यादात्मनो नेहानधिगताधिगमः प्रमाणफलम्—

अविद्यानाशमात्रं तु
फलमित्युपचर्यते ।
नाज्ञातज्ञापनं न्याय्य-
मवगत्येकरूपतः ॥ १०५ ॥

यस्मादात्मानवबोधमात्रोपादानः प्रमात्रादयस्तस्मात्—

न विदन्त्यात्मनः सत्तां
द्रष्टृदर्शनगोचराः* ।

त्ववन्मिथ्याज्ञानप्रतिपन्नसम्यग्ज्ञानप्रतिपन्नयोरप्यहिरज्ज्वोर्बाध्यबाधकभावः संप्रतिपन्न इत्याह अहिरज्ज्वादिवदिति ॥ दार्ष्टान्तिकमाह देहाद्यात्मेति । देहाद्यात्मज्ञानयोर्देहात्मनोश्च बाध्यबाधकभावः संभवतीत्यर्थः ॥ १०४ ॥

ननु तत्त्वदर्शनादित्युक्तत्वात्प्रमाणजनितप्राकट्यविषयत्वमात्मनोऽभ्युपगतं ततः स्वतःसिद्धत्वहानिरित्याशङ्क्याह लौकिकेति ॥ लौकिकस्य प्रमेयस्य यथा अनधिगताधिगतिः प्रमेयपरिच्छित्तिः फलं भवति नैवमात्मनः प्रकाशस्वरूपत्वात्, तस्मादध्यस्ताज्ञानव्यावृत्तिरेव तस्य फलमित्यर्थः ॥ १०५ ॥

आत्मव्यतिरिक्तस्यात्मवेद्यत्वादपि न तदधिगम आत्मेत्याह यस्मादिति ॥ द्रष्टृदर्शनगोचराः, द्रष्टा दर्शनं गोचराश्च ते तावत्स्वा-

---

* द्रष्टा=प्रमाता । दर्शनं=प्रमाणं, बुद्धिवृत्तिः । गोचराः=प्रमेयाः ॥

DR.RUPAK NATH (DR.RUPNATHJI)
www.astrology-tantra.com

न चान्योन्यमतोऽमीषां
ज्ञेयत्वं भिन्नसाधनम् ॥ १०६ ॥
द्रष्ट्रादेरसाधारणरूपज्ञापनायाह—
बाह्य आकारवान् ग्राह्यो
ग्रहणं निश्चयादिमत् ।
अन्वय्यहमिति ज्ञेयः
साक्षी त्वात्मा ध्रुवः सदा ॥ १०७ ॥

त्मानं स्वयमेव न जानन्ति जडत्वात्, नाप्यन्योन्यम् । अतस्तेषां स्वव्यतिरिक्तात्मवेद्यत्वमेव, तस्मान्न तदधीनाधिगतिरात्मेत्यर्थः ॥ १०६ ॥

द्रष्ट्रादिव्यतिरिक्त आत्मा नास्माकं प्रसिद्ध इति परमतमाशङ्क्य लक्षणं तस्योपपादनायाह द्रष्ट्रादेरिति ॥ बाह्यः पराग्भूत आकारवान् पृथुबुध्नोदरत्वादिधर्मवान् ग्राह्यः । तदुक्तं वार्तिकेऽपि—

विभिन्नो बहिराभाति जातिरूपक्रियादिमान् ।
विभिन्नोऽनुभवादेव ज्ञातुर्ज्ञानात्स गोचरः ॥

इति । एकस्मिन्नेव ज्ञातरि निश्चयस्मृत्यादिविभागवत्त्वेन ज्ञातृकर्तृकं यदाभाति तद् ग्रहणम् । तदुक्तम्—

स्मरणादिविभागेन ज्ञातर्यैकत्र यत्पृथक् ।
प्रथतेऽनेकरूपाभं तज्ज्ञानं ज्ञातृकर्तृकम् ॥

इति । अहं शृणोम्यहं निश्चिनोम्यहं स्मरामीति च निश्चयादिषु व्यभिचारिषु योऽहंरूपेणान्वेति प्रत्यभिज्ञया एकत्वेनानुसंधीयते स द्रष्टा । तदुक्तम्—

स्मृतिनिश्चितिसंधीतिरागादिहिरुगात्मसु ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सर्वकारकक्रियाफलविभागात्मकसंसारशून्य आत्मेति कारकक्रियाफलविभागसाक्षित्वादात्मनस्तथा-त्वमाह—

ग्राहकग्रहणग्राह्य-
विभागे योऽविभागवान्* ।
हानोपादानयोः साक्षी
हानोपादानवर्जितः ॥ १०८ ॥

ग्राहकादिनिष्ठैव ग्राहकादिभावाभावविभागसिद्धिः कस्मान्नेति चेत्तदाह—

अहंरूपेण योऽन्वेति स प्रमाता परो मतः ॥

इति । साक्षी यः पुनरेषां त्रयाणां भावाभावसाधकः सुषुप्तिकैवल्यादिष्वन्वयी कूटस्थनित्यः स परैरपि बलादभ्युपेयोऽन्यथा द्रष्ट्रादेरसिद्धेरिति भावः ॥ १०७ ॥

साक्षित्वेनासंसारित्वमप्यात्मनः प्रसाधितमित्याह सर्वकारकक्रियेति ॥ सर्वकारकक्रियाफलविभागात्मकसंसारशून्य आत्मेति गम्यतइति शेषः । यद्वा इतिशब्दो हेत्वर्थः कारकक्रियाफलविभागसाक्षित्वादित्युत्तरेण संबध्यते । ग्राहकेति ॥ ग्राहकादीनां त्रयाणां विभागेषु त्रिष्वपि स्फुरणरूपेणाविभागवान्यस्तेषां हानोपादानयोः भावाभावयोः साक्षी तत्साक्षित्वादेव स्वयं हानोपादानलक्षणसंसारवर्जित एव भवतीत्यर्थः ॥ १०८ ॥

ननु ग्राहकादिविभागसिद्धिहेतुत्वेन साक्षिणः सिद्धिरुच्यते ग्रा-

---

* अविभागवान्=सर्वत्रानुस्यूतो, व्यापक इति यावत् ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

स्वसाधनं स्वयं नष्टो
न नाशं वेत्त्यभावतः।
अत एव न चान्येषा-
मतोऽसौ भिन्नसाक्षिकः॥ १०६॥

ग्राहकादेरन्यसाक्षिपूर्वकत्वसिद्धेः स्वसाक्षिणोऽप्यन्यसाक्षिपूर्वकत्वादनवस्थेति चेत्तन्न, साक्षिणो व्यतिरिक्तहेत्वनपेक्षत्वात्*। अत आह—

धीवन्नापेक्षते सिद्धि-
मात्माऽन्यस्माद्विक्रियः।
निरपेक्षमपेक्ष्यैव
सिध्यत्यन्येन तु स्वयम्॥ ११०॥

हकादिविभागोऽपि ग्राहकादिभिरेव सिध्येत्ततः किं साक्षिणेत्याशङ्कते ग्राहकादीति॥ निरस्यति तदाहेति॥ ग्राहकादीनामन्यतमो नष्टः पदार्थः स्वनाशं स्वसाधनं च यथा भवति तथा स्वयं न वेत्ति स्वस्याभावादेव, अत एवान्येषामपि ग्रहणादीनां नाशं न वेत्ति, नाशश्च प्रतीयते, तस्माद् ग्राहकादिव्यतिरिक्तात्मसाक्षिक एवासावित्यर्थः॥१०६॥

ननु स्वग्राहकस्यापि ग्राह्यत्वे साक्षिणोऽपि ग्राह्यत्वं ततश्चानवस्थेत्याशङ्क्य तस्याजडत्वेन स्वतः सिद्धावन्यानपेक्षत्वान्नैवमिति परिहरति ग्राहकादेरित्यादिना॥ धीवन्नापेक्षत इति॥ बुद्ध्यादिर्यथा जडत्वात्स्वसिद्धिमन्यस्मादपेक्षते नैवमात्मा स्वप्रकाशः स्वसिद्धिम-

---

* हेत्वन्तरानपेक्षित्वादित्यर्थः॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

यतो ग्राहकादिष्वात्मभावोऽविद्यानिबन्धन एव तस्मात्—

अन्वयव्यतिरेकाभ्यां
विभज्यानात्मनः स्वयम् ।
उत्पत्तिस्थितिनाशेषु
यो ऽवगत्यैव वर्तते ।
जगतो ऽविकारया ऽवेहि
तमस्मीति न नश्वरम् ॥ १११ ॥

स्वतःसिद्धात्मचैतन्यप्रतिबिम्बिताऽविचारितसिद्धिकात्मानवबोधोत्थेतरेतरस्वभावापेक्षसिद्धत्वात्स्वतश्चासि-

---

न्यस्मादपेक्षत इत्यर्थः । अन्येषां सर्वेषामात्मग्राह्यत्वेनात्मग्राहकत्वायोगाच्च नान्यग्राह्यत्वमात्मन इत्याह निरपेक्षमिति ॥ ११० ॥

इदानीं पूर्वप्रसाधितस्येतरेतराध्यासस्य फलमुपसंहरति यत इति ॥ उत्पत्तीति ॥ जगत उत्पत्तिस्थितिनाशेषु य ईश्वरो ऽविकारया ऽवगतिस्वरूपेण वर्तते तमहमस्मीत्यवेहि विजानीहि न तु नश्वरं प्रमात्रादिरूपमित्यर्थः। भुरिगनुष्टुबियम् । जगतो ऽविकारया ऽवेहीत्यक्षराधिक्यात् । तथा च पिङ्गलाचार्यः । सर्वच्छन्दोविषयमाह "ऊनाधिकेनैकेन निवृद्भुरिजा"विति । तच्चैतल्लोकवेदसाधारणमिति भरताचार्यः प्राह ॥ १११ ॥

तमस्मीत्यवेहि न नश्वरमित्युक्तत्वादात्मव्यतिरिक्तमपि वस्त्वङ्गीकृतमित्याशङ्क्य तस्य स्वतः परतश्चासिद्धेः प्रत्यगात्माश्रयाऽनिर्वाच्याऽनाद्यविद्याविजृम्भितत्वान्नैवमित्याह स्वतःसिद्धेति ॥ चैतन्ये प्रति-

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

द्धेरनात्मनो द्वैतेन्द्रजालस्य—

न स्वयं स्वस्य नानात्वं
नावगत्यात्मना यतः ।
नोभाभ्यामप्यतः सिद्ध-
मद्वैतं द्वैतबाधया ॥ ११२ ॥

यथोक्तार्थप्रतिपत्तिदृढिम्ने श्रुत्युदाहरणोपन्यासः—

नित्यावगतिरूपत्वात्
कारकादिर्न चात्मनः ।
अस्थूलं नेति नेतीति
न जायत इति श्रुतिः ॥ ११३ ॥

सर्वस्यास्य ग्राहकादेर्द्वैतप्रपञ्चस्याऽऽत्मानवबोधमा-

बिम्बितं स्फुरितम् । इतरेतरस्वभावापेक्षसिद्धत्वादिति ॥ प्रतियोगिनो भेदेन सिद्धौ धर्मिणस्ततो भेदेन सिद्धिस्तत्सिद्धौ च प्रतियोगिनो भेदसिद्धिरिति परस्पराश्रयत्वादित्यर्थः। न स्वयमिति ॥ स्वस्य द्वैतेन्द्रजालस्य स्वयमेव स्वेनैव नानात्वं न सिद्धं जडत्वात्, नाप्यवगतिरूपेण जडाजडयोरैक्यायोगात्, नोभाभ्यामपि संयोगसमवायादिसंबन्धासंभवात् । अतो दुर्निरूपसिद्धिकत्वात् द्वैतेन्द्रजालस्याद्वैतमेव परमार्थत इत्यर्थः ॥ ११२ ॥

आत्मनः कर्तृत्वाद्यभावे श्रुतिवाक्यमुदाहरतीत्याह यथोक्तेति ॥ ११३ ॥

बुद्ध्यादिद्वैतप्रपञ्चस्यात्मव्यतिरिक्ताऽसाधकत्वा,त्तस्य जडस्य स्वतः सिद्ध्यनुपपत्तेः,आत्मचैतन्यस्य जडं प्रति संक्रमयितुमशक्यत्वेन

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

चोपादानस्य स्वयं सेद्धुमशक्यत्वात्, आत्मसिद्धे*श्चानुपाद्येयत्वात्—

आत्मनश्चेन्निवार्यन्ते
बुद्धिदेहघटादयः।
षष्ठगोचरकल्पा†स्ते
विज्ञेयाः परमार्थतः॥ ११४॥

कुतो न्यायबलादेवं निश्चितं प्रतीयते, यस्मात्—

नित्यां संविदमाश्रित्य
स्वतःसिद्धामविक्रियाम्।
सिद्धायन्ते धियो बोधा-
स्तांश्चाश्रित्य घटादयः॥ ११५॥

तस्मादपि सिद्धेरुपपादयितुमशक्यत्वाज्जडस्य मिथ्यात्वं बलादापततीत्याह सर्वस्येति॥ आत्मनश्चेदिति॥ आत्मनः स्वरूपत्वेन तदीयत्वेन च बुद्ध्यादयस्तस्मान्निवार्यन्ते चेदसत्कल्पा भवन्तीत्यर्थः॥ ११४॥

ननु बुद्ध्यादिद्वैतप्रपञ्चस्यापरोक्षतया प्रतिभासमानस्य कथं षष्ठगोचरकल्पत्वमित्याक्षिपति कुत इति॥ परिहरति यस्मादिति॥ अपरोक्षतया स्वतःप्रकाशमानसंविदैक्याध्यासाद्धीवृत्तीनां सिद्धिरापरोक्ष्यं तत्र प्रतिबिम्बितत्वाच्च घटादीनामपरोक्षप्रतिभासो न तु वास्तवस्तस्मात् षष्ठगोचरकल्पत्वं युक्तमित्यर्थः॥ ११५॥

---

* आत्मसिद्धेः=आत्मना सिद्धेरिति तृतीयातत्पुरुष, आत्मनः सिद्धेरिति पञ्चमीतत्पुरुषो वा॥

† षष्ठगोचरो ऽभावस्तत्कल्पा इत्यर्थः॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

यस्मान्न कया चिदपि युक्त्या ऽऽत्मनः कारकत्वं क्रियात्वं फलत्वं चोपपद्यते तस्मादात्मवस्तुयाथात्म्यानवबोधमात्रोपादानत्वान्नभसीव रजोधूमतुषारघनीहारनीलत्वाद्यध्यासो यथोक्तात्मनि सर्वो ऽयं क्रियाकारकफलात्मकसंसारो ऽहंममत्वयत्नेच्छादिमिथ्याध्यास एवेति सिद्धम् । इममर्थमाह—

अहंमिथ्याभिशापेन
दुःख्यात्मा तद्बुभुत्सया* ।
इतः श्रुतिं तया नेती-
त्युक्तः कैवल्यमास्थितः† ॥ ११६ ॥

तस्यास्य मुमुक्षोः श्रौतवचसः स्वप्ननिमित्तोत्सारितनिद्रस्येवेयं निश्चितार्था प्रमा जायते—

प्रपञ्चमिथ्यात्वमुपसंहरति यस्मान्न कया चिदपीत्यादिना ॥ यथोक्तात्मनि, क्रियाकारकादिशून्ये आत्मनीत्यर्थः । अहंमिथ्याभिशापेनेति ॥ अविद्यमानाहङ्कारात्मना ऽभिशापेनापवादेन दुःखी सन्नात्मा तद्बोधनेच्छया मातृकल्पां श्रुतिमितः प्राप्तस्तया च "नेति नेत्यात्मा ऽगृह्यो न हि गृह्यते" इत्यादिलक्षणया निराकृतापवादो ऽध्यस्ताहङ्कारादिकं विहाय स्वस्थः कैवल्यमास्थित इत्यर्थः ॥ ११६ ॥

तर्हि श्रुत्याचार्यादिप्रपञ्चस्य वास्तवत्वमभ्युपेयं मिथ्यात्वे बाध्यधूमादिवत्प्रमाजनकत्वानुपपत्तिरित्याशङ्क्यासत्यादपि प्रमोत्पत्तिं सदृ-

---

* तच्छुशुत्सयेति का० सं० पु० पाठः । तच्छुद्धिकामनयेत्यर्थः ॥

† उक्तो ह्येकल आस्थित इति का० सं० पु० पाठः ॥

२०

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

नाऽहं न च ममाऽऽत्मत्वा-
त्सर्वदानात्मवर्जितः ।
भानाविव तमोऽध्यासो
ऽपह्नवश्च तथा मयि ॥ ११७ ॥

सोयमेवं प्रतिपन्नस्वभाव*मात्मानं प्रतिपन्नो ऽनु-क्रोशति—

यत्र त्वस्येति साटोपं
कृत्स्नद्वैतनिषेधिनीम् ।
प्रोत्सारयन्तीं संसार-
मप्यश्रौषं न किं श्रुतिम् ॥ ११८ ॥

ष्टान्तमाह तस्यास्येति ॥ नाहं न चेति ॥ भानौ तमोऽध्यास इवाहङ्कारादयः प्रत्यगात्मन्यध्यस्ता एव न तु परमार्थतः सन्ति तस्य चैतन्यमात्रस्वरूपत्वात्ततस्तन्निवृत्तौ निर्विशेष आत्मेति मुमुक्षोः प्रमा जायतइत्यर्थः ।ननु कथं निर्विशेष आत्मेति प्रमा जायते निवृत्तिलक्षणस्य विद्यमानत्वादित्यत आह अपन्हवश्चेति ॥अहङ्कारादिर्यथा आत्मन्यध्यस्तस्तथा तदपन्हवो ऽपि तस्मिन्नध्यस्त एव कालत्रये ऽपि तस्मिन्नहंकारादेरसत्त्वादेव परमार्थतो निवृत्त्यनुपपत्तेरित्यर्थः ॥ ११७ ॥

एवं श्रुतिस्मृतिवचनाकर्णनमात्रान्निरस्ते ऽपि संसारे वैषयिकसुखतन्त्रविप्रलब्धचेतस्तया एतावन्तं कालं प्रमत्तो ऽहमासमहो कष्टमिति विदुषो ऽनुक्रोशं दर्शयति मुमुक्षूणां प्ररोचनाय सोयमि-

---

* प्रतिपन्नो ज्ञातः स्वभावः स्वरूपं सच्चिदानन्दात्मकत्वं येन ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

इत्योमित्यवबुद्धात्मा
निष्कलो ऽकारको ऽक्रियः ।
विरक्त इव बुद्ध्यादे-
रेकाकित्वमुपेयिवान् ॥ ११९ ॥

इति श्रीमत्सुरेश्वराचार्यरचितायां नैष्कर्म्यसिद्धौ संबन्धाख्यायां द्वितीयो ऽध्यायः ॥

ति ॥ "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इति समस्तसंसारनिषेधिनीं श्रुतिं किमहं नाश्रौषमिति स्वात्मानं विनिन्दतीत्यर्थः ॥ ११८ ॥

इदानीं विद्याफलं दर्शयन्नध्यायमुपसंहरति इत्योमिति ॥ "निष्कलो ऽकारको ऽक्रिय" इति श्रुत्यावार्थोक्तमर्थमनुभवन्नभ्यसितुर्ज्ञानमभिनयति इत्योमिति ॥ अर्थादोङ्कारस्यैव ब्रह्मप्रतिपत्तिसाधनत्वमिति दर्शितं भवति। विरक्त इवेति ॥ यथा हि कश्चिद्विरक्तः पुत्रमित्रकलत्रादिलक्षणात्संसारवृत्तादुत्थाय स्वयमेकाकी वर्तते तद्वदयमप्यात्मा सकलसंसारहेतुभूताद् बुद्ध्यादेरुत्थाय स्वयमेकल एव स्वमहिम्नि तिष्ठतीत्यर्थः ॥ ११९ ॥

इति श्रीज्ञानोत्तमाचार्यविरचितायां नैष्कर्म्यसिद्धिटीकायां चन्द्रिकाख्यायां द्वितीयो ऽध्यायः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अथ तृतीयो ऽध्यायः ॥

श्रीमद्गुरुभ्यो नमो नमः ॥

सर्वोऽयं प्रमितिप्रमाणप्रमेयप्रमातृलक्षण आब्रह्मस्तम्बपर्यन्तो मिथ्याध्यास एवेति बहुधा उपपत्तिभिरभिहितम्* । आत्मा च जन्मादिषड्भावविकारवर्जितः कूटस्थबोध एवेति स्फुटीकृतम् । तयोश्च मिथ्याध्यासकू-

---

अथ तृतीयो ऽध्यायः ॥

नमः सर्वात्मने ॥

वर्तिष्यमाणस्याध्यायस्यातीताध्यायेन संगतिं दर्शयितुं वृत्तं कीर्तयति सर्वो ऽयमिति ॥ पदार्थपरिशोधनाय विचारनान्तरीयकतया सर्वस्य प्रपञ्चस्य मिथ्यात्वं दर्शितमित्यर्थः । इदानीं साक्षात्प्रतिपादितमर्थान्तरं दर्शयति वर्तिष्यमाणविचारोपयोगित्वात्, आत्मा चेति ॥ तर्हि पदार्थशोधनस्य सम्यङ् निष्पादितत्वात् विदितपदपदार्थस्य च स्वयमेव वाक्यार्थज्ञानोत्पत्तेः किमर्थस्तृतीयाध्यायारम्भ इत्यत आह तयोश्चेति ॥ अध्यस्यमानाधिष्ठानयोः शुक्तिरूप्ययोरिवाधिष्ठानविषयाज्ञानव्यतिरेकेण संबन्धासंभवाद् अज्ञानं तावदहमिदं न वेद्मीति प्रतीयमानात्मानात्मसंबन्धघटकमभ्युपेयम् । तस्य चाज्ञानस्य निवृत्तिव्यतिरेकेण पुरुषार्थापरिसमाप्तेः, तन्निवृत्तेश्च वक्ष्यमाणन्यायेन वाक्याधीनत्वाद्वाक्यव्याख्यानाया†रम्भो घटत इति

---

* उपपत्तिभिरतिविप्रमिति का० सं० पु० पाठः ॥

† तत्त्वमसीत्यादिवाक्यव्याख्यानायेत्यर्थः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

दृश्यात्मनोर्नान्तरेणाज्ञानं संबन्धो ऽन्यत्र चोदनापरि-प्रापितात् यथे"यमेव ऋगग्निः सामे"*ति। तस्मादज्ञानं स्वात्ममात्रनिमित्तं न संभवतीति कस्य चित्कस्मिंश्चिद्विषये भवतीत्यभ्युपगन्तव्यम्। इह च पदार्थद्वयं निर्धारितमात्मा ऽनात्मा च। तत्रा ऽनात्मनस्तावन्ना ऽज्ञानेना-ऽभिसंबन्धः। तस्य हि स्वरूपमेवाज्ञानं, न हि स्वतो ऽज्ञानस्याज्ञानं घटते संभवदप्यज्ञानस्वभावे ऽज्ञानं

भावः। अधिष्ठानाध्यस्यमानयोरज्ञानव्यतिरेकेणापि सम्बन्धो दृश्यत इत्याशङ्क्याह अन्यत्रेति॥ निवर्त्याज्ञानस्य निवर्तकज्ञानेन समानाश्रयविषयत्वनियमस्येदं रजतमिदं शुक्तिरित्यादौ दर्शनादु इहापि ब्रह्मज्ञानेनात्माज्ञानस्य समानाश्रयविषयत्वं द्रष्टव्यमिति तत्साधनायोपक्रमते तस्मादज्ञानमिति॥ अज्ञानं स्वसत्ताप्रतीत्योः स्वयमेव प्रयोजकं न भवति, मित्यपरतन्त्रत्वात्। तस्मात्तस्याश्रयविषयौ निरूप्यमाणौ ज्ञानेन समानाश्रयविषयत्वे एव भविष्यत इति भावः। तावता कथमेकाश्रयविषयत्वमित्यत आह इह चेति॥ इह वेदान्तशास्त्रे इत्यर्थः। अस्त्वेवं तथापि कथं सम्यग्ज्ञानेनैकाश्रयविषयत्वमित्याशङ्क्य परिशेषादित्याह तत्रानात्मन इति॥ अभिसंबन्ध आश्रयाश्रयित्वलक्षणो नास्तीत्यर्थः। तत्र हेतुः, तस्य हीति॥ अज्ञानस्वरूपत्वे ऽप्यज्ञानाश्रयत्वमस्तु को विरोध इत्यत आह न हीति॥ अज्ञानात्मकमज्ञानाश्रयो न भवति अज्ञानात्मकशुक्तिरूप्यादिवच्चेति भावः। अज्ञानाश्रयत्वप्रयुक्तसंश-

---

* अत्र स्त्रियामृक्संबन्धस्याग्नौ सामसंबन्धस्य वस्तुतो ऽभावे ऽपि विधिप्रापितस्य तस्याहार्यस्य सत्त्वादुपासनायामुपयोगो यथा ऽङ्गीक्रियते नैवमन्यत्रेति भावः॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

कमतिमयं जनयेत् । न च तत्र ज्ञानप्राप्तिरस्ति येन तत्प्रतिषेधात्मकमज्ञानं स्यात् । अनात्मनश्चाज्ञानप्रसूतत्वात् । न हि पूर्वसिद्धं सत्ततो लब्धात्मलाभं च भवत्यत आश्रयस्या*पि संभवति । तदनपेक्षस्य च तस्य निःस्वभावत्वात् । एतेभ्य एव हेतुभ्यो नानात्मविषयमज्ञानं संभवतीति ग्राह्यम् ॥

यविपर्यासाश्रयत्वाद्दर्शनादप्यनात्मनो घटादिवदज्ञानाश्रयत्वमित्याह संभवदपीति ॥ अनात्मनो जडस्वभावत्वात्संशयविपर्यासाद्यतिशयानाश्रयत्वमित्यर्थः ॥ अज्ञानसम्यग्ज्ञानयोरेकाधिकरणत्वनियमात्सम्यग्ज्ञानानधिकरणस्यानात्मनो नाज्ञानाधिकरणत्वसंभव इत्याह न च तत्रेति ॥ अज्ञानकार्यत्वादप्यनात्मनो न तदाश्रयत्वमित्याह अनात्मनश्चेति । अज्ञानस्य स्वभावपर्यालोचनायामपि न तस्याहङ्कारादेरनात्माश्रयत्वं युक्तमित्याह न हीति ॥ कारणतया पूर्वसिद्धमज्ञानं तत एवाज्ञानाल्लब्धात्मकस्याहङ्कारादेस्तदेवाज्ञानमाश्रित्य सेत्स्यतः स्वाश्रयत्वेनाभिमतस्याश्रयि न भवति, तेनाश्रयेणाश्रयि न भवितुमर्हति । कार्योदयात्प्रागेव तस्याश्रयतयैव सिद्धत्वादित्यर्थः । यद्वा पूर्वोक्तमेव प्रपञ्चयति न हीति ॥ कारणतया पूर्वसिद्धस्याज्ञानस्य ततो लब्धात्मलाभत्वादनात्माख्यस्य कारणस्य कार्याश्रयत्वमनुपपन्नमिति । किं चाधेयाकारनिरपेक्षाकारान्तरेणाश्रयस्याधारता दृष्टा, न चेहाज्ञानानपेक्षस्यानात्मन आकारान्तरमस्ति येनाज्ञानाश्रयत्वमुपपद्येतेत्याह तदनपेक्षस्य चेति ॥ ननु मा भूदज्ञानस्यानात्मा आश्रयः, विषयस्तु किं न स्यादित्यत आह

* आश्रयस्य=अज्ञानस्य ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

एवं तावन्नाऽनात्मनो ऽज्ञानित्वं नापि तद्विषयमज्ञानं पारिशेष्यादात्मन एवास्त्वज्ञानं तस्याज्ञो ऽस्मीत्यनुभवदर्शनात् । "सो ऽहं भगवो मन्त्रविदेवास्मि नात्मविदि"ति श्रुतेः । न चात्मनो ऽज्ञानस्वरूपत्वा तस्य चैतन्यमात्रस्वाभाव्यादतिशयश्च संभवति ज्ञानपरिलोपो ज्ञानप्राप्तेश्च संभवस्तस्य ज्ञानकार्यत्वात् । न

एतेभ्य इति॥ विषयस्याप्याश्रयवदज्ञानस्वरूपप्रकाशकत्वाद् अज्ञानात्मकस्य चानात्मनो ऽज्ञानवदेव तद्विषयत्वेन प्रकाशत्वायोगात्, तमसीव तमोऽन्तरस्य तत्रातिशयत्वाभावादज्ञानं विनापि तदवभासकज्ञानानुदयादेव तदनवभाससिद्धेरज्ञानकार्यत्वादेव तस्य रूप्यादिवदज्ञाननिवर्तकसम्यग्ज्ञानविषयत्वायोगात्पूर्वमेवाश्रयविषयघटिततया सिद्धादज्ञानात्सेरस्यतः पूर्वसिद्धस्य विषयभावायोगात्, सम्यग्ज्ञाननिरसनीयाकारातिरिक्ताज्ञानविषयत्वयोग्याकारान्तरासंभवाच्च नानात्मविषयमज्ञानं संभवतीत्यर्थः ॥

परिशेषादात्माश्रयमात्मविषयं चाज्ञानं सिद्धमित्युपसंहरति एवं तावदिति ॥ अनुभवसिद्धं चैतदित्याह तस्येति ॥ आगमो ऽप्यत्र प्रमाणमित्याह सो ऽहमिति ॥ अनात्मनो ऽज्ञानाश्रयविषयत्वयोरभिहितदोषाणामात्मन्यसंभवादप्येवमेवाभ्युपेयमित्याह न चेति ॥ आत्मनश्चैतन्यत्वेनानात्मवदज्ञानस्वरूपत्वाभावादज्ञानाश्रयत्वं संभवतीत्यर्थः । अज्ञानजन्यो ऽतिशयो ऽप्यात्मनि संभवतीत्याह अतिशयश्चेति ॥ स्वयंप्रकाशत्वान्नित्यशुद्धबुद्धाद्वितीयाकारेण प्राप्तप्रकाशस्याप्रकाशत्वं तद्विपरीतस्फुरणं च ज्ञानविपरिलोपः सो ऽप्यतिशय आत्मनि संभवतीत्यर्थः । तथापि तस्य कूटस्थत्वादागन्तुकस-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

चाज्ञानकार्यत्वं, कूटस्थात्मस्वाभाव्यात् । अज्ञानानपेक्षस्य चात्मनः स्वत एव स्वरूपसिद्धेर्युक्तमात्मन एवाज्ञत्वम् । किंविषयं पुनस्तदात्मनोऽज्ञानमात्मविषयमिति ब्रूमः ।

ज्ञाननिवर्तकं सम्यग्ज्ञानं नोपपद्यतइत्यत आह ज्ञानप्राप्तेश्चेति ॥ तत्र हेतुस्तस्येति ॥ अविद्यातत्कार्यान्तःकरणादिवृत्तिषु प्रमाणाप्रमाणरूपचैतन्याभासहेतुत्वेन ज्ञानकारित्वादात्मन इत्यर्थः । अनात्मन इवाज्ञानकार्यत्वलक्षणदोषोऽपि नास्तीत्याह न चाज्ञानकार्यत्वमिति ॥ तस्याकार्यत्वमुभयत्रापि संमतमिति भावः ॥ यच्चोक्तं तदनपेक्षस्य तस्य निःस्वभावत्वादिति तदप्यत्र नास्तीत्याह अज्ञानानपेक्षस्य चेति ॥ अज्ञानस्य जडत्वात्तत्साधको ऽजडबोधस्वभाव आत्मा तदन्तर्गताकारनिरपेक्षाकारः सिद्ध इत्यर्थः । भवत्वेवमात्मनो ऽज्ञानाश्रयत्वं तद्विषयत्वं तु न युक्तं ज्ञानेच्छादीनां लोके भिन्नाश्रयविषयत्वदर्शनात्, प्रतीयमानाकारेणाज्ञानं प्रत्याश्रयत्वमप्रतीयमानाकारेण विषयत्वमित्याकारभेदस्यैकस्मिन्नेकरसे वस्तुन्यसंभवाच्चेत्याक्षिपति किंविषयमिति ॥ समाधत्ते आत्मविषयमिति ॥ मामहं जानामि मामहं न जानामीति च ज्ञानाज्ञानयोरेकाश्रयविषयत्वस्यापि लोके दर्शनादहमिति साधारणाकारेण प्रतीयमानाकारस्याप्यात्मनो ऽद्वितीयानन्दाकारेणाप्रतीयमानस्यानुभवसिद्धत्वात्, अहं मनुष्य इति विभ्रमे ऽहमिति साधारणाकारेण प्रतीयमानस्य देहव्यतिरिक्तासाधारणस्वभावेनाप्रतीयमानत्वस्य परैरप्यभ्युपेयत्वादज्ञानस्यैकाश्रयविषयतायां न कश्चिद्दोष इति भावः ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

नन्वात्मनोऽपि ज्ञानस्वरूपत्वादनन्यत्वाच्च* ज्ञानप्रकृतित्वादिभ्यो हेतुभ्यो नैवाज्ञानं घटते। घटत एव। कथम्। अज्ञानमात्रनिमित्तत्वात्तद्विभागस्य, सर्पकल्पि-

---

उक्तमेवार्थं हेत्वन्तरावष्टम्भेनाक्षिपति नन्वात्मनोऽपीति॥ ज्ञानाज्ञानयोस्तमःप्रकाशयोरिव परस्परविरुद्धस्वभावत्वात्, ज्ञानस्वभावस्याऽऽत्मनो नाऽज्ञानाश्रयत्वं, तदाश्रयत्वे तन्निवर्तकत्वायोगात्, तथाऽऽश्रयाऽऽश्रयिभावस्य भेदगर्भत्वादद्वितीये चात्मनि तदयोगात्, अज्ञाननिवर्तकप्रमाणज्ञानाकारणत्वाच्चात्मनस्तन्निवर्तकपुष्कलकारणवतः सवितुरिवाप्रकाशाश्रयत्वस्यासम्भवात्, असङ्गत्वनित्यमुक्तत्वादिभ्यश्च हेतुभ्यो नाऽज्ञानाश्रयत्वसंभव इत्यर्थः। समाधत्ते घटत इति॥ पूर्वोक्तेषु हेतुषु जीवत्सु समाधानं दुर्घटमित्याक्षिपति कथमिति॥ तत्र ज्ञानस्वभावत्वज्ञानप्रकृतिकत्वादीनां दूषणानां सर्वैरपि समाधातुं शक्यत्वात्तान्युपेक्ष्यानन्यत्वादित्येतत्समाधत्ते अज्ञानमात्रनिमित्तत्वात्तद्विभागस्येति॥ यद्वा सर्वेषामपि दूषणानां समाधानत्वेनाऽयमेव ग्रन्थो योजयितुं शक्यते। तथा हि। तत्र तावद्युक्तं ज्ञानस्वभावत्वादात्मनोऽज्ञानं नोपपद्यते विरोधादिति तत्र किं प्रमाणं ज्ञानस्वभावत्वं किं वाऽनादिनिधनसाक्षिचैतन्यस्वभावत्वमिति विकल्प्याद्यं प्रत्याह अज्ञानमात्रेति॥ तस्य प्रमातृप्रमेयप्रमितिलक्षणविभागघटितस्वभावस्य प्रमाणज्ञानस्याज्ञानमात्रनिमित्तत्वेनानादिसिद्धात्मस्वभावत्वासंभवात्। न हि कल्पितमकल्पितस्य स्वभावः सर्पकल्पितेव रज्ज्वा इत्यर्थः। द्वितीयमपि प्रत्याह अज्ञानमात्रेति॥ साक्षिचैतन्यस्याज्ञानस्य च भास्यभासकत्वेनाविरोधात्

---

* सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतिप्रमाण्यादित्यर्थः।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

च रज्ज्वाः । तस्मात्तदपनुत्तौ द्वैतानर्थाभावः । तदपनोदश्च वाक्यादेव तत्पदपदार्थाभिज्ञस्य, अतो वाक्यव्याख्यानायाध्याय* आरभ्यते ॥

साक्षिण्यध्यासलक्षणसंबन्धमन्तरेण च तद्भास्यत्वायोगात् । भास्यभासकविभागस्योक्तन्यायेनात्मसंबन्ध्यज्ञानमात्रनिमित्तत्वात् । लोके ऽपि यद्यदधीनसत्ताप्रतीतिकं तत्तस्मिन्नेवाऽध्यस्तं दृष्टं यथा रज्ज्वाः सर्पात्मता रज्ज्वामेवाध्यस्ता तद्वदात्माधीनसत्ताप्रतीतिकमज्ञानमात्मन्येवाध्यस्तमित्यर्थः । यदुक्तं "आश्रयाश्रयिभावस्य भेदगर्भत्वादद्वितीये ब्रह्मणि नायमुपपन्न" इति तदपि निरस्यति अज्ञानमात्रेति ॥ परमार्थतो ऽद्वितीयत्वे ऽपि स्वस्मिन्नध्यस्ताज्ञानमात्रनिमित्तत्वादाश्रयाश्रयित्वविभागस्य रज्ज्वाः सर्पात्मतावत् तस्याज्ञानाश्रयत्वाविरोध इत्यर्थः । यदुक्तं "ज्ञानप्रकृतित्वादसङ्गत्वान्नित्यमुक्तत्वाच्चात्मनो ऽज्ञानमनुपपन्न"मिति । तदपि निराचष्टे अज्ञानमात्रेति ॥ रज्जुसर्पयोः प्रकृतिविकारविभागस्येव अज्ञानात्मनोः प्रकृतिविकारविभागस्याज्ञानमात्रनिमित्तत्वाद् ज्ञानप्रकृतित्वेनैवाज्ञानाश्रयत्वमात्मनः संभवति । असङ्गत्वनित्यमुक्तत्वादेव वास्तवस्वभावस्याज्ञानमात्रशरीरेण संबन्धादिविभागेनाविरोधात् तद्घटत एवात्मन्यज्ञानमिति भावः । एवं सर्वविभागानर्थनिदानमज्ञानमतस्तन्निवृत्तये तृतीयाध्यायारम्भ उपपन्न इत्यभिप्रेत्योपसंहरति तस्मादिति ॥ भवत्वेवं तथापि द्वितीयाध्यायोक्तयुक्तिभिरेव द्वैतस्य मिथ्यात्वावधारणात् आत्मनस्तदधिष्ठानस्य सत्यतया ऽधिगतत्वात्तत एवानर्थद्वैतस्य नित्यनिवृत्त्युपपत्तेः किं वाक्यव्याख्यानेनेति तत्राह तदपनोदश्चेति ॥ युक्तीनां प्रमाणा-

* तत्त्वमस्यादिमहावाक्यस्य व्याख्यानायेत्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

तत्र यथोक्तेन प्रकारेण तत्त्वमस्यादिवाक्योपनिविष्ट-पदपदार्थयोः* कृतान्वयव्यतिरेकः—

यदा ना तत्त्वमस्यादे-
र्ब्रह्मास्मीत्यवगच्छति ।
प्रध्वस्ताहंममो नैति
तदा गोर्मनसोः सृतिम् ॥ १ ॥

नुग्राहकतया स्वातन्त्र्येणानिश्चायकत्वाद्वाक्यादेव सम्यग्ज्ञानद्वारेण तदपनोद इति भावः । अवधारणेनानुमानादिप्रमाणान्तरं व्यावर्तयति । ननु तर्ह्ययमेवाध्याय आरभ्यतां किमतीतेन द्वितीयाध्यायेनेत्यत आह तत्पदेति ॥ तस्मिन्वाक्ये यानि पदानि ये च पदार्थास्तानि प्रसिद्धिलक्षणानुवृत्तिभिस्तांश्चतुर्विधान्वयव्यतिरेकाभ्यामभिजानत एव भवति वाक्यार्थज्ञानमतस्तत्प्रतिपादको द्वितीयो ऽध्यायो ऽस्याध्यायस्य हेतुरतो ऽनन्तरं हेतुमतो ऽस्यारम्भ उपपन्न इति भावः। यद्वा वाक्यादेव चेत्तदपनोदो वाक्यमेवोच्यतां किं तत्र पदार्थनिरूपणेन वक्ष्यमाणेनेति । तत आह तत्पदेति ॥ एवं सप्रयोजनत्वादनवगतार्थत्वाच्चाध्यायारम्भमुपसंहरति अत इति ॥ चिकीर्षितव्याख्यानप्रयोजनप्रदर्शनपरमुत्तरश्लोकमधिकारिविशेषाकाङ्क्षां पूरयन्नवतारयति तत्रेति॥ यदा नेति ॥ ना, पुरुषः प्रध्वस्ताहंममः, शोधिततत्त्वंपदार्थो भूत्वा तत्त्वमस्यादिवाक्यात् "दहमस्मि परं ब्रह्मे"ति वाक्यार्थमवगच्छति तदा गोर्मनसोर्वाङ्मनसयोः सृतिं नैति न प्रतिपद्यते सर्वव्यवहारातीतो भवतीत्यर्थः ॥ १ ॥

---

* वाक्यघटकपदतदर्थयोरित्यर्थः ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

यदैव तदर्थं त्वमर्थः ऽवैति तदैव वाक्यार्थतां प्रतिपद्यते गीर्मनसोः स्थितिं न प्रतिपद्यत इति । कुत एतदध्यवसीयते । यस्मात्—

तत्पदं प्रकृतार्थं स्या-
त्त्वंपदं प्रत्यगात्मनि* ।
नीलोत्पलवदेताभ्यां
दुःखनात्मत्ववारणे ॥ २ ॥

उक्तमर्थं कीर्तयन् तद्धेतुत्वेनोत्तरश्लोकमवतारयति यदैवेति ॥ यस्मिन्नेव क्षणे तदर्थं तत्पदस्यार्थमद्वितीयानन्दं ब्रह्म त्वमर्थं त्वंपदस्यार्थं बुद्ध्यादिसाक्षिणि परिशोधिते अवैति जानाति तत्त्वंपदयोरैक्यं प्रतिपद्यते तदैव तस्मिन्नेव क्षणे देशकालसाधनान्तरनिरपेक्षामवाक्यार्थतां भेदसंसर्गवाक्यार्थविलक्षणामखण्डैकरसतां प्रतिपद्य सर्वव्यवहारातीतो भवतीत्यत्र को हेतुरित्यर्थः । 'तत्त्वमसि' वाक्ये तत्पदं विधित्सितप्रकृताद्वितीयब्रह्मपरं त्वंपदं चोद्दिश्यमाने प्रत्यगात्मनि वर्तते । ततश्चैताभ्यां द्वाभ्यामन्योन्यनियम्यनियामकतया ऽवस्थिताभ्यां विधित्सितब्रह्मभावादेव प्रत्यगात्मनि दुःखित्वमनात्मनो बाधितत्वाच्च ब्रह्मणो ऽनात्मत्वं च व्यावर्तते । यथा नीलमुत्पलमित्युक्ते उत्पलस्यानीलत्वं नीलस्यानुत्पलत्वं च व्यावर्तते न तत्र देशकालसाधनान्तराद्यपेक्षा तद्वदिहापीत्याह तत्पदमिति ॥ २ ॥

ननु गामानय दण्डेनेति भिन्नविभक्तिनिर्दिष्टानामन्वयलक्षणो भेदो वाक्यार्थो नीलमुत्पलमित्यभिन्नविभक्तिनिर्दिष्टानां संसर्गात्म-

* प्रत्यगात्मबोधकम् । वाचकत्वं सप्तम्यर्थः ।

www.astrology-tantra.com
DR.RUPNATHJI (DR.RUPAK NATH)

एवं कृतान्वयव्यतिरेको वाक्याद्वेदवाऽवाक्यार्थं* प्रतिपद्यतइत्युक्तम् । अतस्तद्व्याख्यानाय सूत्रोपन्यासः—

सामानाधिकरण्यं च
विशेषणविशेष्यता ।
लक्ष्यलक्षणसम्बन्धः
पदार्थप्रत्यगात्मनाम् ॥ ३ ॥

अस्मिन् सूत्रे उपन्यस्ते कश्चिच्चोदयति, यो ऽयं वा-

क्येति वाक्यार्थो द्विविध एव दृश्यते न तु तद्व्यतिरिक्ताखण्डैकरसतालक्षणो वर्तते तत्कथं तदभिप्रायेणावाक्यार्थतां प्रतिपद्यतइत्युच्यतइत्याशङ्क्य तत्प्रतिपादयितुं प्रतिपत्तिसौकर्याय प्रथमं तावदुत्तरश्लोकः सूत्रस्थानीय उपन्यस्त इत्याह एवमिति ॥ सामानाधिकरण्यं चेति ॥ तत्त्वमस्यादिमहावाक्यस्थपदधर्मः सामानाधिकरण्यं प्रथमं भवति, सति च तस्मिन् सामानाधिकरण्ये वाच्यपदार्थयोः परस्परं विशेषणविशेष्यभावेनान्वयः स्यात्, सति च तस्मिन् विरोधस्फूर्त्तौ वाच्यपदार्थयोर्वाक्यतात्पर्यविषयस्य च प्रत्यगात्मनो लक्ष्यलक्षणसंम्बन्धः, एवं च यथाक्रमेण पदतदर्थप्रत्यगात्मनां सामानाधिकरण्यं विशेषणविशेष्यता लक्ष्यलक्षणसंम्बन्धश्च भवतीत्यर्थः ॥ ३ ॥

नन्वज्ञाननिवृत्तेर्दृष्टफलत्वात्तत्साधनज्ञानस्याविधेयत्वात् ज्ञानं प्रति च श्रवणादेरन्वयव्यतिरेकसिद्धसाधनत्वात् ज्ञानार्थितामात्रेण यस्य कस्यचिद्विधिं विना ऽपि श्रवणादौ प्रवृत्त्युपपत्तेः शास्त्रीयस्य विशिष्टाधिकारिणो ऽभावा“दधिकारिणः प्रमितिजनको वेद” इति

---

* अवाक्यार्थम्=वाक्याऽवाच्यं, ब्रह्मेति यावत् ॥

क्यार्थप्रतिपत्तौ पूर्वाध्यायेनान्वयव्यतिरेकलक्षणो न्यायः सर्वकर्मसंन्यासपूर्वको ऽभिहितः किमयं विधिपरिप्रापितः किं वा स्वरसत एवात्र पुमान् प्रवर्ततइति। किं चातः, शृणु। यद्यात्मवस्तुसाक्षात्करणाय विधिप्रापितो ऽयं न्यायस्तदा ऽवश्यमात्मवस्तुसाक्षात्करणाय व्यावृत्तशुभाशुभकर्मराशि*रेकाग्रमना अन्वयव्यतिरेकाभ्यां यथोक्ताभ्यामात्मदर्शनं करोति, अपरिसमाप्यात्मदर्शनं ततः प्रच्यवमान आरूढपतितो भवति। यदि पुनर्यदृच्छातः प्रवर्तते तदा न कश्चिद्दोष† इति विधिपरिप्रापित इति ब्रूमः। यत आह—

न्यायाच्च तत्त्वमस्यादिवाक्यस्य न प्रमितिजनकत्वम्। अतस्तद्व्याख्यानाय सूत्रोपन्यासो व्यर्थ इत्याशयवान् कश्चित्प्रत्यवतिष्ठते इत्याह अस्मिन्नित्यादिना॥ वाक्यार्थज्ञानसाधनविषयायाः प्रवृत्तेर्विधिप्रयुक्तत्वे दोषमाह यद्यात्मवस्त्विति॥ यावदसंभावनाविपरीतभावनारहितफलपर्यन्तज्ञानोत्पत्तिस्तावदधिकारिणा मुमुक्षुणा ज्ञानसाधनान्यवश्यानुष्ठेयानीत्यर्थः। नन्वनुष्ठानमात्रमेवास्तु किमिति फलपर्यन्तमनुष्ठानमित्यत आह अपरिसमाप्येति॥ विध्यतिलङ्घनात्प्रत्यवायी स्यादित्यर्थः। रागप्रयुक्तत्वे कश्चिदपि दोषो नास्तीत्याह यदि पुनर्यदृच्छात इति॥ रागत इत्यर्थः। ज्ञानसाधनविषया प्रवृत्तिर्विधिप्रयुक्तैवेति पक्षं स्वीकुर्वन्परिहरति विधीति॥ विधिं विना ऽपि श्रवणादौ

---

* निष्कामकर्मानुष्ठानभोगाभ्यां कृतनिखिलसंन्यास इत्यर्थः।

† विधिप्रयुक्तत्वाभावादेव न तदुल्लङ्घनरूपो दोष इत्यर्थः।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

शमादिसाधनः पश्ये-
दात्मन्यात्मानमञ्जसा ।
अन्वयव्यतिरेकाभ्यां
त्यक्त्वा युष्म*दशेषतः ॥ ४ ॥

युष्मदर्थे परित्यक्ते
पूर्वोक्तैर्हेतुभिः श्रुतिः ।
वीक्षापन्नस्य को ऽस्मीति
तत्त्वमित्याह सौहृदात् ॥ ५ ॥

प्रवृत्तिरुपपादितेत्याशङ्क्य तदुत्तरत्वेन श्लोकमवतारयति यत आहे-ति ॥ शमादीति ॥ "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा ऽऽत्मन्येवात्मानं पश्ये"दित्यादिवाक्ये ज्ञानस्य विधेयत्वात् यत्पश्येत्तच्छान्त्यादिगुणयुक्तो भूत्वेति ज्ञानसाधने विधेः पर्यवसानात् "श्रोतव्यो मन्तव्य" इति च विधानात् श्रवणादेर्दृष्टोपायत्वे ऽपि नियमादृष्टविशिष्टतया ज्ञानसाधनत्वस्यावश्याभ्युपेयत्वात् एवं विशिष्टाधिकारिणः संभवान्नायं दोष इत्यर्थः । केनोपायेनेत्यत आह अन्वयव्यतिरेकाभ्यामिति ॥ ४ ॥

ननु किमन्वयव्यतिरेकाभ्यामेव वाक्यनिरपेक्षाभ्यामात्मदर्शनमिति नेत्याह युष्मदर्थ इति ॥ युष्मदि अहंकर्त्तुरिदमंशप्रभृति देहेन्द्रियादिपर्यन्ते पूर्वाध्यायोक्तहेतुभिरनात्मकतया परित्यक्ते सत्यद्वितीयपरमानन्दस्वरूपस्यात्मनो ऽनाद्यज्ञानव्यवहितत्वात्को ऽहमित्यनिर्धारितासाधारणात्मस्वभावतया पर्यालोचनासमाकुलस्याधिकारिणो मातृकल्पा श्रुतिस्त्वं तदेवाऽसीति सौहृदादज्ञाननिरसनायाहे-

---

युष्मत्=युष्मदर्थम् । देहेन्द्रियादिदृश्यम् ।

DR.RUPNATHJI(DR.RUPAK NATH)

www.astrology-tantra.com

अत्रापि चोदयन्ति सांख्याः । शरीरेन्द्रियमनोबुद्धिष्वनात्मस्वात्मेति निःसंधिबन्धनं मिथ्याज्ञानं तन्निबन्धनो ह्यात्मनोऽनेकानर्थसम्बन्धस्तस्य चाऽन्वयव्यतिरेकाभ्यामेव निरस्तत्वान्निर्विषयं तत्त्वमस्यादिवाक्यं प्राप्तम् । तस्माद्वाक्यस्य चैष महिमा यो ऽयमात्मानात्मनोर्विभाग इति* । तन्निराकरणायेदमुच्यते—

भेदसंविदिदं ज्ञानं
भेदाभावश्च साक्षिणि ।
कार्यमेतदविद्यायाः
ज्ञात्मना त्याजयेद्वचः ॥ ६ ॥

त्यर्थः ॥ ५ ॥

आत्माऽनात्मविवेके सत्यप्यज्ञाननिवृत्तये वाक्यं प्रवर्तते इत्युक्तं तस्मिन्नर्थे सांख्यानां चोद्यमुत्थापयति अत्रेति ॥ निःसंधिबन्धनमिति ॥ अहमित्यैक्यप्रातिपदिकार्थत्वेन ज्ञानं तदेव मिथ्याविषयत्वान्मिथ्याज्ञानं तदेव चाज्ञानं नान्यदनाद्यस्तीत्यर्थः । अनर्थहेतुतया प्रसिद्धमज्ञानमन्यदस्तीत्यत आह तन्निबन्धन इति ॥ अस्त्वेवं ततः किमित्यत आह तस्य चेति ॥ अतो निर्विषयत्वपरिहारायान्वयव्यतिरेकाभ्यां सहितस्य मिथ्याज्ञाननिरसनेनात्मानात्मविवेककरणं वाक्यस्य कृत्यं नानाद्यज्ञाननिरसनमित्याह तस्मादिति ॥ इदानीमेतदुत्तरत्वेन श्लोकमवतारयति तन्निराकरणायेति ॥ भेदसंविदिति ॥ यदिदमात्मानात्मविवेकवि-

---

*तथा च वाक्यस्यात्मानात्मनोर्विवेचनमेव फलं नाज्ञाननिवृत्तिरिति भावः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

'आत्मना त्याजयेद्ध' इत्युपश्रुत्याह कस्मिन्मिथ्या-ज्ञानव्यतिरेकेणात्माऽनवबोधस्याऽभावात् किं वाक्येन निवर्त्यते । अज्ञानं हि नाम ज्ञानाभावः, तस्य चाऽव-स्तुस्वाभाव्यात्कुतः संसारकारणत्वम् । न ह्यस-तः सज्जन्मेष्यते । "कुतस्तु खलु सोम्यैवं स्यादिति क-थमसतः सज्जायते" इति श्रुतेरित्यत्रोच्यते—

ज्ञानं तद्भेदसंविद्, भेदप्रमितिफलम्। "एकधैवानुद्रष्टव्य"मित्यादिना च सार्वत्रिकं वाक्यतात्पर्यविषये भेदाभावः श्रूयते। तस्मादिदं विवेक-विज्ञानं भेदशून्ये वस्तुनि भेदज्ञानत्वान्मिथ्याकार्यं भ्रमरूपं, ततश्च तत्र वाक्यजन्यं तस्माद्वाक्यं ज्ञानात्मनाऽद्वितीयबोधाकारवृत्तिद्वा-रेण ज्ञात्मतावन्मात्रतया सकार्यभेदज्ञानं त्याजयेत् निवर्तयतीत्ये-तदाह भेदसंविदिति ॥ ६ ॥

अनाद्यग्रहणव्यतिरेकेण भावरूपा ऽनाद्यविद्या न विद्यतइति चोद्यान्तरमुत्थापयति ज्ञात्मेति ॥ अनर्थहेतुतया निवर्तनीयत्व-मप्यात्माऽज्ञानस्याऽसिद्धमित्याह तस्य चेति ॥ एतदुत्तरत्वेन श्लोकम-वतारयति अत्रोच्यतइति ॥ धर्मिग्रहणप्रतियोगिस्मरणलक्षणबुद्धिज-न्मनः प्रागेव सुषुप्त्यवस्थायां सर्वार्थविषयमज्ञानमनुभूयते । एता-वन्तं कालं न किंचिदज्ञासिषमित्युत्थितस्य परामर्शदर्शनादननुभूते च तदयोगात् । धर्मिप्रतियोगिज्ञानं विना ज्ञानाभावस्यानुभ-वितुमशक्यत्वात् । उत्थितस्य च ज्ञानाभावानुमानस्य लिङ्गा-भावात् । स्मरणाभावस्य चानैकान्तिकत्वेनाऽलिङ्गत्वात् भावरूप-मज्ञानमित्यर्थः ॥

तच्चाज्ञानस्य सर्वार्थविषयत्वाङ्गीकारादात्मैकविषयत्वं पूर्वोक्तमप-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अज्ञात एव सर्वो ऽर्थः
प्राग्यतो बुद्धिजन्मनः ।
एकेनैव सता संश्च*
सन्न ज्ञातो भवेत्ततः ॥ ७ ॥

गतमित्यत आह एकेनैवेति ॥ नामरूपात्मकप्रपञ्चलक्षणः सर्वोऽर्थः प्रलय इव सुषुप्तावज्ञातसन्मात्राऽवशेषं प्रलीयते ततश्च प्रबोधसमये पुनरुद्भवतीति हि वेदान्तसिद्धान्तः । "यदा सुषुप्तः स्वप्नं न कं च न पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येती"त्यारभ्य "स यदा प्रतिबुध्यते यथा ऽग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका" इति स्वापप्रबोधयोः प्रलयप्रभवश्रवणात् । कल्पितस्य च द्वैतस्य शुक्तिरजतादेरिव प्रतिभासमात्रशरीरस्य प्रतिभासदशायां स्वकल्पनाधिष्ठानसन्मात्रातिरेकेण स्वरूपेणावस्थानासंभवाच्च । तथा च सुषुप्तिदशायामेकेनैव सता सर्वस्य सत्त्वं स एव च सन्ननादेरज्ञानस्य विषयावरकस्वभावस्य विषयस्ततो ऽन्यस्य तत्कल्पितस्य तद्विषयत्वानुपपत्तेस्ततः सन्नेव सुषुप्तावज्ञात इत्यात्मैकविषयत्वमज्ञानस्य अपगतमित्यर्थः । यद्वा जाग्रद्दशायामपि सर्वोऽर्थो घटपटादिलक्षणः स्वबुद्धिजन्मनः प्रागज्ञात इत्यर्थस्य संप्रतिपन्नत्वादर्थस्य न ज्ञातत्वे पश्चात्तद्विषयज्ञानोदयाऽयोगात्, ज्ञानानुदयसदृशे चार्थस्य व्यवहार्यताऽसंभवात्, सामान्याकारेण ज्ञातत्वेप्यज्ञाताकारस्य ज्ञातत्वाऽयोगा,दज्ञाताकारस्य चानुवादायोगात्, ज्ञा-

---

* एकेनैव सतः सत्त्वमिति पुस्तकान्तरे पाठः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

'सन्न ज्ञातो भवेत्तत' इत्युक्तमधस्तनेन श्लोकेन, कोऽसौ सन्न ज्ञात इत्यपेक्षायां तत्स्वरूपप्रतिपादनायाह —

प्रमित्सायां य आभाति
स्वयं मातृप्रमाणयोः ।
स्वमहिम्ना* च यः सिद्धः
सोऽज्ञातार्थोऽवसीयताम् ॥ ८ ॥

अत्र केचिदाहुर्यत्किञ्चिदिह वाक्यं लौकिकं वैदिकं वा तत्सर्वं संसर्गात्मकमेव वाक्यार्थं गमयति ।

नाभावविलक्षणभावरूपाज्ञानेनावृत इत्याह अज्ञात एवेति ॥ ननु सर्वस्याज्ञातत्वे तद्विषयप्रमाणेन विना तन्निवृत्त्यसंभवादात्मवत्प्रमेयत्वं सर्वस्य प्रसज्यत इत्याशङ्क्य सर्वविशेषानुगतसद्भावस्यैवाज्ञातत्वात् प्रमेयत्वमपि तस्यैवेत्याह एकेनैवेति ॥ ७ ॥

भवत्वेवंभूतमज्ञानं तस्य कथं प्रतीतिरित्यत आह प्रमित्सायामिति ॥ पदार्थानां प्रमित्सादशायां य. प्रमातृप्रमाणयोः प्रमातरि प्रमाणे च स्फुरति प्रमाता स्फुरति, स्फुरति प्रमाणमिति स्फुरणात्मना योऽवभासते तदभावे† च तदभावसाक्षितया सुषुप्त्यादौ स्वभावादेव स्फुरति सोऽयमज्ञातोऽर्थः । तेन च स्वतःसिद्धसाक्षिचैतन्यसिद्धमज्ञानं प्रमाणनिवर्त्यस्य प्रमाणसिद्धत्वानुपपत्तेरित्यर्थः ॥ ८ ॥

तत्त्वमस्यादिवाक्यादवाक्यार्थतां प्रतिपद्यत इति यदुक्तं तदयुक्तमुपायान्तरादवाक्यार्थप्रतिपत्तेरित्याक्षिपति अत्र केचिदाहुरिति ॥ शब्दस्य संसर्गबुद्धिजनकत्वस्वाभाव्यान्न तेनाऽवाक्यार्थप्रति-

* प्रकाशान्तराऽनधीनप्रकाशरूपेणेत्यर्थः ।

† प्रमित्साऽभावदशायामित्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अतस्तत्त्वमस्यादिवाक्येभ्यः संसर्गात्मकमहं ब्रह्मेति विज्ञाय तावन्निदिध्यासीत यावद्वाक्यार्थात्मकः प्रत्यगात्मकः प्रत्यगात्मविषयो ऽहंब्रह्मेति समभिजायते तस्मादेवंविज्ञानात्कैवल्यमाप्नोतीति तन्निराकरणायेदमुच्यते—

सामानाधिकरण्यादे-
र्घटेतरखयोरिव ।

पत्तिरित्यर्थः । कुतस्तर्हि वाक्यार्थप्रतिपत्तिरित्यत आह अत इति ॥ अस्द्ज्ञानाभ्यासजनिततृतीयज्ञानादेवावाक्यार्थप्रतिपत्तिरित्यर्थः । वाक्यजं ज्ञानं मोक्षसाधनमपि न भवतीत्याह तस्मादिति ॥ सामानाधिकरण्यादेरिति ॥ यद्यपि नीलं महत्सुगन्ध्युत्पलमित्यादौ पदानां सामानाधिकरण्यस्य पदार्थानामन्योन्यविशेषणविशेष्यभावस्य च संसर्गात्मकवाक्यार्थपर्यवसायित्वं दृश्यते तथा घटाकाशो महाकाश इत्यादौ पदसामानाधिकरण्यस्य पदार्थानां विशेषणविशेष्यभावस्य च पदार्थवाक्यार्थयोर्लक्ष्यलक्षणभावेनाखण्डार्थपर्यवसायित्वं न दृश्यते तथापि घटविशिष्टाकाश*तदवच्छिन्नाकाशयोः परस्परसंसर्गविरोधात् अविरोधाय घटाकाशे परिच्छिन्नत्वांशं† महाकाशे च महत्त्वधर्मं व्यावर्त्य लक्षणया ऽऽकाशस्वरूपमात्रपर्यवसायित्वं तत्र पदानां दृष्टमेवं तत्त्वमस्यादिवाक्यगतपदसामानाधिकरण्यात् तत्त्वमर्थयोर्विशेषणविशेष्यभावाच्च संसर्गप्राप्तौ विरोधात् त्वमर्थगतदुःखित्वस्य तदर्थग-

---

* घटावच्छिन्नाकाशेत्यर्थः ।

† अवच्छेदकांशं, घटादिरूपमित्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

व्यावृत्तेः स्याद्‌वाक्यार्थः
साक्षान्नस्तत्त्वमर्थयोः ॥ ९ ॥

कुतो ऽवाक्यार्थो ऽवसीयतइति चेत्तत्प्रतिपत्त्यर्थं विशेषणविशेष्ययोः सामर्थ्योक्तिः—

निर्दुःखित्वं त्वमर्थस्य
तदर्थेन विशेषणात् ।
प्रत्यक्ता* च तदर्थस्य
त्वंपदेनास्य सन्निधेः ॥ १० ॥

तत्पारोक्ष्यस्य च व्यावृत्तेरखण्डैकरसस्य वस्तुनो वाक्यप्रतिपिपादयिषितस्य पदाभ्यां† लक्षणात् वाक्यादेवास्माकमवाक्यार्थप्रतिपत्तिसंभवान्न तत्प्रतिपत्तेर्निदिध्यासनापेक्षेत्यर्थः ॥ ९ ॥

नन्वेकपदस्य वाक्यस्याभावाद् बहूनां पदानामेकार्थत्वे पौनरुक्त्यप्रसङ्गादपुनरुक्तार्थानामखण्डार्थपर्यवसायित्वानुपपत्तेः संसर्ग एव वाक्यार्थ इत्याचिपन्ति कुत इति ॥ अन्यव्यावृत्तिमुखेनैकार्थपर्यवसायिनां पदानां लक्ष्यार्थाभेदे ऽपि व्यवच्छेद्यभेदादपुनरुक्तार्थसंभवात्संभवत्येव वाक्यादवाक्यार्थप्रतिपत्तिरित्युत्तरश्लोकेन दर्शयतीत्याह तत्प्रतिपत्त्यर्थमिति ॥ निर्दुःखित्वमिति ॥ त्वमर्थस्य चैतन्यस्य प्रसिद्धत्वादुद्दिश्यमानस्य विधीयमानतत्पदार्थेनाद्वयानन्दलक्षणेन विशेषणात्तद्विरुद्धदुःखित्वं निरस्यते तद्वत्पारोक्ष्यत्वेन प्रतीयमानस्य तत्पदार्थस्य विशेषणवाचिना त्वंपदेन संनिधेस्तत्पदपारोक्ष्यव्यावृत्त्या प्रत्यक्ता भवति तत्र कुतः पौनरुक्त्यं कुतश्चाखण्डार्थो ऽप्रतिपत्तिरित्य-

---

* प्रत्यक्ता=पारोक्ष्यम् ।
† पदाभ्यां=तत्त्वंपदाभ्याम् ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

उक्तं सामानाधिकरण्यं विशेषणविशेष्यभावश्च संक्षेपतः। अथ लक्ष्यलक्षणव्याख्यानायाह—

कूटस्थबोधप्रत्यक्त्व-
मनिमित्तं सदात्मनः।
बोद्धृताहन्तयोर्हेतु-
स्ताभ्यां तेनोपलक्ष्यते ॥ ११ ॥

र्थः। यद्वा त्वंपदेन त्वंशब्दः पदं यस्य स त्वंपदः तेन त्वमर्थेन विशेषणादित्यर्थः॥ १० ॥

सामानाधिकरण्यं चेत्यस्मिन् सूत्रश्लोके संक्षेपतस्तावत्पूर्वार्धो व्याख्यातः। अथेदानीमुत्तरार्धव्याख्यानं क्रियतइत्याह उक्तमिति॥ उत्तरत्रापि सामानाधिकरण्यविशेषणविशेष्ययोर्विशेषो व्याख्यात इत्यभिप्रेत्य संक्षेपत इत्युक्तम्। कूटस्थ इति॥ गिरिशृङ्गवन्निश्चलतया तिष्ठतीति कूटस्थः, कूटस्थश्चासौ बोधश्चेति कूटस्थबोधः स चासौ प्रत्यक् चेति कूटस्थबोधप्रत्यक् तस्य भावस्तत्त्वम्। तदिदं कूटस्थबोधप्रत्यक्त्व*मात्मनो लक्ष्यमनिमित्तं निर्हेतुकं स्वाभाविकमत एवात्मनः सदा ऽस्तीत्यर्थः। यद्वा सदात्मनः परमार्थस्यास्तीत्यर्थः। भवत्वेवमेतावता प्रकृते लक्ष्यलक्षणव्याख्याने किमायातमित्यत आह बोद्धृतेति॥ प्राकृताया बुद्धेः स्वभावतो बोधशून्यायाः कूटस्थबोधो बोद्धृताया वह्निरिवायसो दग्धृतायास्तथा ऽऽत्मनः प्रत्यक्त्वं च पराचीनायाः बुद्धेरहंतायाः पराग्व्यावृत्तरूपताया हेतुः, तेन हेतुमत्त्वेन संबन्धेन बुद्धिगतबोद्धृताहंताभ्यामात्मा लक्ष्यते। तदेवं बुद्धिविशिष्टस्य त्वंपदवाच्यस्य लक्षणत्वं केवलस्य लक्ष्यत्वं चोपप-

---

* अपरिणामिनित्यज्ञानात्मकत्वं, जडप्रातिकूल्येन प्रकाशमानत्वं चेत्यर्थः।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

बुद्धेः कूटस्थबोधप्रत्यक्त्वनिमित्ते बोद्धृताप्रत्यक्त्वे ये त्वसाधारणे तयोर्विशेषवचनम्—

बोद्धृताकर्तृताबुद्धेः
कर्मता स्यादहन्तया ।
तयोरैक्यं यथा बुद्धौ
पूर्वयोरेवमात्मनि ॥ १२ ॥

यथा बुद्धौ पूर्वयोरेवमात्मनीत्यतिदेशेन बुद्धिसा-

न्नमित्यर्थः ॥ ११ ॥

ननु बुद्धेर्बोद्धृत्वप्रत्यक्त्वे यदि प्रत्यक्चैतन्यगतबोद्धृत्वप्रत्यक्त्वनिमित्ते स्यातां तर्हि बुद्धिगतबोद्धृत्वप्रत्यक्त्वयोरात्मगतबोद्धृत्वप्रत्यक्त्वाभ्यां विशेषो वाच्यः । अन्यथा हेतुहेतुमद्भावायोगादित्याशङ्क्य बुद्धेरसाधारणे ये बोद्धृत्वप्रत्यक्त्वे तयोर्विशेषमाह बुद्धेरिति ॥ बोद्धृतेति ॥ बुद्धेर्बोद्धृता नाम विविधविषयाकारविज्ञानपरिणामकर्तृत्वं न त्वात्मवत् कूटस्थबोधरूपता तस्याः प्रत्यक्ता तु अहंतया अहंरूपेण व्यवधानेन* चैतन्यं प्रति कर्मता स्यात् न त्वात्मन इवाशेषविशेषव्यावृत्तं निरुपचरितं प्रत्यक्त्वम् । कतिपयदेहेन्द्रियादिविषयापेक्षया तस्याः प्रत्यक्त्वादित्यर्थः । तर्हि बुद्धिगतयोर्बोद्धृताप्रत्यक्त्वयोरत्यन्तभेदवदेवमात्मनीत्याशङ्क्य नेत्याह तयोरिति ॥ बुद्धेरपीह बोद्धृत्वमिव प्रत्यक्त्वं प्रतियोगिनोर्बोध्याकारबाह्याकारयोर्भेदात् भिन्नवद् व्यपदिश्यते तद्वदात्मन्यपि हि पूर्वयोर्बुद्धिगतबोद्धृत्वादिविशिष्टाः कूटस्थबोधप्रत्यक्त्वयोर्न वास्तवभेद इत्यर्थः ॥ १२ ॥

यथा बुद्धौ बोद्धृताप्रत्यक्त्वे एवं कूटस्थबोधप्रत्यक्त्वयोः परस्परमात्म-

---

* विशिष्टरूपेण=शबलात्मतयेति यावत् ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

धर्म्यविधानान्नानात्वप्रसक्तौ तदपवादार्थमाह—

धर्मधर्मित्वभेदो ऽस्याः
सो ऽपि नैवात्मनो यतः ।
प्रत्यग्ज्योतिरतो ऽभिन्नं
भेदहेतोरसंभवात्* ॥ १३ ॥

भेदहेत्वसंभवं दर्शयन्नाह—

न कस्यां चिदवस्थायां
बोधप्रत्यक्त्वयोर्भिदा ।
व्यभिचारो ऽथवा दृष्टो
यथा ऽहंतद्विदोः सदा ॥ १४ ॥

नीत्यतिदेशादात्मा धर्मी ते च धर्माविति भेदशङ्कायां तन्निरासा-
योत्तरश्लोक इत्याह यथा बुद्धाविति ॥ धर्मधर्मित्वभेदो वेद्याया बु-
द्धेरेव प्रयुज्यते आत्मनस्त्ववेद्यस्य सिद्धान्तैकदेशिभिरभ्युपगतत्वेन
संभावितो ऽपि स भेदो न संभवतीति यतो ऽतः प्रत्यग्ज्योतिरेक-
रसं भेदज्ञानसामग्र्यभावादित्यर्थः ॥ १३ ॥
हेत्वसिद्धिमाशङ्क्याह भेदेति ॥ बोधप्रक्त्वयोराकारभेदानुपलम्भात्त-
योरन्योन्यव्यभिचाराऽदर्शनाच्च भेदहेतुर्न संभवतीत्यर्थः । अत्र वैध-
र्म्यदृष्टान्तमाह यथाहंतद्विदोरिति ॥ यथाऽहंकारतत्साक्षिणोर्जडा-
जडत्वेन भास्यभासकत्वेन भेदः, यथा च सुषुप्त्यादौ साक्षिणि वि-
द्यमाने ऽप्यहंकारस्य व्यभिचारस्तथा न बोधप्रत्यक्त्वयोरित्य-
र्थः ॥ १४ ॥

---

* भेदसाधकप्रमाणाभावात् ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

यस्मादज्ञानोपादानाया एव बुद्धेर्भेदो न त्वात्मनस्तस्मादेतत्सिद्धम्—

कूटस्थबोधतो ऽद्वैतं
साक्षात्त्वं* प्रत्यगात्मनः ।
कूटस्थबोधाद्बोद्ध्री धीः
स्वतो ह्यीयं विनश्वरी ॥ १५ ॥

अथाधुना प्रकृतस्यैव परिणामिनः कूटस्थस्य च लक्षणमुच्यते—

विशेषं कं चिदाश्रित्य
यत्स्वरूपं प्रतीयते ।

उत्तरश्लोकेन फलितं कथयतीत्याह यस्मादिति ॥ प्रत्यगात्मनः कूटस्थबोधस्वभावात्सर्वधीष्वेकत्वं सर्वत्रापरोक्षस्वभावत्वं च सिद्धमित्यर्थः । यद्वा साक्षात्त्वमद्वितीयत्वं द्वितीयशून्यत्वं सिद्धं कूटस्थबोधत्वेन द्वितीयसंबन्धायोग्यत्वादित्यर्थः । ननु बुद्धेर्बोद्धृत्वे ऽपि द्वैतसंबन्धवदात्मनो ऽपि द्वैतसंबन्धः किं न स्यादित्याशङ्क्य मैवं तस्याः स्वतो बोद्धृताऽभावादित्याह कूटस्थबोधादिति ॥ बुद्धेर्बोद्धृत्वं कूटस्थबोधप्रसादादेव न स्वत इत्यर्थः । कुत एतदित्याह स्वतो ह्यीति ॥ अनित्यत्वान्न नित्यबोधात्मकत्वमित्यर्थः ॥ १५ ॥

एवं परिणामिना ऽहंकारेण कूटस्थात्मा लक्ष्यत इत्युक्तं, तयोर्लक्षणजिज्ञासायां तदिदानीमुच्यते इत्याह अथाधुनेति ॥ तत्र तावत्परिणामिलक्षणमाह विशेषमिति ॥ घटं जानामि पटं जानामि

* साक्षित्वमिति पाठान्तरम् ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

प्रत्यभिज्ञाप्रमाणेन
परिणामी स देहवत् ॥ १६ ॥
सामान्याच्च विशेषाच्च
स्वमहिम्नैव यो भवेत् ।
व्युत्थायाप्यविकारी स्या-
त्कुम्भाऽऽकाशादिवत्तु नः ॥ १७ ॥

आत्मनो बुद्धेश्च बोधप्रत्यगात्मत्वमभिहितं, तयोर-साधारणलक्षणाभिधानार्थमाह—

बुद्धेर्यत्प्रत्यगात्मत्वं
तत्स्याद्देहाद्युपाश्रयात् ।

सुख्यहं दुःख्यहमिति विशेषवत्त्वे ऽपि य एवाहं दुःखी स एवाह-मिदानीं सुखीति प्रत्यभिज्ञया यदेकत्वेन प्रतीयते बाल्ययौवना-द्यवस्थाभेदे ऽपि तदनुगतदेहवत् अनुवृत्तः स परिणामीत्यर्थः ॥ १६ ॥

कूटस्थस्य लक्षणं निर्दिशति सामान्याच्चेति ॥ अनुवृत्तव्यावृत्त-साक्षित्वादहमहमित्यनुवृत्ताकारादहं सुखी अहं दुःखीति व्यावृ-त्ताहंकाराच्च यः स्वमहिम्ना स्वभावबलाद् व्युत्थायावस्थितः, यद्वा तस्माद् व्युत्थाय स्वमहिम्नैव स्वप्रकाशतयैव यः प्रतीयते स कूटस्थ इत्य-र्थः । अत्र दृष्टान्तः, कुम्भाकाशादिवदिति ॥ यथा कुम्भाद्यवच्छिन्नत्वे-नाऽवभासमानो ऽप्याकाशः कुम्भादिविकारैः*र्विकारवान्न भवति स्वभावबलात्तेभ्यो व्युत्थाय व्यवस्थितस्तद्वदित्यर्थः ॥ १७ ॥

एवं लक्ष्यलक्षणयोर्बुद्ध्यात्मनोर्लक्षणमभिहित,मधुना तयोरसा-

---

* विकारैः=उत्पत्त्यादिभिः ।

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

आत्मनस्तु स्वरूपं त-
न्नभसः सुषिता यथा ॥ १८ ॥
बोद्धृत्वं तद्वदेवास्याः
प्रत्ययोत्पत्तिहेतुतः* ।
आत्मनस्तु स्वरूपं त-
त्तिष्ठन्तीव महीभृतः ॥ १९ ॥

तयोः कूटस्थपरिणामिनोरात्माऽनयोश्च एव संब-

धारणे ये रूपे उपदिष्टे बोधप्रत्यगात्मत्वे तयोर्विशेषतो लक्षणाभिधानायोत्तरश्लोक इत्याह आत्मन इति ॥ तत्र तावद् बुद्ध्यात्मनोः प्रत्यक्त्वे विशेषमाह बुद्धेरिति ॥ बुद्धेः प्रत्यक्त्वं देहाद्यपेक्षम् । 'य आत्मा सर्वान्तर' इति श्रुतेरात्मनः प्रत्यक्त्वं स्वाभाविकम् । आकाशस्य सुषिरत्ववदित्यर्थः† ॥ १८ ॥

इदानीं तयोर्बोद्धृत्वे विशेषमाह बोद्धृत्वमिति ॥ बुद्धेर्बोद्धृत्वं बोधकर्तृत्वोपाधिकम्, आत्मनस्तु स्वभाव एव नान्योपाधिकमित्यर्थः । अत्र दृष्टान्तः, तिष्ठन्तीव महीभृत इति ॥ जङ्गमेषु प्राणिगतिनिवृत्त्यपेक्षया तिष्ठतेः प्रयोगो न तथा तिष्ठन्ति महीभृत इति किन्तु स्वभावसिद्धाचलत्वविवक्षया, तद्वदित्यर्थः ॥ १९ ॥

ननु लक्ष्यलक्षणयोरात्माहंकारयोः संबोधोऽस्ति वा न वा, अस्ति चेदात्मनः सविशेषत्वं, नास्ति चेन्न लक्ष्यलक्षणभाव इत्याशङ्क्य

---

* प्रत्ययोत्पत्तिहेतुतः । अन्तःकरणस्य तत्तद्विषयाकारेण वृत्तौ जातायां तत्र चिदुपरागे सत्येव बुद्धौ बोद्धृत्वादिव्यवहारो भवति नेतरथा तद्वदित्यर्थः ।

† आकाशस्यावकाशदातृत्वं यथा स्वाभाविकमेवमात्मनः प्रत्यक्त्वं स्वाभाविकमेवेति भावः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

न्धहेतुर्न पुनर्वास्तवः कश्चिदपि संबन्ध उपपद्यत इत्याह—

सम्यक्संशयमिथ्यात्वै-
र्धीरेवेयं विभज्यते ।
हानोपादानता ऽमीषां
मोहादध्यस्यते दृशौ* ॥ २० ॥

कुतः कूटस्थात्मसिद्धिरिति चेदतः—

न हानं हानमात्रेण
नोदयो ऽपीयता यतः ।

नैवमाध्यासिकसंबन्धाभ्युपगमेन दोषद्वयपरिहारादित्याह तयोरिति ॥ सम्यगिति ॥ सम्यग्धीः संशयधीर्मिथ्याधीरित्येवमादिभिर्धर्मैर्धीरेव विभज्यते विशेष्यते । अतस्तेषां धीधर्माणामेव हानोपादानतासदसत्त्वं स्यात्तत्साक्षिण्यात्मनि मोहादनाद्यज्ञानवशादारोप्यते ततो न वस्तुनः सविशेषत्वं ना ऽपि संबन्धाऽभावेनात्मनो लक्ष्यत्वाद्यभाव इत्यर्थः ॥ २० ॥

बुद्ध्युपाधिसंबन्धमन्तरेणात्मनो बोद्धृताद्यदर्शनात्कूटस्थत्वं न सिध्यतीति शङ्कोत्तरत्वेन श्लोकमवतारयति कुत इति॥ बुद्धितद्वृत्तीनां हानमभावस्तत्तावन्न हानमात्रेण सिध्यति तदुदयस्तत्सद्भावः सो ऽपीयता सद्भावमात्रेण न सिध्यति यतस्तयोः सिद्धिस्तद्धीने बुद्धितद्वृत्तिरहिते हानोपादानधर्मशून्ये साक्षिण्यध्यस्ततया तच्चैतन्याभासोदयात्तद्गतविकारमन्तरेण भवति ततो न कूटस्थत्वव्याघात इत्यर्थः । अथ वा यत्सिद्धं तत्प्रमाणेनैव सिद्धं ततः स्वप्रकाशत्वं

---

* दृशौ = आत्मनि ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

तत्सिद्धिः स्यात्तु तद्धीने
हानादानविधर्मिणि ॥ २१ ॥

एवम्—

आगमापायिहेतुभ्यां
धूत्वा सर्वाननात्मनः* ।
ततस्तत्त्वमसीत्येत-
द्वाक्यादिदं निजं तमः ॥ २२ ॥

इत्यादि पुनः पुनरुच्यते† ग्रन्थलाघवाद् बुद्धिलाघवं प्रयोजकमिति । तत्र यद्यपि तत्त्वमस्यादिवाक्यादुपा-

---

मात्मनः संभवतीति शङ्कोत्तरत्वेन श्लोकमवतारयति कुत इति ॥ हानोपादानादीनां जडत्वेन स्वयं सेद्धुमशक्यत्वाच्चैतत्स्वभावानालिङ्गितस्वयंप्रकाशात्मनिमित्तैव तेषां सिद्धिरिति स्वयंप्रकाशत्वमात्मनः संभवतीत्यर्थः ॥ २१ ॥

ततो वाक्यमेवान्वयव्यतिरेकसहकृतमज्ञाननिवर्तकं न त्वन्वयव्यतिरेकावित्युक्तमर्थमुपसंहरति एवमिति ॥ तत्त्वमसीत्येतद्वाक्यं पूर्वमन्वयव्यतिरेकाभ्यामात्मानात्मविवेकं कृत्वा ऽप्यवस्थितस्य पश्चात्सकलसंसारस्य कारणमज्ञानं निवर्तयतीत्यर्थः ॥ २२ ॥

"यदा नातत्त्वमस्यादेर्नात्मना त्याजयेद्वच" इत्यादिना पूर्वमप्यनेकधैतदुक्तत्वात् पुनरुक्तिः स्यादित्याशङ्क्याह इत्यादीति ॥ अत्यन्तसूक्ष्मविषये बुद्धावारोपयितुमशक्यार्थस्य युगपदेव बहुना ग्रन्थेन

---

* अनात्मनः=देहेन्द्रियादीन् ।

† पुनः पुनर्निरूप्यतइति पाठान्तरम् ॥

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

दित्थिताद्द्वितीयात्मार्थवत्पारोक्ष्यसद्वितीयार्थः प्रतीयते तथा ऽपि तु नैवासावर्थः श्रुत्या तात्पर्येण प्रतिपिपादयिषितः प्रागप्येतस्य प्रतीतत्वादितीममर्थमाह—

तदित्येतत्पदं लोके
वस्त्वर्थप्रतिपादकम् ।
अपरित्यज्य पारोक्ष्य-
मभिधानीत्यमेव तत् ॥ २३ ॥
त्वमित्यपि पदं तद्व-
त्साक्षान्मात्रार्थवाचि तु ।

प्रतिपादने बुद्धिगौरवं भवति लघुना ग्रन्थेन बहुशः प्रतिपादने बुद्धिलाघवं बुद्धिसौकर्यं भवतीत्येतत्प्रयोजकं पुनः पुनः प्रतिपादनं न दोषायेत्यर्थः । भवत्वेवमुत्तरग्रन्थेन किं विवक्षितमित्यत आह तत्र यद्यपीति ॥ तत्त्वमस्यादिसामानाधिकरण्यं निमित्तीकृत्य पदद्वयेन लक्षणावृत्त्योपपादयितुमिष्टं प्रत्यगद्वयपदार्थवन्मुख्यया वृत्त्या प्रतीयमानपरोक्षत्वसद्वितीयत्वयोरपि वाक्यप्रमेयत्वमाशङ्क्य प्रतिपिपादयिषितार्थविरोधात्तत्प्रतिपादने पुरुषार्थाभावाद्वाक्यबोधादर्वागपि प्रतीयमानत्वाच्च न तस्य वाक्यप्रमेयत्वमित्युत्तरश्लोकाभ्यां प्रतिपाद्यत इत्यर्थः ॥ तदित्येतत्पदमिति ॥ तदित्येतत्पदं व्यवहितदेशकालत्वाद्युपाधिकं पारोक्ष्यमपरित्यज्यानुगतसामान्यादेशाद्यवच्छिन्नानामर्थानां पारोक्ष्यतया प्रतिपत्त्युपाधौ प्रतिपादकं लोके दृष्टम् । तस्मात्पारोक्ष्यमभिधानीत्यमेव शब्दादापाततः प्रतीयते न च वस्तुसंस्पर्शि भवति नापि प्रतिपिपादयिषितम् ॥ २३ ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

संसारितामसंत्यज्य
सा ऽपि स्यादभिधानजा ॥ २४ ॥

विरुद्धोद्देशनत्वाच्च पारोक्ष्यदुःखित्वयोरविवक्षितत्व-
मित्याह—

उद्दिश्यमानं वाक्यस्थं
नोद्देशेन गुणान्वितम् ।
आकाङ्क्षितपदार्थेन
संसर्गं प्रतिपद्यते ॥ २५ ॥

तथा तत्पदवत्त्वमित्यपि पदं स्वप्रवृत्तेः प्रागेव शब्दात्सिद्धां संसारितामसंत्यज्य साक्षात्मात्रार्थवाचि भवति अव्यवहिततया नित्यमपरोक्षतास्वभावमात्रे श्रोतरि बुद्धिमुत्पादयति अतः सा ऽपि संसारिता अभिधानजा आपाततः शब्दोत्था न वस्तुसंस्पर्शिनी नापि शब्दप्रतिपाद्या तत्प्रतिपत्तेः प्रागेव सिद्धत्वात्तत्प्रतिपादने पुरुषार्थाभावात् प्रतिपिपादयिषितवाक्यार्थविरोधाच्चेत्यर्थः ॥ २४ ॥

इतश्च पारोक्ष्यसंसारित्वयोरविवक्षितत्वमित्याह विरुद्धेति ॥ उद्देशनं प्रसिद्धरूपनिर्देशनम् । विरुद्धमुद्देशनम् । अनयोरिति विरुद्धोद्देशनौ पदार्थौ तयोर्भावस्तत्त्वं तस्मादपि तद्गतयोर्विरुद्धरूपयोरविवक्षितत्वमुत्तरश्लोकेनोच्यत इत्यर्थः । उद्दिश्यमानमिति ॥ तत्त्वमसिवाक्यगतमुद्दिश्यमानं त्वंपदार्थात्मकवस्तूद्देशेन गुणैर्नोद्देशनदशायां प्रतीयमानेन संसारित्वगुणेनान्वितं विशिष्टमाकाङ्क्षितपदार्थेन विधित्सितेन सकलसंसाररहितेन संसर्गमन्वयं न प्रतिपद्यते एवं तत्पदार्थो ऽप्युद्दिश्यमानः पारोक्ष्यादिविरुद्धगुणान्वितो नित्यापरोक्षप्रत्यगात्मना त्वंपदार्थेनान्वयं न प्रतिपद्यते तेनोभय-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

यत एतद्देवमतोऽनुपादित्सितयोरपि* तत्त्वमर्थयोर्विशेषणविशेष्यभावो भेदसंसर्गरहितावाक्यार्थलक्षणायैवेति उपसंहारः—

तद्वो विशेषणार्थत्वं
विशेष्यत्वं त्वमस्तथा ।
लक्ष्यलक्षणसंबन्ध-
स्तयोः स्यात्प्रत्यगात्मना ॥ २६ ॥

चापि विरुद्धधर्मयोरविवक्षितत्वमिति श्लोकार्थः ॥ २५ ॥

ननु नीलमुत्पलमित्यादौ विशेषणविशेष्यभावस्य विशिष्टपरता दृष्टा इहापि तथैवाभ्युपगन्तव्यमित्याशङ्क्य प्रतिपिपादयिषितार्थविरोधान्मैवाः क्रोशन्तीत्यादौ लक्षणापरत्वस्यापि दर्शनादिहापि तथा ऽभ्युपेयमित्याह यत एतदेवमिति ॥ भवतु तथापि किं विशेषणं किं वा विशेष्यमित्यत आह तद्वो विशेषणार्थत्वमिति ॥ ततस्तत्पदार्थस्य विशेषणत्वं तथा त्वमस्त्वंपदार्थस्य विशेष्यत्वं त्वंपदार्थस्याहमिति सामान्यतः प्रसिद्धत्वाद् देहेन्द्रियादिविशेषेषु च विप्रतिपत्तेरद्वितीयब्रह्मात्मावगतेरेव पुरुषार्थपर्यवसानाज्जिज्ञासानिवृत्तेस्त्वंपदार्थस्तत्पदार्थेन विशेष्यते । तत्र च विरोधस्फूर्तौ पदार्थाभ्यामखण्डैकरसः प्रत्यगात्मा लक्ष्यत इत्यर्थः । यद्वा तत्त्वमर्थयोरुभयोरप्यन्योन्यापेक्षया विशेषणत्वं विशेष्यत्वं च भवति त्वमो विशेषणार्थत्वं विशेष्यत्वं ततस्तथेत्यस्याप्युपलक्षणार्थत्वादस्य श्लोकस्येत्यर्थः ॥ २६ ॥

---

* अनुपादित्सितयोः = अविवक्षितयोः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

कथं पुनरविवक्षितविरुद्धनिरस्यमानस्य लक्षणार्थत्वम्—

लक्षणं सर्पवद्रज्ज्वाः
प्रतीचः स्यादहं तथा ।
तद्बाधेनैव वाक्यार्थं
वेत्ति सो ऽपि तदाश्रयात् ॥ २७ ॥

ननु गङ्गायां घोषः प्रतिवसतीत्यादौ गङ्गाशब्दस्य तीरलक्षकत्वेन तद्वाच्यस्य जलप्रवाहस्य नाऽविवक्षितत्वं, विशिष्टतीरावगतिप्रयोजकत्वात् । नापि विरुद्धता, अविनाभावसंबन्धात् । अत एव न लक्ष्यबुद्ध्या निरस्यमानत्वमिह पुनरहङ्कारस्य लक्षकत्वे त्रितयमपि नास्त्यपुमर्थत्वेनाविवक्षितत्वात्, अनृतादिस्वभावेन विरुद्धत्वात्, लक्ष्यज्ञाना,द्बाध्यत्वाच्च, तत्कथमस्य लक्षकत्वमित्याक्षिपति कथं पुनरिति ॥ अत्रोत्तरमाह लक्षणमिति ॥ यो ऽयं सर्पः सा रज्जुरिति प्रयोगे सर्पः स्वरूपेण विवक्षारहितो ऽध्यस्तत्वादेव परमार्थसंबन्धशून्यो रज्जुबुद्ध्या निरस्यमानो ऽपि स्वाऽधिष्ठानभूताया रज्ज्वाः यद्वदुपलक्षणं भवति प्रतिभासमानसर्पाकाराऽनुवादमन्तरेणाऽनवभासमानरज्ज्वाकारस्याऽऽप्तवाक्यादवगमानुपपत्तेस्तद्वदहङ्कारो विवक्षारहितः* संबन्धशून्यो बाध्यमानो ऽप्यनवभासमानाद्वितीयप्रत्यगात्मनस्तस्मिन्नध्यस्तो लक्षणं भवति अहमिति विपर्यासगृहीतस्य प्रत्यगात्मनस्तदनुवादव्यतिरेकेण वाक्यात्तत्त्वतः प्रतिपादनाऽयोगादित्यर्थः । फलितमाह तथा तद्बाधेनेति ॥ यथा रज्जुप्रतिपत्त्या सर्पो रज्जुरिति वाक्यार्थं सर्पाश्रयात्

* विवक्षारहितः=अवास्तविक इत्यर्थः ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

इयं चाऽवाक्यार्थप्रतिपत्तिरन्वयव्यतिरेकाभिज्ञस्यैव, यस्मात्—

यावद्यावन्निरस्याऽयं
देहादीन्प्रत्यगञ्चति ।
तावत्तावत्तदर्थोऽपि
त्वमर्थं प्रविविक्षति ॥ २८ ॥

कस्मात्पुनः कारणाद्देहाद्यनात्मप्रतिपत्तावेवात्मा

सर्पबाधयैव प्रतिपद्यते एवं सोऽपि प्रत्यगात्मा अहं ब्रह्मेति वाक्यार्थमहंकाराश्रयात् अहंकारबाधयैव प्रतिपद्यते तस्माद् ब्रह्माहंपदयोर्वैयधिकरण्यं नाशङ्कितव्यमिति भावः ॥ २७ ॥

एवं वाक्यादवाक्यार्थप्रतिपत्तिर्भवतीत्युक्तं कथं तर्हि श्रुतवाक्या अपि के चित्तथा न प्रतिपद्यन्त इत्यत आह इयं चेति ॥ आत्मैव सर्वावस्थास्वन्वयी व्यभिचारिणश्च देहेन्द्रियादय इत्यन्वयव्यतिरेकाऽनुसन्धानेन निवृत्तप्रतिबन्धानामेवावाक्यार्थप्रतिपत्तिरितरेषां तदभावान्नोपपद्यते न तु वाक्यस्यासामर्थ्यादित्यर्थः । देहेन्द्रियप्राणमनोबुद्ध्यऽव्याकृतान्यानात्मन आत्मत्वेन गृहीतानन्वयव्यतिरेकाभ्यामुपायाभ्यां मुमुक्षुः स्थूलदेहादारभ्य यथा यथा निरस्यति तथा तथा तत्पदार्थोऽपि त्वंपदार्थाभेदावगत्यनुसारितया प्रवेष्टुमिच्छति विरोधिनः परिच्छेदाभिमानस्य निरस्तत्वादिति श्लोकमवतारयति यस्मादिति ॥ २८ ॥

लोकारोपितसर्पादिनिवृत्तौ तदधिष्ठानस्य रज्ज्वादेः प्रतिपत्तिरेव लोके दृश्यते न तु रज्ज्वादेरर्थान्तरात्मना प्रतिपत्तिस्तत्कथ-

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

तदर्थमात्मत्वेनाऽभिलिङ्क्ते न विपर्यय इति, उच्यते। प्रत्यगात्माऽनवबोधस्याऽनात्मस्वाभाव्यात्तदभिनिर्वृत्तस्याहंबुद्ध्यादिदेहान्तस्तस्मिन्नात्मत्वमविद्याकृतमेवाऽऽत्मत्वमिवाऽनात्मत्वमपि साऽविद्यस्यैव, यतो निरविद्यो विद्वानवाक्यार्थरूप एव केवलोऽवशिष्यते तस्मादुच्यते—

मिह देहादेरात्मभावनिवृत्तौ तदधिष्ठानस्य त्वमर्थस्य तदर्थताप्रतिपत्तिः प्रतिपत्तौ वा ब्रह्मकार्यतया देहादेर्ब्रह्मात्मत्वाद् देहाद्यात्मत्वप्रतिपत्तावेव ब्रह्मत्वप्रतिपत्तिः किं न स्यादित्याक्षिपति कस्मादिति ॥ समाधत्ते उच्यत इत्यादिना ॥ आत्मविद्यायास्तावज्जडस्वभावत्वाद् दृश्यत्वात् ज्ञाननिवर्त्यत्वाच्चानात्मत्वं स्वाभाविकं तत्कार्यत्वाच्च देहादेरप्यनात्मत्वं केवलकूटस्थब्रह्मकार्यत्वानुपपत्तेः। तथा ऽऽत्मनश्चिद्रूपत्वात्कूटस्थत्वात् स्वयंप्रकाशत्वाच्चास्वाभाविकं ब्रह्मत्वं तेन तस्य देहादावात्मत्वप्रतिपत्तिरेव ब्रह्मभावप्रच्युतिः। तन्निवृत्तौ तु स्वाभाविकब्रह्मरूपताविषयौ प्रतिपद्यत इत्यर्थः। तथाप्यनात्मनां स्वरूपेणाऽवस्थितत्वान्नात्यन्तिकानर्थनिवृत्तिः स्यात्, "द्वितीयाद्वै भयं भवती"ति श्रुतेरित्याशङ्क्याह आत्मत्वमिवेति ॥ देहादीनामात्मभाववदनात्मस्वरूपमप्यविद्यावत एव भवति रजतादिवत्तेषां स्वरूपेण संसृष्टरूपेण चात्मन्यध्यस्तत्वात्तस्माद्वाक्यार्थप्रतिपत्तेरविद्यानिवृत्तौ सर्वानर्थनिवृत्तिरित्यर्थः। उभयमप्यविद्याकृतमिति कथमवगम्यते इत्याशङ्क्य विद्योदये पूर्णमेवावशिष्यते इत्युक्तत्वादित्याह यतो निरविद्य इति ॥ उ-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

देहादिव्यवधानत्वा-
त्तदर्थं स्वयमप्यतः ।
पारोक्ष्येणैव जानाति
साक्षात्त्वं तदनात्मनः ॥ २९ ॥

यथोक्तार्थप्रतिपत्तिसौकर्याय दृष्टान्तोपादानम्—

प्रत्यगुद्भूतपित्तस्य
यथा बाह्यार्थपीतता ।
चैतन्यं प्रत्यगात्मीयं
बहिर्वद्दृश्यते तथा ॥ ३० ॥

कोऽर्थं श्लोकमवतारयति तस्मादिति ॥ यस्माद्देहादिलक्षणव्यवधानात्स्वयं स्वात्मभूतमपि तत्पदार्थं ब्रह्म पारोक्ष्येणैव जानाति व्यवहितमनात्मभूतमिव*प्रतिपद्यते अतस्तेषामन्वयव्यतिरेकाभ्यामनात्मत्वावगमात् साक्षात्त्वमपरोक्षात्मरूपत्वं तत्पदार्थस्य भवतीत्यर्थः। अथ वा यत एवमतः स्वात्मभूतमपि तदर्थमशोधितत्वंपदार्थो देहादिव्यवधानात्पारोक्ष्येणैव जानाति देहाद्यनात्मप्रतिपत्तेः साक्षात्त्वमपरोक्षत्वं जानातीत्यर्थः ॥ २९ ॥

ननु कथं स्वात्मनि प्रकाशमाने पारोक्ष्यतया प्रतिभास इति तत्राह प्रत्यगिति ॥ अहमित्यभिमन्यमानशरीरैकदेशे† समुद्भूतपित्तस्य पुरुषस्तद्गतपीतता यथा पीतः शङ्ख इति बाह्यार्थोपरक्ततया बहिरिव भासते एवं प्रत्यगात्मनोऽपि तदर्थस्य बाह्याद्यात्मतायुपरागाद्बहिष्ठवदवभासत इत्यर्थः ॥ ३० ॥

* अविद्यावशादिति भावः ।

† चक्षुरादौ ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

यस्मादेवमतो विशुद्धमवसीयताम्—

पदानुद्धृत्य वाक्येभ्यो
ह्यन्वयव्यतिरेकतः ।
पदार्थांल्लोकतो बुद्ध्वा
वेत्ति वाक्यार्थमञ्जसा* ॥ ३१ ॥

कुतः पुनः सामान्यमात्रवृत्तेः पदस्य वाक्यार्थप्रतिपत्तिहेतुत्वमिति, बाढम्—

सामान्यं हि पदं ब्रूते
विशेषो वाक्यकर्तृकः ।

यत उक्तन्यायेन तत्त्वमस्यादिवाक्यस्याखण्डार्थपर्यवसानमविरुद्धं तस्माद्वाक्यान्निःशङ्कं यथोक्तार्थो निश्चीयतामित्युपसंहरति यस्मादिति ॥ पदानां वाक्येभ्यः समुद्धारो नाम प्रयोगभेदेषु पदानामावापोद्वापाभ्यां तत्तत्पदार्थेषु शक्त्यवधारणं तत्कृत्वा पदार्थांश्चान्वयव्यतिरेकाभ्यां लोकतो वृद्धव्यवहारतश्च पदशक्तिप्रतियोगिनो बुद्ध्वा वाक्यतात्पर्यानुसारेण वाक्यार्थं प्रतिपद्यतइत्यर्थः ॥ ३१ ॥

ननु सामान्यमात्रे गृहीतसंबन्धस्य पदस्य वाक्यार्थबोधकत्वं नोपपद्यते वाक्यार्थविशेषत्वात् । न ह्यन्यत्र गृहीतसंबन्धस्य पदस्यान्यत्र बुद्धिजनकत्वं संभवतीत्याक्षिपति कुतः पुनरिति ॥ पदस्य सामान्यवाचकत्वे ऽपि विशेषस्य वाक्यतात्पर्यविषयत्वं न विरुध्यतइति समाधत्ते बाढमिति ॥ विशेषो वाक्यकर्तृकः,† वाक्यतात्प-

---

* अञ्जसा=वस्तुतः, अनायासेन वा ।

† पदस्य सामान्यबोधकत्वे ऽपि जीवत्वेश्वरत्वोपलक्षितचैतन्ययोर्भेदनिरासाय प्रयुज्यमानं वाक्यमैक्यपरतया विशेषज्ञानोत्पादकं भवतीति भावः ।

DR.RUPAK NATH (DR.RUPAK NATHJI)
www.astrology-tantra.com

श्रुत्यादिप्रतिबद्धं स-
द्विशेषार्थं भवेत्पदम् ॥ ३२ ॥

अन्वयव्यतिरेकपुरःसरं वाक्यमेव सामानाधिकरण्यादिना ऽविद्यापटलप्रध्वंसद्वारेण मुमुक्षुं स्वाराज्ये ऽभिषेचयति न त्वन्वयव्यतिरेकमात्रसाध्यो ऽयमर्थ इत्याह—

बुद्ध्यादीनामनात्मत्वं
लिङ्गादपि च सिध्यति ।
निवृत्तिस्तावता नैती-
त्यतो वाक्यं समाश्रयेत् ॥ ३३ ॥

र्यविषय इत्यर्थः ॥

ननु कथं न विरुध्यते पदसमुदायात्मकं हि वाक्यं पदानि च सामान्यज्ञानविषयाणि ततस्तत्समुदायात्मकं वाक्यमपि सामान्यमात्रविषयं स्यान्न विशेषार्थविषयमित्यत आह श्रुत्यादीति ॥ यद्यपि स्वतः सामान्यमात्रविषयं पदं तथापि श्रुतिलिङ्गवाक्यादिभिर्नियन्त्रितं सद्विचताभिधानसमये ऽन्वये विशिष्टार्थे तात्पर्यतो वर्तते । यथा सर्वान्ब्राह्मणान् भोजयेदित्युक्ते सर्वशब्दो निमन्त्रितब्राह्मणविषयो भवति । अन्यथा विशिष्टव्यवहारासिद्धेरित्यर्थः ॥ ३२ ॥

चतुर्विधान्वयव्यतिरेकाभ्यां शोधितपदार्थस्याखण्डार्थप्रतीतिसिद्धेर्वाक्यमनर्थकमित्याशङ्क्य प्रमाणमन्तरेण युक्तिमात्रादज्ञानस्यानिवृत्तेस्तन्निवृत्तये वाक्यमेव समाश्रयणीयमित्युक्तमर्थं निगमयति अन्वयव्यतिरेकेति ॥ बुद्ध्यादीनामिति ॥ बुद्ध्यादीनामनात्मत्वं युक्तितः सिद्ध्यति न तु तेषां कारणाज्ञाननिवृत्तिद्वारेण निवृत्तिस्ता-

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

न केवलमनुमानमात्रशरणो ऽभिलषितमर्थं न प्राप्नोतीत्यनर्थं* च प्राप्नोतीत्याह—

अनादृत्य श्रुतिं मोहा-
दतो बौद्धास्तमस्विनः ।
आपेदिरे निरात्मत्व-
मनुमानैकचक्षुषः ॥ ३४ ॥

न चानादरे कारणमस्ति यस्मात्सर्वं चैवाऽनादरनिमित्तं प्रमाणस्य प्रमाणान्तरप्रतिपन्नप्रतिपादनं वा

वता सिध्यति तस्या अप्रमाणत्वेनाज्ञाननिवर्तकत्वायोगात् । तस्मात्तन्निवृत्तये प्रमाणभूतं वाक्यमेव समाश्रयणीयमित्यर्थः ॥ ३३ ॥

इतश्च वाक्यमेव समाश्रयणीयमज्ञाननिवृत्तय इत्याह न केवलमिति ॥ ३४ ॥

प्रमाणभूतस्य वाक्यस्य लोके मूलप्रमाणापेक्षादर्शनाद्वेदस्यापौरुषेयतया च तदसंभवात्तत्प्रतिपादिते ऽर्थे ऽस्माकमनादर इति सुगतमतमाशङ्क्यानादरे कारणाभावान्नैवमित्याह न चेति ॥ कुतो ऽनादरे कारणं नास्तीत्याशङ्क्य नद्यास्तीरे फलानि सन्ति "वायुर्वै क्षेपिष्ठा देवते"त्यादिवत्प्रमाणान्तरसिद्धार्थप्रतिपादनस्य वा "अम्बुनि मज्जन्त्यलाबूनि" "ग्रावाणः प्लवन्ते" "आदित्यो यूप"इत्यादिवत्प्रमाणान्तरविरुद्धार्थप्रतिपादनस्य वा स्थाणुर्वा पुरुषो वा को हि तद्वेद यद्यमुष्मिंल्लोके ऽस्ति वा न वेत्यादिवदनवधारितवस्तुप्रतिपादनस्य वा समुद्रघोषभेरीशब्दहुंफट्वौषडित्यादिवदप्रतिपादनस्य वा ऽन्वाभावादित्याह यस्मात्सर्वं चैवेति ॥ कुतस्तेषामन्यतमं नास्तीत्य-

---

* अभिलषितमर्थम्=आत्मसिद्धिरूपम् । अनर्थम्=निरात्मत्वरूपम् ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

विपरीतप्रतिपादनं संशयितप्रतिपादनं वा न वाप्रतिपादनमिति। न चैतेषामन्यतमदपि कारणमस्ति। यत आह—

मानान्तराऽनवष्टब्धं
निर्दुःखात्मानमञ्जसा।
बोधयन्ती श्रुतिः केन
न प्रमाणमितीर्यते ॥ ३५ ॥

न च संशयितव्यमवगमयति यतः—

सर्वसंशयहेतौ हि
निरस्ते कथमात्मनि।
जायेत संशयो वाक्या-
दनुमानेन युष्मदि ॥ ३६ ॥

वगम्यते इत्यत आह यत आहेति ॥ "वायुर्वै क्षेपिष्ठा देवता" "अग्निर्हिमस्य भेषज" मित्यादिवन्मानान्तराधिगतस्याप्रतिपादनान्मानुवादलक्षणमप्रामाण्यमित्यर्थः। मानान्तराधिगतत्वे हेतुः, निर्दुःखीति ॥ अहं दुःखीत्यादिवत्संसारातीतत्वस्य मानान्तराऽनधिगतत्वादेव "आदित्यो यूप" इत्यादिवद्विपरीतप्रतिपादनलक्षणमप्यप्रामाण्यं नाशङ्कनीयमित्याह आत्मानमञ्जसेति ॥ आत्मनः स्वरूपेणाऽबाधितत्वादिति भावः ॥ ३५ ॥

तर्हि संशयिताऽवगमकत्वादप्रामाण्यमित्यत आह न च संशयितव्यमिति ॥ कुत इत्यत आह यत इति ॥ सर्वसंशयानां हेतौ युष्मद्यहङ्कारप्रमुखे ऽनात्मनि चतुर्विधान्वयव्यतिरेकलक्षणानुमानेन

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

यथा 'तत्सत्यं' 'स आत्मा' 'तत्त्वमसी'त्यस्य शेषत्वेना-ऽन्वयव्यतिरेकश्रुतिर्यथा "य एषो ऽक्षिणि पुरुषो दृश्यते" इत्याद्या "अथ यो वेदेदं जिघ्राणी"त्यन्ता, तथा ऽहंब्रह्मास्मीत्यस्य शेषः—

अहमः प्रत्यगात्मा ऽर्थो
निरस्ताशेषयुष्मदः।
ब्रह्मणीति श्रुतिर्न्योय्या
यो ऽयमित्यादिना ऽसकृत् ॥ ४० ॥

प्रमातारं यो वेत्तीति व्यभिचारिणीनां गन्धादिवृत्तीनां तदाश्रयस्य च प्रमातुर्यः साक्षी तमव्यभिचारिणं त्वंपदार्थमन्वयव्यतिरेकाभ्यां विविच्य "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष" इति तत्पदार्थरूपतामस्याचष्ट इत्यर्थः ॥ ३९ ॥

यथा छन्दोगानां तत्त्वमसीति महावाक्यशेषत्वेनाऽवस्थात्रयसाक्षिणो ऽन्वयव्यतिरेकश्रुतिरुदाहृता तथा वाजसनेयिनामपि अहं ब्रह्मास्मीति महावाक्यशेषत्वेन "यो ऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इत्यादिवाक्यं श्रूयते तथा प्रतिवेदान्तमित्यमन्वयव्यतिरेकश्रुतयो द्रष्टव्याः। तेन न शुष्कतर्काणामिहाऽनुप्रवेश इत्यभिप्रेत्याह यथेति ॥ पूर्वश्लोकेना"थ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राण"मित्यन्तस्य तत्त्वमसीति महावाक्यशेषभूतस्यार्थमभिधायाधुना ऽनेन श्लोकेनाहं ब्रह्मास्मीति महावाक्यशेषभूतस्य यो-ऽयं विज्ञानमय इत्यादिवाक्यस्यार्थमाह अहम इति ॥ अहं ब्रह्मास्मी-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

कथं पुनरयमर्थोऽवसीयते अहंव्याजेन आत्मार्थो बुबोधयिषित इति, यतः—

एष आत्मा स्वयं ज्योती
रविसोमाग्निवाक्षु सः।
इतेष्वस्तं दृगेवास्ते
भासयंश्चित्तचेष्टितम्* ॥ ४१ ॥

ति महावाक्यगताहंपदस्य त्विलक्षयिषितवाक्यार्थानुरोधेन निरस्ताशेषयुष्मदो व्यावर्तिताऽशेषाऽनात्मजातस्य प्रत्यगात्मा लक्ष्योऽर्थ इति "योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इति श्रुतिस्तु विधान्वयव्यतिरेकलक्षणन्यायापेता तात्पर्येणाचष्ट इत्यर्थः। यद्वा निरस्ताशेषयुष्मदः शोधिततत्त्वपदार्थस्य† मुमुक्षोरित्यर्थः। अथ वा निरस्ताशेषयुष्मद इति हेतौ पञ्चमी निरस्ताशेषयुष्मत्त्वादित्यर्थः ॥ ४० ॥

कया पुनरुपपत्त्या अहंशब्दो वाच्यार्थं परित्यज्य लक्षणया कूटस्थात्मनि प्रवर्तत इत्युत्तरश्लोकापेक्षामाह कथमिति ॥ वाक्यशेषान्यथानुपपत्त्येत्युत्तरश्लोकमवतारयति यत इति ॥ एष इति ॥ "अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किं ज्योतिरेवाऽयं पुरुष इती"त्युपक्रम्य "आदित्यादिबाह्याभ्यन्तरज्योतिषामुपरमे आत्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योति-

---

* रविसोमाग्निवाक्षु अस्तं गतेषु दृग्रूप आत्मैव चित्तचेष्टितं स्वाप्नसौषुप्तप्रपञ्चं भासयन्, प्रकाशयन्नास्तेऽत्यर्थः।

† निवृत्तानात्मज्ञानात्मबुद्धेरित्यर्थः।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

निर्णेनेक्ति च पृष्टो मुनिः—

आत्मनैवेत्युपक्रम्य
कोयमात्मेत्युदीरिते ।
बुद्धेः परं स्वतो मुक्त-
मात्मानं मुनिरभ्यधात् ॥ ४२ ॥

यस्माच्चात्मा ऽत्राहंव्याजेन प्रत्यङ्मात्रो जिज्ञासयिषितस्तस्मादहंवृत्तिः स्वरूपस्य विलयेनैव वाक्या-

---

र्थास्ते पल्ययते कर्म कुरुते विपल्येतीति" इति च बुद्ध्यादिसाक्षिण कूटस्थत्वेन प्रतिपादितत्वादित्यर्थः ॥ ४१ ॥

आत्मनैवायं ज्योतिषास्त इत्युक्ते आत्मशब्दस्य च कोशपञ्चके साधारणत्वात्कतम आत्मेति जनकेन पृष्टो याज्ञवल्क्यो मुनिर्यो ऽयं विज्ञानमयः प्राणेष्विति देहेन्द्रियाणि व्युदस्य हृदीत्यधिदैवं रूपं व्युदस्य विज्ञानमयशब्देनोपात्तां बुद्धिमन्तरिति व्युदस्य जडविशेषोपादानतया प्राप्तमव्याकृतं ज्योतिरिति व्युदस्य जडविशेषेषु प्रतिबिम्बितं चैतन्यं पूर्णत्वात्त्वमेव इति व्युदस्य तेभ्यः परं प्रत्यगात्मानमहंशब्दार्थं यतो ऽतिशयेन निर्णिज्य दर्शयति ततो ऽप्युक्तार्थो ऽवसीयतामिति श्लोकमवतारयति निर्णेनेक्ति चेत्यादिना ॥ निर्णेनेक्ति अतिशयेन निर्णयतीत्यर्थः* ॥ ४२ ॥

नन्वहंकारस्य लक्षणतया स्वरूपेणावस्थितत्वात्तस्य स्यादद्वितीयत्वाऽसिद्धिरवस्थित्यभावे च लक्षणाऽभावादेव तदसिद्धिरित्याशङ्क्य लक्ष्यस्वरूपावरोधेन लक्ष्यबुद्ध्युत्पादनसमय एवाहंकारस्य तत्रा-

---

* तथा च अहंपदार्थे साक्षिणि सामानाधिकरण्येन विरुद्धयोर्ब्रह्माहंपदार्थयोर्निर्देशो ब्रह्माऽव्यतिरिक्तो विज्ञानमयादिरहमर्थो नास्तीति फलितमिति भावः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

योऽवगमाय कारणत्वं प्रतिपद्यत इतीममर्थमाह—

अहं वृत्त्यैव तद्ब्रह्म
यस्माद्देषोऽवगच्छति ।
तत्स्वरूपलयेनातः
कारणं स्यादहंकृतिः* ॥ ४३ ॥

अतएव च यः प्रतिज्ञातोऽर्थो "नाहंग्राह्यो न तद्धीन"इत्यादि स युक्तिभिरुपपादित इति कृत्वोपसंह्रियते—

गृहीताहंपदार्थश्चे-
त्तस्माज्ज्ञो† न प्रपद्यते ।
प्रत्यक्षादिविरोधश्चे-
त्प्रतीच्युक्तिर्न युष्मदि ॥ ४४ ॥

ऽऽरोपितस्य विलयान्नोक्तदोष इत्युत्तरश्लोकतात्पर्यमाह यस्माद्दे-ति ॥ यस्मादेष मुमुक्षुरहं ब्रह्मास्मीत्यहंकारेणैव ब्रह्म प्रतिपद्यते ततोऽहंकारस्वरूपबाधयैवाहङ्कारो वाक्यार्थप्रतिपत्तिकारणं भवति सर्पो रज्जुविज्ञानवदिति श्लोकयोजना ॥ ४३ ॥

तत्त्वमस्यादिवाक्यार्थे प्रत्यक्षादिविरोधो नास्तीति द्वितीयाध्याये यत्प्रतिज्ञातं तदित्थमुपपादितमिदानीमुपसंह्रियत इत्याह अत एवेति ॥ प्रतिपन्नाहंपदार्थप्रतिपत्तौ किमित्यहं ब्रह्मास्मीति वाक्या-

---

* आत्माभिव्यक्त्यर्थमपेक्षिताऽप्यहंवृत्तिः कृतदाह्यवस्तुदाहा ज्वालेव विलीनस्वरूपा सत्येवात्मप्रतिपत्तिकारणं भवतीत्यर्थः ।

† ज्ञः = विद्वान् ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

पूर्वस्यैव श्लोकार्थस्य विस्पष्टमाह—

प्राङ्च्येव तु सर्वाणि
प्रत्यक्षादीनि नात्मनि ।
प्रतीच्येव प्रवृत्तं त-
त्त्वमसीति वचो ऽञ्जसा ॥ ४५ ॥

तस्मात्प्रमातृप्रमाणप्रमेयेभ्यो हीयमानोपादीयमा-
नेभ्यो ऽन्वयव्यतिरेकाभ्यां मुञ्जेषीकावदशेषबुद्धिवि-

र्थं न प्रतिपद्यतइत्युक्ते पूर्ववाद्याह प्रत्यक्षादीति ॥ उत्तरमाह प्रती-
चीति ॥ तत्त्वमस्याद्युक्तिः प्रतीचि प्रत्यगात्मनि न युष्मदि प्रत्यक्षादि
तु सुखदुःखादिविशिष्टबुद्ध्युपाधिके वर्तते न प्रतीचि ततो भिन्न-
विषयत्वेन प्रत्यक्षाद्यागमयोर्विरोधाभावाच्छोधिताहंपदार्थो ऽहं
ब्रह्मास्मीत्यवाक्यार्थं प्रतिपद्यतएवेत्यर्थः* ॥ ४४ ॥

प्रतीच्युक्तिर्न युष्मदीति श्लोकभागः प्रपञ्च्यतइत्याह पूर्वस्यैवेति ॥
पराञ्चि, पराग्विषयाणीत्यर्थः ॥ ४५ ॥

यस्माच्छोधितपदार्थस्यावाक्यार्थप्रतिपत्तौ न मानान्तरविरोध-
स्तस्मात्तदर्थं ततः प्रतिपत्तिर्घटतएवेत्युपसंहरति तस्मादिति ॥
अवस्थात्रयसंसृष्टस्वभावेभ्यः प्रत्यगात्मानं निष्कृष्य† महावाक्या"दपू-

---

* तत्त्वमस्यादिवाक्यं हि जीवत्वेश्वरत्वोपलक्षितचैतन्यैक्यबोधकम्, अहं सुखीत्यादिप्रत्यक्षादिकं तु कर्त्राद्यात्मविषयतया न शुद्धलक्ष्यार्थविषयमतो नास्ति मानान्तरविरोध इति भावः ।

† जाग्रत्स्वप्नसुषुप्त्याख्यमवस्थात्रयं तत्संसृष्टस्वभावेभ्यो ऽहंकारास्पदेभ्यो देहेन्द्रियादिभ्य आत्मानं निष्कृष्य, विविच्येत्यर्थः ।

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

क्रियासाध्यितया ऽऽत्मानं निष्कृष्य तत्त्वमस्यादिवाक्ये-भ्यो ऽपूर्वादिलक्षणमात्मानं विजानीयात्तदेतदाह—

अहं दुःखी सुखी चेति
येना ऽयं प्रत्ययो ऽध्रुवः ।
अनुगत्यन्त आभाति
स मआत्मेति वाक्यधीः ॥ ४६ ॥

प्रमाणान्तराऽनवष्टब्धं निरस्ताशेष*कार्यकारणात्म-कद्वैतप्रपञ्चं सत्यज्ञानानन्दलक्षणमात्मानं तत्त्वमस्य-हं ब्रह्मास्मीत्यादिवाक्यं संशयितमिथ्याज्ञानाऽज्ञा-नप्रध्वंसमुखेन साक्षादपरोक्षात्करतलन्यस्ताऽऽमल-कवत्प्रतिपादयत्येवेत्यसकृदभिहितम् । तत्र के चि-दाहुस्तत्त्वमस्यादिवाक्यैर्यथाऽवस्थितवस्तुयाथात्म्यव्या-ख्याननिष्ठैर्न यथोक्तोऽर्थः प्रतिपत्तुं शक्यते, अभिधा-

वं मनपरमनन्तर"मित्याद्यतदारोपनिवर्तकवाक्यैः सत्यं ज्ञानमनन्त-मित्यादिस्वरूपविशेषप्रतिपादकवाक्यैश्च प्रमितं ब्रह्म प्रत्यक्त्वेन जानी-यादित्यर्थः । अहं दुःखीति ॥ दुःखित्वादिप्रत्यय आगमापायित्वाद ध्रुवो ऽवगत्यन्तः प्रमित्यन्तो येन साक्षिणा ऽऽभाति स एव सर्वज्ञः परमेश्वरो ममात्मेति वाक्यार्थधीर्भवतीत्यर्थः ॥ ४६ ॥

एतद्विमनुवदति प्रमाणान्तरेति ॥ उत्तरश्लोकद्वयव्यावर्त्यमाश-ङ्कामाह तत्र के चिदिति ॥ ननु किमिति सिद्धवस्त्वनुवादनिष्ठैः प्र-तिपत्तुं न शक्यते इत्यत आह अभिधाश्रुतित्वादिति ॥ विधिपदर-

* मानान्तरानवष्टब्धनिरस्तेत्यादिसमस्तः पाठः क्वाचित्कः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

श्रुतित्वात्तेषां, न हि लोके ऽभिधाश्रुतेः प्रमाणान्तरनिरपेक्षाया नद्यास्तीरे फलानि सन्तीत्यादिवाक्यायाः प्रामाण्यमभ्युपगतम् । अतो नियोगमुखेनैवा*भिधाश्रुतेः प्रामाण्यं युक्तं प्रमाणान्तरनिरपेक्षत्वान्नियोगस्य । अस्य परिहारार्थमशेषप्रत्यक्षादिप्रमेयत्वनिराकरणद्वारेणातीन्द्रियार्थविषयत्वादभिधाश्रुतेः प्रामाण्यं सुप्तपुरुषप्रबोधकवाक्यस्येव वक्तव्यमित्यत आरम्भः—

नित्यावगतिरूपत्वा-
दन्यमानानपेक्षणात् ।

हितवाक्यत्वादित्यर्थः । अस्याप्यनधिगतार्थगन्तृत्वात्प्रामाण्यमस्त्वित्याशङ्क्याह न हि लोक इति ॥ सिद्धार्थविषयवाक्यस्य नद्यास्तीरे फलानि सन्तीत्यादिवत्सापेक्षत्वेनाप्रामाण्यं भवतीति यतस्ततः कार्यपरत्वं वाक्यस्याभ्युपेयं कार्यार्थस्य प्रमाणान्तराऽयोग्यत्वात्प्रमाणान्तरायोग्यविषयस्य च वेदस्य निरपेक्षप्रामाण्यसंभवादित्युपसंहरति अत इति ॥ उत्तरश्लोकयोस्तात्पर्यमाह अस्य परिहारार्थमिति ॥ न हि सिद्धार्थविषयत्वं प्रमाणान्तरसापेक्षत्वे प्रयोजकं लोके गामानयेत्यादिप्रवर्तकवाक्येष्वपि तद्दर्शनात् । ततश्च सिद्धवस्तुनिष्ठं कार्यनिष्ठं वा यद्वाक्यं पौरुषेयं तन्मानान्तरसापेक्षं दृष्टमिति पौरुषेयत्वमेव सापेक्षत्वे प्रयोजकम् । इह पुनर्वेदान्तेषु तदभावान्मानान्तराऽयोग्यविषयत्वाच्च सुतरां मानान्तराऽनपेक्षत्वं सुप्तपुरुषप्रबोधकवाक्यस्येव बोध्यपुरुषमात्रविषयतया तदनवबोधनिवर्तनेन प्रामाण्यं चोपपन्नमिति भावः । उक्ते ऽर्थे श्लोकमवतारयति अयमा-

---

* नियोगमुखेन = कार्यमुखेन ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

शब्दादिगुणहीनत्वा-
त्संश्रयाऽनवतारतः ॥ ४७ ॥
तृष्णानिष्ठीवनैर्नात्मा
प्रत्यक्षाद्यैः प्रमीयते ।
प्रत्यगात्मत्वहेतोश्च
स्वार्थत्वादप्रमेयतः* ॥ ४८ ॥

श्रुतिरपीममर्थं निर्वदति—

दिग्देशकालपरिच्छिन्न-
पराग्रूपादिसंश्रयात् ।

रश्च इति ॥ स्वभावतोऽवगतिस्वरूपस्य मानान्तरापेक्षा दृष्टा । आत्मनः कूटस्थस्यावगतिरूपत्वेन† मानान्तरानपेक्षत्वात्प्रत्यगात्मत्वादेव व्यवधानाभावात्स्वार्थत्वादेवाऽन्योपभोग्यताभावादविषयत्वेन च प्रमेयताऽयोग्यत्वात् श्रोत्रादिप्रवृत्तिविषयशब्दादिगुणरहितत्वादहमस्मि न वेति संदेहरहिताऽऽत्मस्वभावत्वेनानुमानादिप्रवृत्त्ययोग्यत्वाद् ग्राहकप्रवृत्त्युत्तरकालीनदिदृक्षाप्रयुक्तकरणव्यापारजन्यतया तृष्णाकार्यभूतैः प्रत्यक्षादिकैरात्मा न विषयीक्रियतइत्यर्थः ॥ ४७॥ ४८ ॥

प्रत्यक्षाद्यविषयत्वप्रतिपादकश्रुतितात्पर्याभिधायकमुत्तरश्लोकमित्याह श्रुतिरपीति ॥ दृश्यदेशादिपरिच्छिन्नपराग्भूतरूपादिविषय-

---

* तृष्णेति । तृष्णया निष्ठीवनभूतैः तृष्णाकार्यभूतैः प्रत्यक्षादिप्रमाणैः सर्वावभासक आत्मा न प्रमीयते । अत्र हेतुत्रयम् अप्रमेयतः, प्रत्यगात्मत्वात्स्वार्थत्वाच्चेति । व्याख्याकृता ४७–४८ इति श्लोकद्वयं संक्षेपेणैकत्रैव व्याख्यातम् ।

† सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतेः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

विपरीतमतो दृष्ट्वा
स्वतो बुद्धं न पश्यति ॥ ४९ ॥
न्यायसिद्धमतो वक्ति
दृष्टेर्द्रष्टारमात्मनः ।
न पश्येत्प्रत्यगात्मानं
प्रमाणं श्रुतिरादरात् ॥ ५०

अनुमानाऽविषयत्वे ऽन्यदपि कारणमुच्यते—

प्रत्यक्षस्य पराक्त्वान्न
संबन्धग्रहणं यतः ।

त्वात् प्रत्यक्षदृष्टेस्तथा तद्विपरीतमद्रष्टृ समपरिच्छिन्नं प्रत्यग्भूतं रूपादिरहितं स्वप्रकाशमात्मानं न पश्यतीत्यर्थः । यद्वा दिदृक्षिताद् दृश्यात्परिच्छिन्नात्पराग्भूताद्रूपाद्याश्रयाच्चातो घटादेर्विपरीतमात्मानं प्रत्यक्षरूपतया दृष्ट्वा कोऽपि न पश्यतीत्यर्थः* ॥ ४९ ॥

इत्थमर्थमुपवर्ण्य तत्र श्रुतिमवतारयति न्यायसिद्धमिति ॥ यतो रूपादिहीनत्वमतो "न दृष्टेर्द्रष्टारं पश्येः"†इत्यादिका प्रमाणभूता श्रुतिर्दृष्टेर्द्रष्टारमात्मनः स्वस्य च तं प्रत्यग्भूतमात्मानं न पश्येदित्युक्तयुक्तिसिद्धं तात्पर्यतो वक्तीत्यर्थः । यद्वा दृष्टेरात्मनः स्वरूपं द्रष्टारं न पश्येदित्यर्थः ॥ ५० ॥

अनुमानाविषयत्वे निराकृते सत्यर्थापत्त्यादिविषयत्वमपि निराकृतमेव भवतीति मन्यमान आह अनुमानेति ॥ प्रत्यक्षस्येति ॥

---

* स्वप्रकाशस्वभावत्वादेवेति भावः ।

† बृहदारण्यकोपनिषदि ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

आत्मनोऽतोऽनुमित्याऽस्या-
ऽनुभवो न कथं च न ॥ ५१ ॥

एवमयं प्रमातृप्रमाप्रमेयव्यवहारः सर्व एव पराचीनविषय एव न प्रतीचीनमात्मानमवगाहयितुमलम् । एवं च सत्यनेनैव यथोक्तोऽर्थो*ऽनुमातुं शक्यत इत्याह—

प्रमाणव्यवहारोऽयं
सर्व एव पराग्यतः ।
सुविचार्यापयतोऽनेन
युष्मद्येव दिदृक्षते ॥ ५२ ॥

यस्माल्लौकिकप्रत्यक्षादिप्रमाणाऽनधिगम्योऽहं ब्र-

प्रत्यक्षस्याविनाभावलक्षणसंबन्धग्राहकस्य पराक्त्वात्सामान्यविशेषवदनात्मवस्तुगोचरतया तद्रहिताऽऽत्माऽविषयत्वादनुमानादप्यात्मा नानुभूयते नाऽप्यर्थापत्त्यादिभिरित्यर्थः ॥ ५१ ॥

एवमुक्तयुक्तिसिद्धात्मनः प्रमाणान्तरागोचरत्वं निश्चेतव्यमित्युपसंहरति एवमिति ॥ यथोक्तोऽर्थः, आत्मनः प्रमाणान्तराविषयत्वमित्यर्थः । अनेन युष्मद्येवेति ॥ प्रत्यक्षादिना युष्मद्यनात्मन्येव दिदृक्षां करोतीत्यर्थः† ॥ ५२ ॥

अतो वेदान्तानामात्मनि प्रामाण्यमित्येतदपि सिद्धमित्युपसंहरति यस्मादिति ॥ देहादिप्राणपर्यन्तमनात्मजातमन्वयव्यतिरेका-

---

* यथोक्तार्थ इति पाठान्तरम् ।

† प्रत्यक्षादिरनात्मानमेवावगाहते नात्मानमित्यर्थः ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

ह्मास्मीति वाक्यार्थस्तस्मात्—

अन्वयव्यतिरेकाभ्यां
निरस्याऽऽप्राणतो* यतः ।
वीक्षापन्नस्य को ऽस्मीति
सदसीति श्रुतिर्जगौ ॥ ५३ ॥

सो ऽयमन्वयव्यतिरेकन्याय एतावानेव यदवसानो वाक्यार्थस्तदभिन्नस्त्वाहं ब्रह्मास्मीत्याविर्भवति ।

द्रष्टृदृश्यविभागेनागमापायिसाक्षिविभागेन च श्रुत्यभ्युपगमतः† संक्षिप्योच्यते—

दृश्यत्वाद्घटवद्देहो
देहवच्चेन्द्रियाण्यपि ।

भ्यामनात्मतया निरस्य को ऽस्म्यहमित्यात्मस्वरूपजिज्ञासोस्तत्स्वरूपप्रतिपादनाय 'तत्त्वमसि' वाक्यं प्रवृत्तमित्यर्थः ॥ ५३ ॥

अवाक्यार्थज्ञानसाधनपदार्थविवेकहेतुभूतयोरन्वयव्यतिरेकयोः पूर्वाध्यायोदितयोः पुनः संक्षेपतः प्रदर्शनायोत्तरग्रन्थ इति तात्पर्यं वक्ष्यन् प्रथमं तयोरव्यवहितं विषयं निर्दिशति सोऽयमिति ॥ एतावानेव, तावत्पर्यन्त इत्यर्थः । कियत्पर्यन्त इत्यत आह यदवसान इति ॥ अवसीयते निश्चीयते ऽनेनेत्यवसानो यो ऽयमन्वयव्यतिरेकन्यायो ऽवसानो निश्चायको ऽस्य वाक्यार्थस्येति यदवसानो ऽसंभावनाविपरीतभावनानिरासेन वाक्यार्थनिश्चयस्यान्वयव्यतिरेकन्यायाधी-

---

* आप्राणतः=देहप्रभृतिप्राणपर्यन्तानात्मत्वेनाभिमतान् निरस्येत्यन्वयः ।

† श्रुत्यभ्युपगमतः=श्रुत्यनुसारेण ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

मनश्चेन्द्रियवज्ज्ञेयं
मनोवन्निश्चयादिमत् ॥ ५४ ॥

तथा सकलकार्यकारणागमापायविभागसाक्षित्वेनापि—

प्रागसद्याति पश्चात्तत्*
सच्च यायादसत्तथा ।
अनात्माभिजनं तस्मा-
द्विपरीतः स्वयं दृशिः ॥ ५५ ॥

नत्वाद्यदवसानो वाक्यार्थो ऽन्वयव्यतिरेकाभिज्ञस्याहं ब्रह्मास्मीत्याविर्भवति सो ऽवाक्यार्थनिर्णयो ऽन्वयव्यतिरेकानुसंधानपर्यन्त इत्यर्थः। यद्वा यस्य पदार्थस्यावसानो निर्णयः पुष्कलकारणं वाक्यार्थस्येति यदवसानो वाक्यार्थः। तदभिज्ञस्य न्यायतः पदार्थाभिज्ञस्याहं ब्रह्मास्मीत्याविर्भवति स पदार्थनिर्णयो न्यायानुसंधानपर्यन्त इत्यर्थः। इदानीमुत्तरग्रन्थसंदर्भस्य तात्पर्यमाह द्रष्टृदृश्येति ॥ दृश्यत्वाद् घटवदिह इति ॥ घटवद्दृश्यत्वादित्यर्थः। निश्चयादिमदन्तःकरणम् ॥ ५४ ॥

इदानीं द्वितीयमन्वयव्यतिरेकं दर्शयति तथेति ॥ प्रागिति ॥ जनेः प्रागसद्भूत्वा पश्चात्सद्याति, सत्त्वं प्राप्नोति। सच्च भूत्वा प्रध्वस्तमसत्त्वं प्राप्नुयादित्येतदनात्माभिजनमनात्मस्वाभाव्यं तस्माच्ची पुनस्तद्विपरीत आगमापायशून्यः कूटस्थ इत्यर्थः। यद्वा जाग्रदाद्यवस्थात्रये यद्भूत्वा भवति भूत्वा च न भवति तदनात्माभि-

---

* पश्चात्=कार्योत्पत्त्यनन्तरं सत्, व्यवहारयोग्यम्।

DR.RUPAK NATH (DR.RUPNATHJI)
www.astrology-tantra.com

तत्र घटादीनां दृश्यानामनात्मत्वं द्रष्ट्रात्मपूर्वकं प्रत्यक्षेणैव प्रमाणेनोपलभ्याऽनात्मनश्चासाधारणान्धर्मानवधार्य तैर्दृश्यत्वाऽऽगमापायादिभिर्धर्मैः शरीरेन्द्रियमनोनिश्चयादिवृत्तीरनात्मतया व्युदस्याहंवृत्तिमतो ऽपि दृश्यत्वाऽविशेषात् द्रष्टृपूर्वकत्वमनुमीयते । तदेतदाह—

घटादयो यथा लिङ्गं
स्युः परम्परया ऽहमः ।
दृश्यत्वादहमप्येवं
लिङ्गं स्याद् द्रष्टुरात्मनः ॥ ५६ ॥

ननु द्रष्टृदर्शनदृश्यानां कार्यस्वप्नसुषुप्तेष्वागमापा-

जनमनात्मस्थानम्* । तस्माद्विपरीतो ऽवस्थात्रयसाक्षी सदैव भूत्वा आगमापायशून्यः कूटस्थ इत्यर्थः ॥ ५५ ॥

इदानीं द्रष्टृकोटिविनिविष्टतया परैरात्मत्वेनाभिमन्यमानस्याहंकारस्यानात्मत्वं साधयति तत्रेति ॥ असाधारणधर्मा दृश्यत्वागमापायरूपादिमत्त्वादयः । घटादय इति ॥ देहाद्बाह्या घटादयो विषया देहादिविशिष्टस्य द्रष्टुर्लिङ्गं† भवति, एवं देहोपीन्द्रियविशिष्टस्य सो ऽपि मनसस्तदपि बुद्धेः सा ऽप्यहंकारस्य यथा लिङ्गं भवति एवमहंकारोपि दृश्यत्वात्स्वव्यतिरिक्तद्रष्टुर्लिङ्गमित्यर्थः ॥ ५६ ॥

---

* आगमापायीति यावत् ।

† लिङ्गम्=गमकम् ।

DR. RUPNATHJI (DR. RUPAK NATH)

www.astrology-tantra.com

यद्दर्शनायत्तात्मिकौ तेषामागमापायौ स आगमापायरहित आत्मा यथा यन्निबन्धनौ जगतः प्रकाशाप्रकाशौ स प्रकाशाप्रकाशविभागरहितः सूर्य इति । यदा चैवं तदा वाक्याऽवगम्यस्यार्थस्याऽनुदिताऽनस्तमितविज्ञानमात्रस्वभावस्याऽनुमानेनैव प्रतिपन्नत्वात्पुनरपि वाक्यस्य निर्विषयत्वप्रसङ्गः । नैष दोषः । लिङ्गव्यवधानेन* तत्प्रतिपत्तेः । ननु साक्षादपरोक्षादात्मस्वभावेनानात्मनो हानोपादानयोः संबन्धग्रहणात्कमतिशयं वाक्यं कुर्यात् । मैवं वोचः । लिङ्गाधीनत्वात्तत्प्रतिपत्तेः । न हि लिङ्गव्यवधानेनात्मप्रतिपत्तिः साक्षादपरोक्षात्प्रतिपत्तिर्भवति । "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते" इति श्रुतेः । अत आह—

एवमन्वयव्यतिरेकयोरात्मावगतिहेतुत्वे प्रपञ्चिते पुनरपि वाक्यस्य निर्विषयत्वं† प्राप्तमिति सांख्यमतमुत्थापयति ननु द्रष्टृदर्शनदृश्यानामिति ॥ स प्रकाशाप्रकाशविभागरहितः सूर्य इति ॥ प्रतिक्षणं जायमानप्रकाशरहितः सूर्य इत्यर्थः । लिङ्गजनितविज्ञानस्य व्यवहिततया परोक्षतया वस्तुग्राहकत्वादपरोक्षतया ग्रहणाय वाक्यमेवापेक्ष्यत इति समाधत्ते नैष दोष इति ॥ यद्वा सामान्योपाधौ गृहीतव्याप्तिकेन लिङ्गेन व्याप्तिं प्रति संबन्धिभूतसामान्यतिरस्कृतत-

---

* लिङ्गेन व्यवधानेन तत्प्रतीति पाठान्तरम् । व्याप्तिज्ञानादिसापेक्षतया व्यवधानेन तत्प्रतिपत्तेरित्यर्थः ।

† वाक्यस्य=तत्त्वमसीत्यस्य । निर्विषयत्वं=वैयर्थ्यम् ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

लिङ्गमस्तित्वनिष्ठत्वा-
न्न स्याद्वाक्यार्थबोधकम् ।
सद्रूपद्युत्थितात्मा ऽय-
मतो वाक्यात्प्रतीयते ॥ ५७ ॥

या ऽऽत्मनो ग्रहणाद्वतिरस्कृतस्वरूपमात्रग्रहणाय वाक्यमेवापेक्ष्य- तइति समाधत्ते नैष दोष इति॥ ननु द्रष्टृदर्शनदृश्यानां सर्वेषामना- त्मनामागमापाययोः साक्षादपरोक्षस्वभावेनैव साक्षिणा साक्ष्य- साक्षिभावसंबन्धस्य गृहीतत्वात्तयोः साक्षित्वेन साक्ष्यनुमानमपि साक्षादपरोक्षस्वभावेनैव भवेत्तस्मादपरोक्षज्ञानार्थमपि न वाक्या- पेक्षा स्यादिति पुनश्चोदयति ननु साक्षीति ॥ दृष्टान्तदार्ष्टान्ति- कान्वितसाधारणाकारस्यैवानुमानविषयत्वादन्यथा ऽनुमानानुद- यात्ततश्च साधारणाकारतिरस्कृतत्वेनानुमानादात्मप्रतिपत्तिर्न तु निर्विशेषासाधारणाकारेण साक्षात्प्रतिपत्तिस्तस्मादपरोक्षज्ञा- नोत्पत्तये वाक्यापेक्षेति समाधत्ते मैवं वोच इति ॥ नन्वसाधा- रणाकारेण साक्षात्प्रतिपत्तिर्मा भूत्किं तयेत्याशङ्क्यासाधारणाका- रेण साक्षादधिगतिर्मोक्षसाधनमिति श्रूयतइत्याह यमेवैष इति ॥ यमेव केवलं निर्विशेषमेवात्मानमेष साधको वृणुते निरन्तरं त- न्निष्ठतया भजते तेन परमात्मना ऽयमात्मा ऽनेन साधकेन लभ्यः तेनायमात्मा ऽनेन लभ्यः कथम् । तस्यैष आत्मा स्वां तनुं तस्य साधकस्य प्रत्यक्षः प्रत्यगात्मा स्वामसाधारणां समस्तविशेषणनि- र्मुक्ततया निर्विकल्पां तनुं विवृणुते विवृतां करोति स्पष्टमभिव्य- क्षयतीत्यर्थः । यद्वा यमेव साधकमेवैष परमेश्वरो मामयं जा- नात्वित्यनुगृह्णाति तेन साधकेनायं लभ्यः । शेषं पूर्ववत् । उक्ते

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

ननु यदि व्यावृत्तसदसद्विकल्पजालं वस्त्वभीष्टं वाक्याद्भवतस्तथापि तूक्तार्थेते वाक्यविषया दृष्टाः, यस्मादन्तरेणापि वाक्यश्रवणं निरस्ताशेषविकल्पमागोपालाविपालपण्डितं सुषुप्ते वस्तुसिद्धमतो नार्थो वाक्यश्रवणेन । नैतदेवम् । किं कारणम् । सर्वानर्थबीजस्यात्मानवबोधस्य सुषुप्ते संभवात् । यदि हि सुषुप्ते ऽज्ञानं नाभविष्यदन्तरेणापि वेदान्तवाक्यश्रवणमनननिदिध्यासनान्यहं ब्रह्मास्मीत्यभ्यासायात्सर्वप्राणभृतामपि स्वरसत एव सुषुप्तप्रतिपत्तेः सकलसंसारोच्छित्तिप्रसङ्गो* न च कैवल्यात्पुनरुत्थानं न्याय्यमनिर्मोक्ष-

ऽर्थं श्लोकमवतारयति ग्रत आहेति ॥ लिङ्गस्यास्तित्वनिष्ठत्वादस्ति कश्चिदात्मेति धर्मिसद्भावमात्रनिष्ठत्वात्सदसदादिविकल्पशून्यासाधारणस्वभावबोधकं न भवति ततस्तत्प्रतिपत्तिर्वाक्यादेवेत्यर्थः ॥ ५७ ॥

ननु गोपाद्याविपालपण्डितपर्यन्तानां प्राणिनामशेषविकल्पहीनवस्तुनः सुषुप्ते वाक्यमन्तरेण सिद्धत्वात्पुनर्वाक्यवैयर्थ्यमापतितमिति शङ्कते नन्वित्यादिना ॥ कार्योपाधिभेदस्य विलीनत्वे ऽपि सर्वानर्थहेत्वज्ञानस्य सुषुप्ते ऽपि विद्यमानत्वान्न वाक्याधिगम्यं निर्विकल्पकं वस्तु तत्र सिद्धमिति परिहरति नैतदिति ॥ अज्ञानसद्भावमेव विपक्षे बाधककथनेन साधयति यदि हीति ॥ नन्वस्तु

* कैवल्यप्रसङ्ग इत्यर्थः ।

† असत्त्वापादकावरणमात्रनिवर्तकत्वादिति यावत् ।

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

प्रसङ्गात् । न चान्य एव सुषुप्तो ऽन्य एवोत्थित इति शक्यं वक्तुम् । नाद्राक्षमहं सुषुप्ते ऽन्यत्किञ्चिदपीत्युत्थितस्य प्रत्यभिज्ञादर्शनात्* । तस्मादवश्यं सुषुप्ते ऽज्ञानमभ्युपगन्तव्यम् । ननु यदि तत्राज्ञानमभविष्यद्रागद्वेषघटाज्ञानादिवत्प्रत्यक्षमभविष्यत् । यथेह लोके घटं न जानामीत्यज्ञानमव्यवहितं प्रत्यक्षम् । अत्रोच्यते । न । अभिव्यञ्जकाभावात् । कथमभिव्यञ्जकाभाव इति चेच्छृणु—

बाह्यां वृत्तिमनुत्पाद्य
व्यक्तिः स्यान्नाऽहमो यथा ।
नर्ते ऽन्तःकरणं तद्वद्
ध्वान्तस्य व्यक्तिराञ्जसी† ॥ ५८ ॥

सुषुप्तौ समूलसंसारोच्छेद इत्याशङ्क्य मैवं पुनरुत्थानदर्शनादित्याह न च कैवल्यादिति ॥ ननु सुषुप्तौ मुक्त एव पुनरुत्थानं चान्यस्यैवेत्याशङ्क्य सुषुप्तोत्थितयोः प्रत्यभिज्ञयैकत्वावगमान्नैवमित्याह न चान्य इति ॥ ननु सुषुप्त्यवस्थायां साक्षिवेद्यं चेदज्ञानमभ्युपगम्यते तर्हि तत्काले ऽपि अहम् अज्ञानमिति विशेषाकारेण व्यवहार्यं स्यात् । रागद्वेषघटाज्ञानानां साक्षिवेद्यानां जाग्रत्यपरोक्षत्वेन व्यवहारयोग्यत्वदर्शनादित्याशङ्कते ननु यदीति ॥ निर्विकल्पकानुभवसिद्धस्याज्ञानस्य स्फुटाभिव्यञ्जकोपाधेरन्तःकरणस्याभावान्न स्फुटप्रतिपत्तिर्यथा

---

* न हि तावदन्यस्यानुभवो ऽन्यस्य प्रत्यभिज्ञेति युक्तमिति भावः ।

† ध्वान्तस्य = सुषुप्तिकालिकाज्ञानस्य । आञ्जसी = प्रत्यक्षादिव्यवहारहेतुरित्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

कश्चिदतिक्रान्तं विस्मृत्य* "इदन्त्वादहमप्येवं लिङ्गं स्याद् द्रष्टुरात्मन" इति निर्युक्तिकमभिहितमित्याह। किं कारणमहं तज्ज्ञात्रोर्विवेकाऽप्रसिद्धेः। यथेह घटदेवदत्तयोर्ग्राह्यग्राहकत्वेन स्फुटतरो विभागः प्रसिद्धो लोकेन तथेहाहङ्कारतज्ज्ञात्रोर्विभागोऽस्तीति। तस्मादसाध्वेतदभिहितमिति। अत्रोच्यते—

दाह्यदाहकतैकत्र
यथा स्याद्वह्निदारुणोः।
ज्ञेयज्ञातृकतैवं स्या-
दहंज्ञात्रोः परस्परम्॥ ५८॥

अहङ्कारस्य निर्विकल्पकानुभवसिद्धस्य बाह्यघटादिविषयबुद्धिवृत्त्यनुदये स्फुटप्रतिपत्तिर्न संभवति तद्वदिति श्लोकमवतारयन्परिहरति अत्रोच्यत इत्यादिना ॥ ५८॥

उत्तरस्य श्लोकस्य नातीतानन्तरश्लोकेन संबन्धः किं तु "इदन्त्वादहमप्येव"मित्यनेनैव संबन्धं कथयंस्तद्व्यावर्त्यामाशङ्कामाह कश्चिदतिक्रान्तमिति॥ अहं पश्यामीत्यहम एव दृश्यस्य द्रष्टृत्वानुभवादहंद्रष्ट्रोर्विभागो नास्ति, तस्मादहमो घटवद् दृश्यत्वेनैव स्वव्यतिरिक्तद्रष्ट्रनुमापकत्वमनुपपन्नमित्यर्थः। यद्यप्यहं पश्यामीत्यत्र ग्राह्यत्वं ग्राहकत्वं चैकाश्रयं प्रतीयते तथाऽप्यन्यत्रानयोर्विभिन्नाधिकरणदर्शनात् चिद्धातोरहंकारव्यतिरेकेण सुषुप्त्यादौ द्रष्टृत्वदर्शनादहंकारस्य च सुखदुःखादिवेद्यधर्मविशिष्टस्य घटा-

* प्रतिस्मृत्येति पाठान्तरम्।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

एवं तावदविद्योत्थस्या*न्तःकरणस्य बाह्यविषयनिमित्तरूपावच्छेदा या ऽहंवृत्तिर्व्याप्रियते तया ऽवच्छिन्नं सत्कूटस्थप्रत्यगात्मोपादानावबोधरूपस्याव्यवधानतया विषयभावं† प्रतिपद्यत इति तत्र तयोर्ग्राहकत्वादु-

---

दिवत् द्रष्टृत्वानुपपत्तेर्ग्राह्यत्वमेव न ग्राहकत्वं, ग्राहकत्वं ह्यहंकारात्मनोरैक्याध्यासादात्मगतमेव विशिष्टगतत्वेन‡ प्रतीयते । यथा केवलवह्निगतमेव दग्धृत्वं वह्निविशिष्टदाह्यकाष्ठगतत्वेन प्रतीयते तस्माद् ग्राहकानुमापकत्वमुपपद्यत इति परिहरति अत्रोच्यते द्राह्येति ॥ ५८ ॥

ननु यदि घटादिवदहंकारो ऽपि साक्षिचैतन्यविषयस्तर्हि विषयत्वाविशेषाद् घटादाविवाहंकारे ऽपि मम पश्यामीति ममबुद्धिः किं न स्यादहं पश्यामीत्येव कुतः प्रतीतिः, तथा घटादावप्यहमिति बुद्धिः किं न स्यान्ममेति बुद्धिरेव कुत इत्याशङ्क्य तदुपपादयन्नुत्तरश्लोकमवतारयितुं तदुपयोगिनमर्थं तावदनुवदति एवमिति ॥ बाह्याः शब्दादयो विषयास्तन्निमित्तं रूपमन्तःकरणस्य तदाकारपरिणामस्तेन तस्यावच्छेदाय जानामीति तद्विशेषितत्वाया ऽहंवृत्तिरहमित्याकारा जायते । अन्यथा स्वपरवेद्ययोर्विशेषाभावप्रसङ्गादित्यर्थः । तथाप्यन्तःकरणस्य कथं प्रतीतिरित्यत आह तया ऽवच्छिन्नमिति ॥ कूटस्थो यः प्रत्यगात्मा तदुपादानस्तज्जन्यो यो बोधरूपो ऽहंवृत्त्यवच्छिन्नान्तःकरणप्रतिबिम्बितश्चिदाभासस्तदधीनत्वात्तस्य

---

* अविद्योत्थस्येत्यस्य = साभासाविद्याकार्यस्य ।

† विषयभावम् = भास्यताम् ।

‡ विशिष्टगतत्वेन = अहंकारविशिष्टात्मगतत्वेन ।

www.astrology-tantra.com

पयोरवभासकावभास्यत्वसंबन्धव्यतिरेकेण नान्यत्संबन्धान्तरमुपपद्यते । अहंतारूपं त्वात्मसात्कृत्वाहंकञ्चुकं परिधायोपकार्यत्वोपकारकत्वलक्षणः सन् बाह्यविषयेणोपकारिणा ऽपकारिणा वा ऽऽत्मीयं संबन्धं प्रतिपद्यते, तदभिधीयत इति—

इदंज्ञानं भवेज्ज्ञातु-
र्ममज्ञानं तथा ऽहमः ।

जन्यत्वं तस्येन्द्रियव्यवधानमन्तरेणाहंत्वव्यवच्छिन्नमन्तःकरणं विषयत्वं प्रतिपद्यत इत्यर्थः । तथापि घटादिपदार्थात्मीयतया किमिति नाऽवभासत इत्याशङ्क्योपकार्योपकारकत्वलक्षणसंबन्धान्तराभावादित्याह तत्र तयोरिति ॥ घटादीनामात्मीयत्वेनावभासस्तर्हि कथमित्याशङ्क्य संबन्धान्तरसंभवादित्याह अहंतारूपमिति ॥ अहंकारात्मकमन्तःकरणमात्मसात्कृत्वा ऽहंपरिच्छेदं चात्मन्यध्यस्य व्यवस्थितः प्रत्यगात्मा तत एव हेतोर्घटाद्युपकारापकारविषयत्वयोग्यो भवति, तत एव घटादिविषयैरात्मीयत्वेन संबन्धं प्रतिपद्यते तत एव स्वस्वामित्वलक्षणसंबन्धान्तरस्य विद्यमानत्वाद् घटादीनां ममेति बुद्धिविषयत्वमित्यर्थः । उपपादिते ऽर्थे श्लोकमवतारयति तदभिधीयत इति ॥ ज्ञातुः साक्षिण इदमिति ज्ञानं साक्षात्स्वावभास्ये ऽन्तःकरणे ऽहंत्वव्यवच्छिन्ने स्यात्तस्यैव चाहमो ऽहंकारतादात्म्यस्याहंकञ्चुकस्य* ममेति ज्ञानं घटादिषूपकार्योपकारकभावलक्षणसंबन्धाद्भवतीत्यर्थः । कुतो ऽयं विभाग इत्यत आह

---

* अहंकञ्चुकस्य = अहङ्काराध्यासविशिष्टस्य ।

अज्ञानोपाधिनेदं स्या*-
द्विक्रिया ऽतो ऽहमो मम ॥ ६० ॥

एकस्यैव ज्ञातुरन्तर्बाह्यनिमित्तभेदाद्विभिन्ने ऽपि विषये इदं ममेति ज्ञानवैरूप्यं जायतइत्युक्तम् । स्वप्नोपक्रियमाणस्यैव ज्ञातुर्विषये ममप्रत्ययो भवति विपर्यये चेदंप्रत्यय इति कथमवगम्यते । अवगम्यताम‌न्वयव्यतिरेकाभ्यां तत्कथमित्याह-

अज्ञानेति ॥ अज्ञानमुपाधिर्यस्येत्यज्ञानोपाधिश्चैतन्याभासस्तेनेदमिति प्रत्ययः स्यात्ततः परं बाह्योपकारादिसंबन्धवशादहमो ममेति विक्रिया ज्ञानपरिणामः स्यादित्यर्थः । यद्वा ऽहंकारापन्नस्य ज्ञातुर्घटादौ विषये इदमिति ममेति च ज्ञानद्वयमुत्पद्यते तत्रेदमिति ज्ञानमज्ञानमात्रोपाधिकं ममेति ज्ञानमहमो विक्रियतः स्यादुपकारकमपकारकमित्यहंकारविक्रियोपाधिकमित्यर्थः ॥ ६० ॥

उक्तविभागे प्रमाणद्योतनायोत्तरश्लोक इति वृत्तं कीर्तयन्नाह एकस्यैवेति ॥ अन्तर्बाह्यनिमित्तभेदादन्तर्निमित्तं चैतन्याभासः, बाह्यनिमित्तमुपकारादिविषयज्ञानपरिणाम,स्तद्भेदाद्विभिन्ने ऽपि विषये ऽन्तःकरणे घटादौ चेदमिति ममेति च ज्ञानद्वयं जायतइत्युक्तमित्यर्थः । यद्वा एकस्मिन्नेव घटादौ विषये ज्ञातुरेकस्यैवाज्ञानमात्रोपाधिवशादीदमिति ज्ञानमुपकारकमपकारकमित्यहंकारविक्रियावशान्ममेदमिति च ज्ञानद्वयं जायतइत्युक्तमित्यर्थः । अन्वेति ॥ अहङ्कारोपाधिकस्य घटादिविषये स्वस्वामित्वलक्षणसंब-

* अज्ञानोपाधिनैवं स्यादिति पाठान्तरम् ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अनुपक्रियमाणत्वा-
न्न ज्ञातुः स्यादहं मम ।
घटादिवदिदं तु स्या-
न्मोहमात्रव्यपाश्रयात्* ॥ ६१ ॥

मोहतत्कार्याश्रयत्वात् ज्ञातृत्वविशिष्टयोः पूर्वत्रे†-दंममज्ञानान्वयः प्रदर्शितः । अधाधुना तद्व्यतिरेकेण

त्वात्मनप्रत्ययो भवति, अज्ञानमात्रोपाधिकस्यान्तःकरणे इदं-प्रत्ययो भवतीति कथमवगम्यते इत्यर्थः । अथ योपकारापकारविष-यभावं प्रतिपन्नस्य विशिष्टस्य ज्ञातुरुपकारापकारसाधनत्ववि-शिष्टे ममप्रत्ययो भवति केवलस्य ज्ञातुः केवले घटादाविदंप्रत्यय इति कुतो ऽवगम्यते इत्यर्थः । अनुपक्रियमाणत्वादिति ॥ ज्ञातुः साक्षिणो ऽहंकारेणानुपक्रियमाणत्वादनपक्रियमाणत्वाच्चाहमहं-कारो घटादिवन्मम न भवति ममप्रत्ययविषयो न भवति मोह-मात्रमेव व्यपाश्रयो यस्य चिदाभासस्य तद्वत्त्वादिदं तु स्या,दिद-मित्यवभास्यत्वमात्रमेव स्यादित्यर्थः । उपकारकत्वादिशून्ये ह्यहं-कारे तत्साक्षिण इदमित्येव प्रत्ययस्य दर्शनात्तादृशे घटादौ इदमित्ये-व प्रत्ययः स्यादुपकारकत्वादिधर्मसहिते ममप्रत्ययः स्यादिति द्रष्ट-व्यम् ॥ ६१ ॥

अज्ञानतत्कार्यव्यतिरेके इदं ममेति च ज्ञानद्वयव्यतिरेकं प्रदर्श-यितुमुक्तश्लोक इति वक्ष्यन्प्रदर्शितमन्वयमनुवदति मोहेति ॥ य-स्मादज्ञानोपाधिकमात्मनो ऽहंकारसाक्षित्वं यस्माच्च तत्कार्यप-

---

* मम=ममप्रत्ययः । इदम्=इदंप्रत्ययः ।
† पूर्वत्र=उक्तश्लोकद्वये ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

व्यतिरेकप्रदर्शनार्थमाह—

विक्रियाऽज्ञानशून्यत्वा-
न्नेदं न च ममात्मनः ।
उत्थितस्य सतोऽज्ञानं
नाहमज्ञासिषं यतः* ॥ ६२ ॥

आत्मानात्मविवेकस्यैयत्ताप्रदर्शनार्थमाह—

वाक्यप्रत्यक्षमानाभ्या-
मियानर्थः प्रतीयते ।

रिणाम्यन्तःकरणसंबन्धोपाधिकमात्मनः परिणामाश्रयत्वं तस्मादज्ञानतत्कार्योपाधिद्वारेणात्मनो ऽहंकारे घटादौ चेदं ममेति च ज्ञानद्वयं भवतीत्यर्थः । विक्रियेति ॥ सुषुप्तौ शब्दाद्याकारपरिणामलक्षणविक्रियाभावादज्ञानाभावाच्चेदंज्ञानं ममज्ञानं च न दृश्यत इत्यर्थः । ननु कथं ज्ञानशून्यत्वं सुषुप्ते ऽप्यज्ञानस्य साधितत्वादित्याशङ्क्य तत्राज्ञो ऽहमिति स्फुटतरव्यवहाराभावात्तथोच्यत इत्याह उत्थितस्येति ॥ उत्थितस्यैव सतो नाहमज्ञासिषमिति अज्ञानं संभवतीति यत इत्याकाङ्क्षितपदपूरणेन योजना ॥ ६२ ॥

आत्मानात्मविविक्तस्यैयत्ता नाम सर्वानात्मविविक्तसाक्षिस्वरूपावगतिपर्यन्तता तत्प्रदर्शनायोत्तरश्लोक इति संबन्धमाह आत्मानात्मेति ॥ वाक्येति ॥ वाक्यं त्वंपदार्थशोधकं कतम आत्मा को ऽयमात्मेत्यादिकम्, प्रत्यक्षमन्वयव्यतिरेकजन्यमात्मानात्मविवेकानुभवनम् । ताभ्यां प्रमाणाभ्यामियानर्थः सकलानात्मविविक्तः

* नाहमज्ञासिषमिति स्मरणादज्ञानप्रतीतिरित्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अनर्थकृ*त्तमोहानि-
र्वाक्यादेव सदाऽऽत्मनः ॥ ६२ ॥

द्वितीयाध्यायादौ श्रोतृचतुष्टयमुपन्यस्तं, तत्र कृत्स्नानात्मनिवृत्तौ सत्यां यः प्रत्यगात्मन्येव वाक्यार्थतां प्रतिपद्यते स क्षपिताशेषान्तरायहेतुरिति न तं प्रति वक्तव्यं किंचिदप्यवशिष्यते। योऽपि वाक्यश्रवणमात्रादेव प्रतिपद्यते† तस्याप्यतीन्द्रियशक्तिमत्त्वान्न किंचिदप्यपेक्षितव्यमस्ति, यस्तु श्रावितत्त्वमस्यादिवाक्यः स्वयमेवाऽन्वयव्यतिरेकौ कृत्वा तदवसान एव वाक्यार्थं प्रतिपद्यते‡ ऽसावपि यथार्थं प्रतिपन्न इति पूर्वव-

कूटस्थः प्रत्यगात्मा प्रतीयतेऽनुभूयत इत्यर्थः। तर्हि तत्त्वमस्यादिवाक्यमनर्थकं प्राप्तमित्याशङ्क्य मैवं तस्यैव मूलाऽज्ञाननिवर्तकत्वादित्याह अनर्थकृदिति ॥ ६२ ॥

ननु यदि तत्त्वमस्यादिवाक्यं तमोनिवर्तकं तर्हि सकृच्छ्रुतमेव प्रत्यक्षवत्स्वकार्यं कुर्यादित्याशङ्क्य क्षपिताशेषप्रतिबन्धेऽधिकारिविशेषे तथैवास्त्वित्यभ्यनुज्ञायाऽक्षपितप्रतिबन्धेऽधिकारिविशेषे प्रतिबन्धक्षयापेक्षान्वयव्यतिरेकसहकृतं पुनः पुनराम्नाव्यमाणं स्वकार्यं कुर्यादिति दृष्टान्तेन प्रतिपादयन्नुत्तरश्लोकसंदर्भस्य तात्पर्यमाह द्वितीयाध्यायेति ॥

* अनर्थान् कृन्तति निवर्तयतीत्यर्थः। वाक्यमेव निखिलानर्थहेतुभूताज्ञाननिवर्तकमिति भावः।

† विराड्वत्।

‡ पिशाचकवत्।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

देवोपेक्षितव्यः। यः पुनरन्वयव्यतिरेकौ कारयित्वाऽपि पुनः पुनर्वाक्यं श्राव्यते* यथाभूतार्थप्रतिपत्तये तस्य कृतान्वयव्यतिरेकस्य सतः कथं वाक्यं श्राव्यत इत्युच्यते—

नवसंख्याहृतज्ञानो
दशमो विभ्रमाद्यथा।
न वेत्ति दशमोऽस्मीति
वीक्षमाणोऽपि तान् नव॥ ६४॥

अथ दृष्टान्तगतमर्थं दार्ष्टान्तिकार्थे समर्पयिष्यन्नाह—

अपविद्धद्वयोऽप्येवं†
तद्वदस्मादिना विना।

तत्र दृष्टान्तं तावद्दर्शयति नवसंख्येति॥ यथा दशसंख्याकाः पुरुषाः समुद्दिष्टसमिदाहरणादिप्रयोजनाः संभूय ग्रामादरण्यं गतास्ततस्ततः परिक्रम्य निर्वर्तितसमिदाहरणादिप्रयोजनाः प्रत्यागत्यैकत्र मिलिताः सन्तः सर्वे वयं समागता न वेति विमृश्य परिगणनाय प्रवृत्ताः कश्चित्स्वातिरिक्तान्नव पुरुषान् वीक्षमाणोऽपि तद्गतनवसंख्ययैवापहृतज्ञानो दशमोऽसीत्याप्तवाक्यश्रवणं विना स्वात्मानं दशमोऽस्मीति विभ्रमाद्यथा न वेत्तीत्यर्थः॥ ६४॥

अपविद्धेति॥ एवमपि संसारित्वेनाभिमतः प्रत्यगात्मा साक्षा-

---

* श्वेतकेतुरिव।

† अपविद्धद्वयोऽपि—निरस्तनिखिलद्वैतभ्रमोऽपि।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

वेत्ति नैकत्वमात्मानं
नान्वेष्यं चात्र कारणम्* ॥ ६५ ॥

नान्वेष्यं चात्र कारणमित्युक्तं तत्कस्मादिति चोदिते प्रत्याह, अन्वेषणाऽसहिष्णुत्वात्तत्कारणमित्याह—

सेयं भ्रान्तिर्निरालम्बा
सर्वन्यायविरोधिनी ।
सहते न विचारं सा
तमो यद्वद्दिवाकरम् ॥ ६६ ॥

त्परमात्मस्वभावो ऽपि सन्नज्ञानाऽपहृतस्वभावत्वात्त्वमस्यादिवाक्यमन्तरेणाऽहमस्मि परं ब्रह्मेति न प्रतिपद्यतइत्यर्थः । ननु स्वयंप्रकाशाऽद्वयाऽऽत्मनि कथमज्ञानमुपपद्यतइत्याशङ्क्य दुर्निरूपत्वेन प्रतिभासमात्रशरीरत्वाद्धेतुर्नान्वेषणीय इत्याह नान्वेष्यं चात्र कारणमिति ॥ ६५ ॥

सेयमिति ॥ येयमात्मनः स्वरूपाऽप्रतिपत्तिर्विपरीतकर्तृत्वादिप्रतिपत्तिश्च सेयं भ्रान्तिर्लोकसिद्धपदार्थवत् क्लृप्तकारणशून्या अत एव निरालम्बा निरालम्बनशून्या सर्वन्यायविरोधिनी च लोकप्रसिद्धपदार्थानां स्वसत्तायां† स्थितौ प्रतीतौ‡ च ये न्यायास्तेषां विरोधिनी, अत एव विचारन्यायाघातं न सहते यथा तमः स्वनिवर्तकप्रकाशं न सहते तद्वदित्यर्थः ॥ ६६ ॥

---

* दृश्यमाननिखिलप्रपञ्चव्यवहारान्यथाऽनुपपत्त्या कल्प्यमानमज्ञानं विनैव कारणमाविर्भावतिरोभावशालीत्यर्थः ।

† सत्तायाम्=उत्पत्तौ ।

‡ प्रतीतौ=ज्ञप्तौ ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

तस्याः खल्वस्या अविद्याया भ्रान्तेः सम्यग्ज्ञानोत्पत्तिद्वारेण निवृत्तिः—

बुभुत्सोच्छेदिनी चास्य
सदसीत्यादिना दृढम्* ।
प्रतीचि प्रतिपत्तिः स्या-
न्नासौ मानान्तराद्भवेत् ॥ ६७ ॥

कथं पुनर्वाक्यं प्रतिपादयत्येवेति चेद्दृष्टान्तोक्तिः—

जिज्ञासोर्दशमं यद्व-
न्नवातिक्रम्य ताम्यतः† ।
त्वमेव दशमोऽसीति
कुर्यादेवं प्रमां वचः ॥ ६८ ॥

तर्हि सकार्याज्ञानस्य प्रमाणज्ञाननिवर्त्यत्वात्प्रत्यक्षादिमानान्तरादपि निवृत्तिसंभवात्पुनरपि वाक्यानुपयोग इत्यत आह तस्याः खल्वित्यादिना ॥ सर्वसंसारविभ्रमाधिष्ठानस्य प्रत्यगात्मनो मानान्तरायोग्यत्वात्तत्प्रतिपादकवाक्यजन्यमेव ज्ञानं तन्निवर्तकमित्यर्थः ॥ ६७ ॥

ननु प्रमाणान्तरादशक्यामधिगतिं वाक्यं कथं कर्तुं शक्नुयादित्याक्षिप्य दृष्टान्तप्रदर्शनेन समाधत्ते कथमित्यादिना ॥ नवातिरेकेण दशमं जिज्ञासोस्तावत्ताम्यतः क्लिश्यतस्त्वमेव दशमोऽसीति वचो यथा प्रमां कुर्यादेवं तत्त्वमस्यादिमहावाक्यमपि ब्रह्मजिज्ञासोः प्रमां कु-

---

* दृढम्=सकलाज्ञानोच्छेदसमर्था प्रतिपत्तिः स्यादित्यर्थः ।

† तत्र प्रमाणाऽलाभात् इत्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

सा च तत्त्वमस्यादिवाक्यश्रवणजा प्रमोत्पन्नत्वादेव न-च नैवमिति प्रत्ययान्तरं जायते तदेतद्दृष्टान्तेन प्रति-पादयति —

दशमो ऽस्मीति वाक्योत्था
न धीरस्य विहन्यते ।
आदिमध्यावसानेषु
न नवत्वस्य संशयः ॥ ६९ ॥

एवं तत्त्वमसीत्यस्माद्
द्वैतनुत्*प्रत्यगात्मनि ।
सम्यग्ज्ञातत्वमर्थस्य
जायेतैव प्रमा दृढा ॥ ७० ॥

र्थादित्यर्थः ॥ ६८ ॥

ननु दशमस्त्वमसीति वाक्यादुत्पन्ना धीः प्रमाणान्तरबाधाभावात्प्रमाणं भवतु तत्त्वमस्यादिवाक्यजन्या तु द्वैतप्रत्ययैः पूर्वोत्पन्नैरुत्तरकालीनैर्वा बाधात् प्रमा न भविष्यतीत्याशङ्क्य समस्तद्वैतप्रत्ययबाधेनैवोत्पन्नत्वान्न पूर्वकालीनैर्बाध्यते उत्तरकाले तु तद्विरुद्धप्रत्ययान्तरमेव नोत्पद्यतइत्येतद् दृष्टान्तेन प्रतिपादयति सा चेति ॥ दशमो ऽस्मीति ॥ दशमज्ञानोत्पत्तेः पूर्वं तत्समकालमुत्तरकालं वा नवसु बालेषु परिगणयतः संशयाभावाद्दशमो ऽसीति वाक्याद्दृढप्रतीतिरुपजायतइत्यर्थः ॥ ६९ ॥

दार्ष्टान्तिकमाह एवमिति ॥ सर्वस्य कस्मान्न जायतइत्याशङ्क्य

---

* द्वैतनुत्=अज्ञानजन्यभेदभ्रमस्य वाक्यजन्यप्रमया ऽज्ञाननाशे नाशादिति भावः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

प्रत्यगात्मनि प्रमोपजायतइत्युक्तं, तत्र चोद्यते किं यथा घटादिप्रमेयविषया प्रमा कर्त्रादिकारकभेदाऽनपन्हवेन जायते तथैव उताशेषकारकग्रामोपमर्देन कर्त्तुः प्रत्यगात्मनीत्युच्यते—

प्रत्यक्ता* ऽस्य स्वतो रूपं
निष्क्रिया कारकाफलम्।
अद्वितीयं तदिद्वा धीः†
प्रत्यगात्मेव लक्ष्यते ॥ ७१ ॥

पदार्थपरिशोधनाभावादित्याह सम्यग्ज्ञातत्वमर्थस्येति ॥ सम्यग्ज्ञातत्वमर्थस्य शोधितत्वंपदार्थस्येति यावत् ॥ ७० ॥

ननु सा किमद्वैतप्रमा कर्त्रादिकारकानुपमर्देन जायते किं वा तदुपमर्देन। प्रथमे नाद्वैतसिद्धिः कर्त्रादिद्वैतावस्थानात्। द्वितीये त्वद्वितीयत्वप्रमानुदय इति शङ्कते प्रत्यगात्मनि प्रमोपजायतइत्युक्तमिति ॥ अप्रमेयस्य प्रत्यगात्मनः समस्तक्रियाकारकफलशून्याद्वितीयस्वरूपत्वात्तत्प्रमापि तदनुरूपा समस्तप्रमात्रादिप्रपञ्चोपमर्देनोपजायतइति मत्वा सर्वान्तरं निष्क्रियमकारकमफलमद्वयमात्मनः स्वाभाविकं रूपम्, इतरं त्वविद्याध्यारोपितमिति श्लोकेन दर्शयति उच्यतइति ॥ विद्योत्पत्तेः प्राक् प्रमात्रादि संभवति उत्पन्नविद्यस्याविद्यानिवृत्तौ प्रमात्राद्यसंभवान्नाद्वैतविरोधः। नाप्यद्वैतप्रमानुदयस्तदुत्पत्तेः प्रागारोपितरूपेण प्रमात्रादीनां संभवादिति भावः। ननु कथं प्रत्यगात्मनः क्रियाकारकादिशून्यस्वरूपत्वं तस्य

* प्रत्यक्ता=चैतन्यम्।
† धीः=अन्तःकरणवृत्तिः।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

यस्मादेवम्*—

विपश्चितोऽप्यतस्तस्या-
मात्मभावं वितन्वते ।
दवीयस्स्विन्द्रियार्थेषु
चीयते ह्युत्तरोत्तरम् ॥ ७२ ॥

आह यदि वाक्यमेव यथाभूतार्थावबोधकं कथं कस्य हेतोरविद्योत्थापितस्य कर्तृत्वादेरुपदेश इत्युक्ते प्रतिविधीयते—

कर्तृत्वेन भोक्तृत्वेन च प्रतीयमानत्वादित्याशङ्क्य तत्प्रतीतेरन्तःकरणोपाधिविशिष्टविषयत्वान्न विरोध इत्याह तदिद्धेति ॥ तदिद्धा चैतन्याभासदीप्तेत्यर्थः ॥ ७१ ॥

व्यवहारगोचराणां विदुषां तस्यां बुद्धौ त्वात्मविभ्रमोऽपि तस्याः प्रत्यगात्मचैतन्याऽऽभासानुविद्धतां गमयतीत्याह यस्मादेवमिति ॥ बुद्धिप्रतिबिम्बितचैतन्याभासव्यवधानादात्मविभ्रमस्य विरलत्वदर्शनादप्येतदवगन्तव्यमित्याह दवीयस्स्विति ॥ बुद्धेर्दूरतरेषु शरीरादिबाह्यपदार्थेषु आत्मभावो विवेकिनामपचीयत इत्यर्थः ॥ ७२ ॥

आहेति ॥ येन वा शृणोति द्रष्टा श्रोता मन्ता कर्त्ता बोद्धा विज्ञानात्मा पुरुषः पिप्पलं स्वाद्वत्तीति च त्वंपदाभिधेये जीवे कर्तृत्वादिसंसारधर्मोपदेशः कस्मादित्यर्थः । एतदुत्तरश्लोकेन समाधीयत इत्याह उक्ते प्रतिविधीयत इति ॥ भ्रान्तीति ॥ स्थाणुर्वा पुरुषो वेति

---

* यस्माच्चिदाभासद्वारा चिता तादात्म्यापन्नत्वरूपसंनिधिप्रयुक्तमेव बुद्ध्यादेः प्रत्यक्त्वं न स्वतस्तस्मादित्युत्तरश्लोकेनान्वयः ।

DR.RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

भ्रान्तिप्रसिद्धा ऽनूद्यार्थं
तत्तत्त्वं भ्रान्तिबाधया ।
अयं नेत्युपदिश्येत
तथैवं तत्त्वमित्यपि ॥ ७३ ॥

इममर्थं दृष्टान्तेन बुद्धावारोपयति—

स्थाणुः स्थाणुरितीवोक्ति-
र्न नृबुद्धिं* निरस्यति ।
व्यनुवादात्तथैवोक्ति-
र्भ्रान्तिं पुंसो न बाधते ॥ ७४ ॥

संदिग्धे पुरुष एवेति विपर्यस्ते वा विपर्ययभ्रान्तस्य श्रोतुः प्रसिद्धपुरुषानुवादेन यो ऽयं पुरुषः सो ऽयं स्थाणुर्न पुरुष इति पुरोवर्तिनस्तत्त्वमारोपितपुरुषाकारबाधेन यथोपदिश्यते तथा ऽविद्याध्यारोपितकर्तृत्वाद्यनुवादेन जीवस्यापि याथात्म्यं तद्व्युदासेन बोध्यतइत्यर्थः ॥ ७३ ॥

एतदेव व्यतिरेकमुखेन दर्शयति इममिति ॥ व्यनुवादाद्विगतानुवादत्वादारोपितपुरुषाकारानुवादाभावादेकविषयत्वेन विरोधास्फुरणात्केवलमयं स्थाणुरिति बुद्धिः पुरुषबुद्धिं न निवर्तयति यथा तथा तदसीति तत्त्वमात्रोक्तावपि विरुद्धाकारानुवादाभावे संसारित्वनिराकरणमपि स्फुटं न भवेदित्यर्थः ॥ ७४ ॥

ननु संसारित्वेन प्रत्यक्षमनुभूयमानस्त्वंपदार्थः कथमसंसारिब्रह्मरूपेण प्रतिपाद्यतइत्याशङ्क्य ब्रह्मस्वरूपविधानाय केवलमनूद्यमानत्वेनाविवक्षितत्वाद् विधेयरूपेणानूद्यमानस्य दुर्बलत्वाद्बाध्यत्वमेव न तु

---

* नृबुद्धिम्=पुरुषबुद्धिम् ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

यस्माच्छ्रोतृप्रसिद्धानुवाद्येव त्वमिति पदं तस्माद्दृश्यमानस्थत्वाद् दुःखित्वादेरविवक्षितत्वमेव, विधीयमानत्वे हि सति विरोधप्रसङ्गो न तु विधीयमानानूद्यमानयोरिति स्वप्रधानयोर्हि पदयोर्विरोधाशङ्का सामान्यालिङ्गितत्वात्तयोर्न विपर्यये—

अनालिङ्गितसामान्यौ
न जिहासितवादिनौ ।
व्युत्थितौ तत्त्वमौ तस्मा-
दन्योन्याभिसमीक्षणौ ॥ ७५ ॥

बाधकत्वशङ्कापीत्युपसंहरन्नाह यस्मादिति ॥ पदार्थस्वभावालोचनया विरोधाभावमुक्त्वा पदस्वभावालोचनयाप्येवमित्याह स्वप्रधानयोरिति ॥ स्वप्रधानयोः पदयोः किमिति विरोधाशङ्केत्यत आह सामान्यालिङ्गितत्वादिति ॥ गौरश्व इति स्ववाच्यसामान्ययोरपरित्यागात्तथाभूतयोः पदयोः सामानाधिकरण्यं विरुध्यते न विपर्यये, शेषशेषिभावेन वर्तमानयोस्तु पदयोर्न विरोध इत्यर्थः । तदेतदाह अनालिङ्गितेति । अनालिङ्गिते परित्यक्ते अविवक्षिते सामान्ये स्वप्रवृत्तिनिमित्तभूते शबले वाच्ये* याभ्यां तत्त्वंशब्दाभ्यां तौ तत्त्वमावनालिङ्गितसामान्यौ तस्मान्नैतयोर्विरोध इत्यर्थः । अनालिङ्गितसामान्यत्वं कस्मादित्यत आह न जिहासितवादिनाविति ॥ तौ तत्त्वंशब्दौ प्रतिपिपादयिषिताखण्डाद्वितीयवाक्यार्थविरोधाद् जिहासितं पारोक्ष्यं सद्वितीयत्वं परिच्छिन्नत्वं चास्मिन्प्रयोगे न वदतः न प्रतिपादयतो यस्मादित्यर्थः । तदपि कुत इत्यत आह व्युत्थिताविति ॥ तौ

* दुःखित्वादुःखित्वरूपे, परोक्षत्वापरोक्षत्वरूपे च ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

अपास्तसामान्यार्थत्वादनुवादस्थत्वाद्विधीयमानेन च सह विरोधाद् दुःखित्वादेस्तु कामं जिज्ञासितार्थयोरसंसर्गो यथोपन्यस्तदोषविरहात्तत्त्वमर्थयोः संसर्गोऽस्तु नीलोत्पलवदिति चेन्नैवमप्युपपद्यते तस्मात्—

तदर्थयोस्तु निष्ठात्मा
ऽद्वयपारोक्ष्यवर्जितः ।
नाऽद्वितीयं विना ऽऽत्मानं
नात्मा नित्यदृशा विना ॥ ७६ ॥

तत्त्वंशब्दौ अन्योन्यमभिसमीक्षमाणौ यस्मात्स्ववाच्यार्थसामान्यरूपाद् व्युत्थितौ तात्पर्यविषयैकत्वानुरोधेन परस्परविरुद्धांशं परित्यज्याविरुद्धांशमात्रे व्यवस्थितौ यस्मात्तस्मादित्यर्थः ॥ ७५ ॥

ननु वाच्यार्थयोः परोक्षसद्वितीयत्वयोः सामान्यार्थत्वेनापास्तत्वाद् दुःखितादेरनूद्यमानस्थत्वाद्विधीयमानेन सह विरोधाच्च तयोर्वाच्यार्थयोः संसर्गाभावेऽपि लक्ष्यार्थयोः संसर्ग एवास्त्विति चोदयति अपास्तसामान्यार्थत्वादिति ॥ अपास्तौ च तौ सामान्यार्थौ चेत्यपास्तसामान्यार्थौ तद्भावोऽपास्तसामान्यार्थत्वं तथाभूतत्वाज्जिज्ञासितार्थयोरिति संबन्धः । श्लोकमवतारयन्परिहरति नैवमपीति ॥ तयोस्तत्त्वंपदयोर्लक्ष्यभूतयोर्निष्ठा, पर्यवसानं लक्ष्यभूतमात्माद्वयपारोक्ष्यवर्जितोऽखण्डैकरसः केवलस्तत्कथं प्रकृत्यर्थयोर्नीलोत्पलवद्विभागेनाऽप्रतिपत्तौ सत्यां संसर्गः स्यादिति भावः । विभागेनाऽप्रतीतिरपि कुत इत्यत आह नाद्वितीयमिति ॥ अद्वितीयं तत्पदलक्ष्यं ब्रह्म न प्रत्यगात्मानं विना स्वरूपं लभते तथा सत्यद्वितीयत्वाऽयोगादात्मा

www.astrology-tantra.com
DR.RUPNATHJI (DR.RUPAK NATH)

अत्राह किमिह जिहासितं किं वोपादित्सितमित्युच्यते । प्रत्यगात्मार्थविधायिनस्त्वंपदादुभयं प्रतीयते, ऽहं दुःखी प्रत्यगात्मा च । तत्र च प्रत्यगात्मनोऽहं दुःखीत्यनेनाभिसम्बन्ध आत्मयाथात्म्याऽनवबोधहेतुक एवातोऽहमर्थोऽनर्थोपसृष्टत्वादनित्यत्वाच्च हेय इति प्रत्यक्षहेतोरवसीयते । तदर्थं किं हेयं किं वोपादेयमिति नावध्रियते *तत इदमभिधीयते—

च त्वंपदलक्ष्यो नित्यसिद्धचैतन्यज्योतिषा तत्पदलक्ष्येण विना स्वरूपं न लभते तथा सति नित्यापरोक्षचिद्रूपत्वायोगात्तदेवं विभागेनाऽप्रतीतेरखण्डैकरसार्थनिष्ठत्वं तत्त्वंपदयोरित्यर्थः ॥ ७६ ॥

ननु त्वंशब्दस्य प्रत्यगात्ममात्राभिधायकत्वात्त्वमित्युक्ते तत्र हेयांशो न संभवतीति चोदयति अत्राहेति ॥ त्वंशब्दस्य न प्रत्यगात्ममात्राभिधायकत्वं किं त्वहंकारविशिष्टात्माभिधायकत्वमतस्त्वंशब्दाद् दुःखित्वादिधर्मविशिष्टोऽहंकारः प्रत्यगात्मा च प्रतीयते ततश्च हेयांशः संभवतीति परिहरति उच्यतइति ॥ ननूभयं प्रतीयते चेदुभयमप्युपादेयमेवास्तु, किमित्येकतरस्यांशस्य हेयत्वं हेयत्वे वा प्रत्यगात्मांश उपादेयो दुःख्यंशो हेय इति विनिगमने किं कारणमित्यत आह तत्र चेति ॥ अनर्थहेतुत्वादसत्यत्वादहंकारस्य हेयत्वं वाक्यार्थान्वयितया साक्षिभागस्योपादेयत्वमित्यर्थः । ननु तदर्थं सर्वज्ञत्वाद्यंशस्य पुरुषार्थत्वाद्धेयत्वं नास्तीति मत्वा चोदयति तदर्थमिति ॥ श्लोकमवतारयन्परिहरति तत इदमभिधीयतइति ॥

---

* नावधीयते, इति पाठान्तरम् । अर्थे तु न भेदः ।

DR.RUPNATHJI(DR.RUPAK NATH)

www.astrology-tantra.com

पारोक्ष्यं यत्तदर्थे स्या-
त्तद्धेयमहमर्थवत्।
प्रतीचेवाऽहमो ऽभेदः
पारोक्ष्येणात्मनो ऽपि मे ॥ ७७ ॥

कथं पुनस्तदर्थो ऽद्वितीयलक्षणः प्रत्यगात्माश्रयं सद्वितीयत्वं दुःखित्वं निरन्वयमपनुदतीत्युच्यते, न चैतयोर्निवर्तकनिवर्त्यभावं वयं ब्रूमः। कथं तर्हि त्वमर्थे प्रत्यगात्मनि प्रागनवबुद्धा ऽद्वितीयता सा ऽने-

---

अहमर्थवत्पारोक्ष्यस्य हेयत्वं कुत इत्याशङ्क्याज्ञाननिबन्धनत्वादित्याह प्रतीचेति ॥ अहमो ऽहंकारस्य यथा प्रतीचा प्रत्यगात्मना सहाऽज्ञाननिबन्धन * एवाभेदस्तथा मे साक्षिस्वभावस्य परमात्मनोपि पारोक्ष्येणाभेदस्तन्निबन्धन एव ततो हेयत्वमित्यर्थः। यद्वा ऽहंकारस्य प्रत्यगात्मना सह भेदवत्पारोक्ष्येण सह परमात्मनो मम भेदो ऽस्ति तस्माद्धेयत्वमित्यर्थः ॥ ७७ ॥

ननु तत्पदार्थसामानाधिकरण्यात्त्वंपदार्थगतदुःखित्वादिकं हेयमित्युक्तं तदयुक्तं, तत्पदस्य त्वंपदार्थानवबोधकत्वेन वैयधिकरण्यात्तस्मिन्नारोपितसंसारित्वनिवर्तकत्वानुपपत्तेः। न हि शुक्तिविषयज्ञानाद्रज्जुसर्पभ्रमो निवर्तते। अथ वैयधिकरण्यपरिहाराय तत्पदमपि त्वंपदार्थमवबोधयतीत्युच्येत तर्हि पौनरुक्त्यबुद्धिसंकरपदान्तरवैयर्थ्यैकपदवाक्यत्वादिदोषाः प्रादुःष्युरित्याक्षिपति कथं पुनरिति ॥ समाधत्ते उच्यतइति ॥ त्वमर्थोपाधौ तच्छब्देनाऽद्वितीयब्रह्मरूपत्वविधानात्तदनवबोधनिवृत्त्या तत्कार्यं संसारित्वम-

---

* अज्ञाननिबन्धनः=आध्यासिक इत्यर्थः।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

नावबोध्यते ऽतो ऽनवबोधनिरासेन तदुत्थस्य सद्वितीयत्वस्य त्वमर्थस्थस्य परोक्षत्वस्य च तदर्थस्थस्य निरसनान्न वैयधिकरण्यादिचोद्यस्यावसरो ऽस्तीति । तदिदमभिधीयते—

तत्त्वमर्थेन संपृक्तो*
नानात्वं विनिवर्तयेत् ।
नाऽपरित्यक्तपारोक्ष्यं
त्वं तदर्थं सिसृप्सति† ॥ ७८ ॥

कस्मात्पुनः कारणात्तदर्थो ऽद्वितीयलक्षणस्त्वमर्थेन

पि निवर्तत इत्येतावद्वदामो न त्वनयोः पदयोस्तदर्थयोर्वा साक्षान्निवर्त्यनिवर्तकभावो ऽस्तीति । तस्मान्न त्वदुक्तवैयधिकरण्यादिदोषाणां प्रसक्तिरित्यर्थः । उक्ते ऽर्थे श्लोकमवतारयति तदिदमभिधीयत इति ॥ तत्तच्छब्दार्थो विधीयमानस्त्वमर्थेनोद्देशेन संबद्धस्तदनवबोधनिवृत्त्या तत्कृतं नानात्वं निवर्तयति, एवं त्वंपदार्थो ऽप्यपरित्यक्तपारोक्ष्यलक्षणं विरुद्धधर्मं तदर्थं ब्रह्म नैकत्वेन प्रतिपद्यते तेन तद्गतमपि पारोक्ष्यं नान्तरीयकतया निवर्तत इत्यर्थः । संपृक्ताविति पाठे तच्छब्दार्थस्य त्वमर्थेन संपृक्तौ संपर्के सति नानात्वं निवर्तत इति योजना ॥ ७८ ॥

ननु वाक्यस्यैक्यतात्पर्यवत्त्वेन‡ दुःखित्वादिनिवृत्तौ तात्पर्याभावाद्यस्य तात्पर्यं वाक्यभेदप्रसङ्गाद् निवर्तकत्वमनुपपन्नमित्यभिप्रे-

---

* तत्त्वमर्थेन संपृक्ताविति पाठान्तरम् ।

† न सिसृप्सति=न संसृज्यते, नान्वेतीति यावत् ।

‡ वाक्यस्याद्वितीयत्वादिबोधने तात्पर्ये ऽपीत्यर्थः ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

प्रत्यगात्मना ऽपृथगर्थः सन्नविद्योत्थं सद्वितीयत्वं निहन्तीत्युच्यते विरोधात्, तदुच्यते—

संसारिताद्वितीयेन
पारोक्ष्यं चात्मना सह ।
प्रासङ्गिकं* विरुद्धत्वा-
त्तत्त्वंभ्यां बाधनं तयोः ॥ ७९ ॥

तत्त्वमर्थयोस्तु बाधकत्वे ऽन्यदपि कारणमुच्यते—

त्य शङ्कते कस्मादिति ॥ वाक्यतात्पर्यविषयैकत्वविरोधान्नान्तरीयकी दुःखित्वादिनिवृत्तिः स्यादिति समाधत्ते उच्यतइति ॥ अर्थमुपपाद्य श्लोकमवतारयति तदुच्यतइति ॥ संसारित्वमद्वितीयेन सह विरुध्यते पारोक्ष्यं चापरोक्ष्येणात्मना सह विरुध्यते एवं तयोः प्रतिपाद्यमानेनाद्वितीयेन प्रत्यक्त्वेन च विरोधादेकत्वपराभ्यां तत्त्वंभ्यां तयोर्बाधनं प्रासङ्गिकं नान्तरीयकं स्यादित्यर्थः। प्रासङ्गिकविरुद्धत्वादिति पाठे प्रासङ्गिके सती अद्वितीयप्रत्यक्त्वाभ्यां विरुद्धे चेति प्रासङ्गिकविरुद्धे तद्भावस्तत्त्वं प्रासङ्गिकत्वादारोपितत्वाद्विरुद्धत्वाच्च तयोर्बाधनं क्रियतइत्यर्थः ॥ ७९ ॥

ननु विरुद्धत्वाच्चेत्संसारित्वपारोक्ष्ययोस्तत्त्वमर्थाभ्यां बाधनं तर्हि विरुद्धत्वाविशेषात्तत्त्वमर्थयोरेव बाध्यत्वमितरयोर्बाधकत्वं किं न स्यादित्याशङ्क्य तयोर्बाधकत्वे कारणमुत्तरश्लोकेनोच्यतइत्याह तत्त्वमर्थयोरिति ॥ तत्त्वमर्थयोरन्योन्यविशेषणविशेष्यभावस्याज्ञातत्वे सति पुरुषार्थत्वेन श्रुतितात्पर्यविषयत्वादितरयोस्तु तद्विपरीता-

---

* प्रासङ्गिकम्=प्रसङ्गागतम्, आर्थिकमिति यावत् । तयोर्बाधनमार्थिकमेव न तु तावत्पर्यन्तं विधिव्यापारः कल्प्यतइत्यर्थः। प्रासङ्गिकविरुद्धत्वादिति पाठान्तरम् ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

अज्ञातपुरुषार्थत्वा*-
च्छ्रौतत्वा†त्तत्त्वमर्थयोः ।
स्वमर्थमपरित्यज्य
बाधकौ स्तां विरुद्धयोः ॥ ८० ॥

एवं तावद्यथोपक्रान्तेन प्रक्रियावर्त्मना न प्रत्यक्षादिप्रमाणान्तरैर्विरोधगन्धो ऽपि संभाव्यते । यदा पुनः सर्वप्रकारेणापि यतमाना नैवेमं वाक्यार्थं संभावयामः प्रत्यक्षादिप्रमाणान्तरविरोधत एव, तस्मिन्नपि पक्ष उच्यते—

प्रत्यक्षादिविरुद्धं चे-
द्वाक्यमर्थं वदेत्क्वचित् ।
स्यात्तु तद् दृष्टिविध्यर्थं
योषाग्निवदसंशयम् ॥ ८१ ॥

र्थत्वात्तत्त्वमर्थाविव स्वमर्थमन्योन्यविशेषणविशेष्यभावलक्षणमपरित्यज्य तद्विरोधिनोः पारोक्ष्यदुःखितयोर्बाधकाविति युक्तमित्यर्थः ॥ ८० ॥

एवं तत्त्वंपदयोर्लक्षणावृत्त्या बोधकत्वे प्रत्यक्षादिविरोधो नास्तीति वृत्तं दर्शयति एवं तावदिति ॥ इदानीं प्रत्यक्षादिविरोधमसन्तमभ्युपगम्य प्रसंख्यानपरतां वाक्यस्य ये मन्यन्ते तन्मतनिराकरणायोपन्यस्यति यदा पुनरिति ॥ तन्निराकरणत्वेन श्लोकमवता-

---

* अज्ञातत्वे सति=मानान्तरानधिगतत्वेनापूर्वत्वे सति पुरुषार्थत्वादित्यर्थः ।

† श्रौतत्वात्=श्रुतितात्पर्यविषयत्वादित्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

यदा तु तत्त्वमस्यादिवाक्यं सर्वप्रकारेणापि विचार्यमाणं न क्रियां कटाक्षेणापि वीक्षते तदा प्रसंख्यानादिव्यापारो दुःसंभाव्य इति । तदुच्यते—

वस्त्वेकनिष्ठं वाक्यं चे-
न्न तस्य स्यात्क्रियार्थता ।
वस्तुनो ह्येकरूपत्वा-
द्विकल्पस्याप्यसंभवः ॥ ८२ ।

भिन्नविषयत्वाच्च न प्रमाणान्तरविरोधः । कथम्,

रयति तस्मिन्नपि पच इति ॥ एवं सति वाक्यस्य वस्तुनिष्ठत्वमपहाय दृष्टिविध्यर्थत्वमङ्गीकृतं स्यादित्यर्थः* ॥ ८१ ॥

अस्तु तर्हि तत्त्वमस्यादिवाक्यस्यापि प्रमाणान्तरविरुद्धार्थत्वात्प्रसंख्यानद्वारेण वस्तुनिष्ठत्वमिति तत्राह यदा त्विति ॥ उपक्रमोपसंहारादिभिर्विचार्यमाणं तत्त्वमस्यादिमहावाक्यं न क्रियापरं दृश्यते तस्मादुपासनाविधिपरत्वं न स्यादित्यर्थः । उक्ते ऽर्थे श्लोकमवतारयति तदुच्यत इति ॥ वाक्यस्य केवलवस्तुनिष्ठत्वाद्वस्तुनश्च कूटस्थत्वेन क्रियासाध्यत्वायोगात्कूटस्थत्वादेव नित्यसिद्धं वा उपासनादिक्रियासाध्यं वा तदिति विकल्पस्याप्यसंभवात्तत्त्वमस्यादिवाक्यं न प्रसंख्यानविधिपरमित्यर्थः ॥ ८२ ॥

प्रमाणान्तरविरोधमभ्युपगम्यैतदुक्तं स एव नास्तीत्याह भिन्नविषयत्वाच्चेति ॥ तत्कथमित्यपेक्षायां श्लोकमवतारयति उच्यतइ-

---

* यत्तावद्वाक्यं प्रत्यक्षादिविरुद्धमर्थं बोधयति तस्य वाक्यस्य तद्दृष्टिपरत्वं भवत्युपासनार्थम् । यथा योषा वा व गौतमाग्निरित्यादौ योषिदग्न्योरभेदस्य बाधितत्वेन योषायामग्निदृष्टिविधानं, तथा ऽत्रापि वाक्यस्योपासनापरत्वं स्यादित्यर्थः ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

उच्यते—

अपूर्वाधिगमं कुर्व-
त्प्रमाणं स्यान्न चेन्न तत् ।
न विरोधस्ततो युक्तो
विभिन्नार्थावबोधिनोः ॥ ८३ ॥

य एवमपि भिन्नविषयाणां विरोधं वक्ति सो ऽन्या-
पि विरोधं ब्रूयात्—

नायं शब्दः कुतो यस्मा-
द्रूपं पश्यामि चक्षुषा ।
इति यद्वत्तथैवायं
विरोधो ऽक्षजवाक्ययोः* ॥ ८४ ॥

त्ति ॥ अपूर्वाधिगमं कुर्वत्प्रमाणान्तरानधिगतमर्थमेव गमयत्प्रमाणं भवति, न चेदनधिगतमर्थमवगमयेदधिगतमेवावगमयेदनुवादश्रुत्यादिवत्प्रमाणमेव न भवति, तस्माद्विभिन्नार्थविषयत्वमेव प्रमाणानामङ्गीकार्यं ततश्च तत्त्वमस्यादिवाक्यप्रत्यक्षादिकयोः प्रमाणतया ऽन्योन्यवार्ताऽनभिज्ञयोर्न विरोध इत्यर्थः ॥ ८३ ॥

भिन्नविषययोर्वाक्यप्रत्यक्षयोः परस्परवार्ताऽनभिज्ञतया विरोधो नास्तीत्येतमर्थं दृष्टान्तेन स्पष्टयितुमाह य एवमपीति ॥ यथा रूपग्राहकयोश्चक्षुःश्रोत्रयोर्न को ऽपि विरोधः संभवति, एवं प्रत्यक्षागमयोरपीत्यर्थः ॥ ८४ ॥

---

* अक्षजवाक्ययोः=प्रत्यक्षागमयोरित्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

प्रमाणानां सतां न विरोधः श्रोत्रादीनामिव भिन्नविषयत्वात् । ययोश्चाभिन्नविषयत्वं तयोराखुनकुलयोरिव प्रतिनियत एव बाध्यबाधकभावः स्यात्। तदुच्यते—

प्रत्यक्षं चेन्न शाब्दं स्या-
च्छाब्दं चेदक्षजं कथम् ।
प्रत्यक्षाभासः प्रत्यक्षे
ह्यागमाभास आगमे ॥ ८५ ॥

ननु सैवेयं ज्वालेति प्रत्यक्षं प्रभाविनाशितलिङ्गानुमानाद्बाध्यते, तथा पदार्थत्वेनाग्नेरनुष्णत्वग्राह्यनुमानं प्रत्यक्षेण बाध्यते तथा "न हिंस्यात्सर्वा भूतानी"त्यागमो "ऽग्नीषोमीयं पशुमालभेते" त्यागमान्तरेण बाध्यते, तत्कथं प्रमाणानां विरोधाभाव इत्याशङ्क्य ययोर्ज्ञानयोरेकपदार्थोपाधौ विभिन्नस्वभावत्वालम्बनत्वं तयोर्बाध्यबाधकभावेऽपि न द्वयोः प्रामाण्यं बाध्यस्याऽऽभासत्वाद्बाधकस्यैव प्रमाणत्वादित्येतदाह प्रमाणानां सतामिति ॥ प्रत्यक्षं चेदिति। यत्प्रत्यक्षसिद्धं न तच्छाब्देन बाध्यते बोध्यते वा, तेन न तच्छाब्दं शब्दप्रमाणकम् । यच्च शाब्दं शब्दप्रमाणकं तदपि न प्रत्यक्षेण बाध्यते बोध्यतेवा, तेन न प्रमाणानां विरोधः । ययोः पुनर्बाध्यबाधकभावस्तयोरन्यतरस्यैव प्रमाणत्वमितरस्याभासत्वाद्यथेयं शुक्तिरिति प्रत्यक्षे ऽभ्युपगते सति इदं रजतमिति प्रत्यक्षज्ञानं प्रत्यक्षाभासस्तथैकस्मिन्नागमे ऽभ्युपगते तेनापहृतविषयो ऽपर आगमाभास एवमागमप्रत्यक्षयोः प्रत्यक्षानुमानयोश्च बाध्यबाधकप्रसिद्धिर्नेतरथेत्यर्थः ॥ ८५ ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

न च प्रतिज्ञाहेतुदृष्टान्तन्याय इह संभवति, शब्दादीनां प्रत्येकं प्रमाणत्वात्, अत आह—

स्वमहिम्ना* प्रमाणानि
कुर्वन्त्यर्थावबोधनम् ।
इतरेतरसाचिव्ये†
प्रामाण्यं नेष्यते स्वतः ॥ ८६ ॥

न च सुखदुःखादिसंबन्धी ऽस्यात्मनः प्रत्यक्षादि-

ननु तत्त्वमस्यादिवाक्यमप्रमाणं, प्रत्यक्षादिविरुद्धार्थत्वात्, "आदित्यो यूपः" "यजमानः प्रस्तर" इत्यादिवाक्यवदित्यनुमीयतइत्यत आह न च प्रतिज्ञेति ॥ "आदित्यो यूप" इत्यादावादित्यादिपदार्थस्य पशुबन्धनाद्ययोग्यस्य "यूपे पशुं बध्नाती"ति शेषिवाक्यविरोधादप्रामाण्यं न तु प्रमाणान्तरविरोधात् । प्रमाणानां स्वतः प्रामाण्यात्प्रमाणान्तरसंवादाऽनपेक्षत्वात्स्वार्थावबोधमात्रेणैव प्रामाण्योपपत्तेरन्यथा ऽनवस्थाप्रसङ्गाच्चेत्यर्थः । अथ वा प्रतिज्ञाहेतुदृष्टान्तानां यथा ऽन्योन्यापेक्षयैवार्थावबोधकत्वं तथा प्रत्यक्षानुमानादीनामपीत्याशङ्क्याह न च प्रतिज्ञेति ॥ प्रतिज्ञादीनां प्रमाणावयवत्वादन्योन्यापेक्षया बोधकत्वे ऽपि प्रत्यक्षादीनां स्वत एव प्रमाणत्वान्नेतरेतरापेक्षा, इतरेतरापेक्षया प्रामाण्ये सति स्वतःप्रामाण्यभङ्गप्रसङ्गादेकप्रमाणत्वप्रसङ्गाच्चेत्यर्थः ॥ ८६ ॥

पूर्वमात्मनो दुःखित्वादेः प्रमाणान्तरग्राह्यत्वमङ्गीकृत्य न तद्विरोधात्तत्त्वमस्यादिवाक्यस्य प्रामाण्यभङ्गप्रसक्तिरित्युक्तम् । इदानीं प्र-

---

* स्वमहिम्ना=प्रमाणान्तरसंवादानपेक्षित्वेन ।

† इतरेतरसाचिव्ये=प्रमाणानां परस्परसापेक्षत्वे ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

प्रमाणैर्गृह्यते येन विरोधः प्रत्यक्षादिप्रमाणैरुद्भाव्यते, कथं, शृणु—

दुःखिता ऽवगतौ चेत्स्या*-
न्न प्रमीयेत सा ऽऽत्मवत् ।
कर्मण्येव प्रमा न्याय्या
न तु कर्तर्यपि क्व चित् ॥ ८७ ॥

अभ्युपगमे ऽपि च प्रसंख्यानशतेनापि नैव त्वसम्भावितदोषा†न्मुच्यसे ऽत आह—

प्रमाणबद्धमूलत्वाद्
दुःखित्वं केन वार्यते ।

माणान्तरग्राह्यत्वमेव नास्तीत्याह न च सुखेति ॥ प्रतिज्ञातार्थहेतुत्वेन श्लोकमवतारयति कथं शृण्विति ॥ सुखदुःखादिधर्माणामात्मसमवेतत्वे तेषामात्मवत्प्रमागोचरत्वं न स्यात् । धर्मित्वेनात्मनः प्रमागोचरत्वमन्तरेण तद्धर्माणां प्रमागोचरत्वायोगादात्मा च न प्रमागोचरः, प्रमायाः कर्मैकगोचरत्वात्कर्मकर्तृविरोधप्रसङ्गाच्चेत्यर्थः ॥ ८७ ॥

पूर्वं प्रमाणानां भिन्नविषयत्वाद् दुःखित्वादेः प्रमाणगम्यत्वासंभवाच्च प्रमाणान्तरविरोधाभावात्प्रसंख्यानविधिपरत्वं वाक्यस्य नास्तीत्युक्तमिदानीं दुःखित्वादेः प्रमाणगम्यत्वं तद्विरोधाद्वाक्यस्य प्रसंख्यानपरत्वं चाभ्युपगम्यापि दुःखित्वादिलक्षणात्संसारादनिर्मोक्षप्रसक्तिरित्याह अभ्युपगमे ऽपि चेति ॥ आत्मनः

---

* दुःखितावगतिश्चेत् स्यादिति पाठान्तरम् ।

† असंभावितदोषात्=अनिर्मोक्षप्रसङ्गरूपाद्दोषादित्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अग्न्युष्णवद्व निवृत्तिश्चेद्व
नैरात्म्यं ह्येति सौगतम् ॥ ८८ ॥

अथ मतम्—

निराकुर्यात्प्रसंख्यानं
दुःखित्वं चेत्स्वनुष्ठितम् ।
प्रत्यक्षादिविरुद्धत्वा-
त्कथमुत्पादयेत्प्रमाम् ॥ ८९ ॥

संसारित्वस्य प्रमाणावगतत्वेन पारमार्थिकत्वान्न केनापि तस्य निवृत्तिः संभवति, यथाऽग्नेरुष्णता न केनापि वार्यते तद्वदित्यर्थः। विपक्षे दोषमाह निवृत्तिश्चेन्नैरात्म्यमिति ॥ दुःखित्वादिपरिणामस्य परिणामिनिवृत्तिव्यतिरेकेणात्यन्तनिवृत्त्ययोगात्परिणामिनिवृत्तौ शून्यवादप्रसङ्ग इत्यर्थः। अथवा यथाऽग्नेरुष्णत्वं प्रामाणिकमपि निवर्तते तद्वद्व दुःखादिकमपि निवर्ततामिति शङ्कित्वा अग्न्युष्णत्वस्य धर्मिनिवृत्तिव्यतिरेकेण निवृत्त्यदर्शनादिहापि दुःखित्वादेर्धर्मिनिवृत्तिव्यतिरेकेण निवृत्त्यसंभवात्तेनैव सह निवृत्तिर्वाच्या, तथा च सति शून्यवादप्रसङ्गं परिहरति अग्न्युष्णवदिति ॥ ८८ ॥

नन्वनिराकृत्यैवाऽऽत्मनः स्वरूपं दुःखित्वादिविपरीतप्रमासुत्पाद्य प्रसंख्यानमेव दुःखित्वादिकं निराकरिष्यतीति शङ्कते* अथ मतमिति ॥ प्रसंख्यानस्य चित्तैकाग्र्यरूपस्याऽप्रमाणत्वात् प्रमाणत्वेऽपि प्रत्यक्षादिविरोधान्नैवमिति परिहरति प्रत्यक्षादीति ॥ ८९ ॥

---

* वाक्यजन्यनिदिध्यासनलक्षणप्रसंख्यानेनैव दुःखित्वादिनिवृत्तौ वाक्यस्यान्यथासिद्धत्वमिति भावः।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

ननु प्रसंख्यानं नाम तत्त्वमस्यादिशब्दार्थान्वयव्यतिरेकयुक्तिविषयबुद्ध्याम्रेडनमभिधीयते, तच्चानुष्ठीयमानं प्रमितिवर्द्धनया* परिपूर्णां† प्रमितिं जनयति न पुनरैकाग्र्यवर्द्धनयेति । यथा ऽशेषाऽशुचिनीडे स्त्रीकुणपे कामिनीति निर्वस्तुकः पुरुषायासमात्रजनितः प्रत्यय इति । तन्न, यतः—

अभ्यासोपचयाद् बुद्धे-
र्यत्स्यादैकाग्र्यमेव तत् ।
न हि प्रमाणान्यभ्यासा-
त्कुर्वन्त्यर्थावबोधनम् ॥ ९० ॥

ननु प्रसंख्यानस्य प्रमोत्पादकत्वमनुपपन्नमिति कथमुच्यते तस्य तत्त्वमस्यादिवाक्यार्थज्ञानतदुपकरणयुक्त्यभ्यासरूपत्वेन प्रमितिवर्द्धकत्वोपपत्तेः । श्रुतौ च निदिध्यासितव्य इति आत्मदर्शनहेतुत्वेन तस्याङ्गीकारात् । लोके च भावनाप्रचयस्यावस्तुन्यपि प्रत्ययदार्ढ्यहेतुत्वदर्शनादिति शङ्कते ननु प्रसंख्यानमिति ॥ तदुत्तरत्वेन श्लोकमवतारयति तन्न यत इति ॥ प्रमाणाभ्यासोपचयस्य च पदार्थनिश्चयद्वारेण वाक्यार्थविषयासंभवनाविपरीतभावनालक्षणप्रतिबन्धनिरासेनैवोपयोगः, निदिध्यासनस्य चैकाग्र्यजनकत्वेन चित्तविक्षेपलक्षणप्रतिबन्धनिरासकत्वात्, समाहितमनसश्च प्रमाणसामग्रीतः स्वत एव प्रमोत्पत्तेः, प्रत्यक्षादेश्चाभ्यासापेक्षया प्रमितिजनकत्वादर्शनात्, न साक्षात्प्रसंख्यानस्य प्रमोत्पादकत्वमित्यर्थः ॥ ९० ॥

---

* प्रमितिवर्धनया=दृढतरसंस्कारजननद्वारा ।

† परिपूर्णाम्=कैवल्यजनिकाम् ।

DR.RUPNATHJI(DR.RUPAK NATH)

www.astrology-tantra.com

अभ्यासोपचिता कृत्स्नं
भावना चेन्निवर्तयेत् ।
नैकान्तिकी निवृत्तिः स्या-
द्भावनाजं हि तत्फलम्* ॥ ९१ ॥

अपि चाह—

दुःख्यस्मीत्यपि चेद् ध्वस्ता
कल्पकोट्युपबृंहिता ।
स्वल्पोयोऽभ्यासजा स्यास्नुर्†
भावनेत्यत्र का प्रमा ॥ ९२ ॥

ननु शास्त्रात्स्यास्नुत्वं भविष्यति नैवं, यथाऽवस्थि-

नन्वभ्यासजनितायाभावनायाः समस्तसांसारिकदुःखनिवर्तनेन ब्रह्मरूपताप्राप्तिहेतुत्वं "स यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति" श्रूयतइति शङ्कते अभ्यासोपचितेति ॥ सत्यं श्रूयते, सा तु प्राप्तिरात्यन्तिकी न भवति भावनाजन्यत्वेनानित्यत्वादिति परिहरति नैकान्तिकीति ॥ ९१ ॥

किमु वक्तव्यमिति न्यायान्तरं दर्शयति अपि चाहेति ॥ अनादिकालप्रवृत्ताप्यहं सुखी दुःखीति भावना ध्वस्ता चेदल्पकालाभ्यासजनिता ब्रह्मभावना निवर्ततइति किमु वक्तव्यं तथात्वे ऽपि स्यास्नुत्वे प्रमाणाभावादित्यर्थः ॥ ९२ ॥

ननु का प्रमेति कथमभिधीयते सगुणोपासनाफलत्वेन "न स

---

* तत् फलम्=उपास्यसाक्षात्कार एव भावनाफलं न त्वैकान्तिकात्यन्तिकदुःखनिवृत्तिस्ततो वाक्यं नान्यथासिद्धमिति भावः ।

† स्यास्नवी=स्थिरा नित्येति यावत् ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

तद्वस्तुयाथात्म्याऽवबोधमात्रकारित्वाच्छास्त्रस्य, न हि पदार्थशक्त्याधानकृच्छास्त्रम् । प्रसिद्धं च लोके—

भावनाजं फलं यत्स्या-
द्यच्च स्यात्कर्मणः फलम् ।
न तत् स्थास्न्विति मन्तव्यं
द्रविडेष्विव संगतम् ॥ ९३ ॥

यद्यपि प्रत्यक्षादिप्रमाणोपात्तमात्मनो दुःखित्वं तथापि तत्त्वमस्यादिवाक्योत्थप्रत्यय एव बलीयानिति निश्चयो ऽव्यभिचारिप्रामाण्यो वाक्योपात्तत्वात्,* प्रमे-

---

पुनरावर्तत" इत्यनावृत्तेः श्रूयमाणत्वादिति शङ्कते नन्विति शास्त्रादिति ॥ तत्रापि शास्त्रस्य पदार्थशक्त्याधानकारित्वायोगात् । न च "न स पुनरावर्तत" इत्यादेरपि शास्त्रस्य नित्यत्वबोधकत्वमेवेति वाच्यम् । तथा च सति "नास्त्यकृतः कृतेन" त्यादिश्रुतिसहकृतस्य भावनाजन्यत्वेनानित्यत्वानुमानस्य बलवत्तरत्वादनावृत्तिश्रुतेश्च ज्ञानद्वारापेक्षयापि संभवात् "न स पुनरावर्तत" इत्यस्य न नित्यत्वबोधकत्वमिति परिहरति नैवमिति ॥ किं च भावनाजन्यफलस्यानित्यत्वं प्रसिद्धं तस्मादपि शास्त्रान्न नित्यत्वं प्रतिपत्तुं शक्यत इत्यत्र श्लोकमवतारयति प्रसिद्धं चेति ॥ ९३ ॥

पूर्वं प्रमाणानां परस्परविरोधाभावाद् दुःखित्वस्य प्रमाणान्तरायोग्यत्वात्तत्त्वमस्यादिवाक्यस्य मानान्तराविरुद्धार्थतया प्रसंख्यानपरत्वं निराकृत,मिदानीं दुःखित्वस्य प्रत्यक्षादिसिद्धतामभ्युपग-

---

* अव्यभिचारिप्रामाण्योपात्तत्वादित्यन्यत्र पाठः ।

www.astrology-tantra.com
DR.RUPNATHJI(DR.RUPAK NATH)

यस्य च स्वत एव निर्दुःखित्वसिद्धेः, प्रत्यक्षादेस्तु सव्यभिचारित्वात्, संभावनायाश्च पुरुषपरिकल्पनामात्रावष्टम्भत्वा*च्चेति—

निर्दुःखित्वं स्वतःसिद्धं
प्रत्यक्षादेश्च दुःखिता।
को ह्यात्मानमनादृत्य
विश्वसेद्बाह्यमानतः॥ ९४॥

स्यापि तत्त्वमस्याद्यागमजन्यज्ञानस्यैव मानान्तरसिद्धार्थबाधकं स्यादित्याह यद्यपीति॥ कुतस्तस्यैव बाधकत्वमपीत्यत आह अव्यभिचारीति॥ अपौरुषेयत्वेनासंभाविताशेषपुरुषदोषवाक्यजन्यत्वादित्यर्थः। इतश्चागमजन्यज्ञानस्य बाधकत्वमित्याह प्रमेयस्य चेति॥ आत्मनः सुषुप्त्यादौ स्वयंप्रकाशमानतया निर्दुःखित्वस्य सिद्धत्वाद् दुःखित्वग्राहिप्रत्यक्षस्य बाध्यत्वमित्यर्थः। इतश्च तस्यैव बाध्यत्वमित्याह प्रत्यक्षादेस्त्विति॥ प्रत्यक्षादेः संभावितदोषत्वाद् दुःखित्वग्राहिप्रत्यक्षस्य बाध्यत्वमित्यर्थः। यद्वा सुषुप्त्यादावात्मनि प्रकाशमानेऽपि दुःखित्वग्राहिप्रत्यक्षादेर्व्यभिचारित्वाद्बाध्यत्वमित्यर्थः। इतश्च दुःखित्वप्रतिपत्तिर्बाध्येत्याह संभावनायाश्चेति॥ आत्मनो दुःखित्वस्य संभावनामात्रसिद्धत्वा†दपि तद्ग्राहिप्रत्यक्षादेर्बाध्यत्वमित्यर्थः। ननु स्वतःसिद्धात्प्रत्यक्षादिसिद्धस्यैव प्राबल्यं किं न स्यादित्यत आह को हीति॥ निर्दुःखित्वं निर्दोषागमवाक्यात्स्वत एव प्रतीयते, दुःखित्वं तु संभावितदोषात्प्रत्यक्षादेः परत एव

---

* पुरुषकल्पनावष्टम्भाच्चेति पाठान्तरम्।

† संभावनेति=कल्पनामात्रसिद्धत्वादित्यर्थः।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

संबन्धार्थं एव—

अपि प्रत्यक्षबाधेन
प्रवृत्तिः प्रत्यगात्मनि ।
पराञ्चि खानीत्येतस्मा-
द्वचसो गम्यते श्रुतेः ॥ ६५ ॥

अभ्युपगम्यैवमुच्यते* न तु प्रमाणं सत्प्रमाणान्तरेण विरुध्यत इत्यसकृदवोचाम । यत्रापि वाक्यप्रत्यक्षयोर्विरोधाशङ्का तत्रापि पुरुषमोहवशादेव सा जायते न तु परमार्थत इति । अत आह—

प्रतीयते, तत्र निर्दोषसदोषप्रमाणाभ्यां स्वतः परतः प्रतिपन्नयोर्निर्दोषप्रमाणेन स्वतः प्रतिपन्ने विश्रमः कर्तव्य इत्यर्थः ॥ ६४ ॥

पूर्वश्लोकसंबन्धग्रन्थोक्तार्थे श्रुतिप्रतिपादनायोत्तरश्लोक इत्याह संबन्धेति ॥ प्रत्यक्षबाधेन प्रत्यगात्मनि श्रुतेः प्रवृत्तिरित्येषो ऽर्थः "पराञ्चि खानी"त्येतस्माद्वचसो ऽवगम्यते, "तस्मात्पराङ् पश्यति नान्तरात्म"न्निति प्रत्यगात्मनः प्रत्यक्षाद्ययोग्यत्वकथनादित्यर्थः ॥ ६५ ॥

अभ्युपगमवादमिदानीं त्यजति अभ्युपगम्यैवमिति ॥ ननु प्रमाणं सत्प्रमाणान्तरेण न विरुध्यत इति कथमुच्यते तत्त्वमस्यादिवाक्यदुःखित्वादिप्रत्यक्षयोर्विरोधदर्शनादित्याशङ्क्य तत्रापि प्रमाणवृत्त्यपरिज्ञानादेव विरोधाऽऽशङ्का पुरुषस्य जायते न तु परमार्थतस्तयोर्विरोधो ऽस्तीत्याह यत्रापीति ॥ कथमेवं निश्चीयत इत्याशङ्क्य श्लोकमवतारयति अत आहेति ॥ अहं दुःखीत्यात्मनो दुःखित्वप्रत्यक्षतां

---

* अभ्युपगम्यैतदुच्यत इति पाठान्तरम् ।

(DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

प्रमां चेज्जनयेद्वाक्यं
प्रत्यक्षादिविरोधिनीम् ।
गौणीं प्रत्यक्षतां ब्रूया-
न्मुख्यार्थासंभवाद् बुधः ॥ ६६ ॥

तस्यार्थस्य सुखप्रतिपत्त्यर्थमुदाहरणम्—

अग्निः सम्यगधीते ऽसौ
जहासोच्चैश्च मञ्चकः ।
यथा तद्वदहंवृत्त्या
लक्ष्यते ऽनर्हया ऽपि सः ॥ ६७ ॥

कस्मात्पुनः कारणात्त्वमादिवाक्येनात्मा नाभिधीयते

गौणीं ब्रूयादन्तःकरणगतदुःखित्वप्रत्यक्षता तद्गुणयोगात्प्रत्यगात्मनि वर्ततइति ब्रूयात् । स्वयंप्रकाशचैतन्यस्वभावस्यात्मनो दुःखित्वादिपरिणामित्वासंभवेन तस्मिन् दुःखीति प्रत्यक्षस्य मुख्यार्थतायोगात्ततश्चैतन्यस्वभावस्यात्मनो ब्रह्मत्वबोधकेन तत्त्वमस्यादिवाक्येन सह दुःखित्वप्रत्यक्षस्य न विरोध इत्यर्थः ॥ ६६ ॥

अहं दुःखीति प्रत्ययेन गुणवृत्त्या ऽऽत्मोच्यतइत्येतद्दृष्टान्तेन प्रतिपादयतीत्याह तस्यार्थस्येति ॥ अग्न्यादिशब्देनाऽध्येतृचेतनाभिधानाऽनर्हेण माणवको लक्ष्यते यथा* तद्वत्स्वयंप्रकाशचैतन्याभिधानाऽनर्हया ऽहंवृत्त्या ऽऽत्मा लक्ष्यते इत्यर्थः† ॥ ६७ ॥

ननु मुख्यया वृत्त्या आत्मनो ऽभिधायकं पदमस्ति न वा, नास्ति

---

* यथा वा मञ्चको हसतीत्यादौ मञ्चस्थितः पुरुषो लक्ष्यते इति शेषः ।

† एवं चाहमादिपदानां दुःखित्वाद्युपस्थापकत्वे ऽपि लक्षणया ऽऽत्मबोधकत्वाभ्युपगमात्र को ऽपि विरोधप्रसङ्ग इति भावः ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

किमनया कल्पनयेति, तत्राह—

त्वमित्येतद्विहायाऽन्य-
न्न वर्त्माऽऽत्मावबोधने ।
समस्तीह त्वमर्थो ऽपि
गुणलेशेन* वर्तते ॥ ९८ ॥

कस्मात्पुनर्हेतोस्त्वमित्येतदपि गुणलेशेन वर्तते न

चेन्न लक्ष्यत्वं त्वशब्दवाच्यस्यैव लोके ऽन्यपदलक्ष्यत्वदर्शनात् । अस्ति चेत्तेनैवाभिधीयतां किमनया लक्षणाकल्पनयेति शङ्कते कस्मात्पुनरिति ॥ तदुत्तरत्वेन श्लोकमवतारयति तत्राहेति ॥ त्वमहमित्येतत्पदं विहायात्मावबोधने पदान्तरं न संभवति । तच्च त्वमहमादिपदं गुणलक्षणयोरन्यतरवृत्त्यैवात्मनि वर्तते न तु मुख्यया वृत्त्याऽऽत्माभिधायकं पदान्तरमस्ति, तथापि नाऽलक्ष्यत्वप्रसङ्गो वाच्यत्वस्य लक्ष्यत्वाप्रयोजकत्वान्मुख्यार्थसंबन्धो विवक्षितार्थप्रतिपत्त्युपयोगित्वाल्लक्ष्यत्वे प्रयोजको न तु वाच्यत्वम्, उक्तप्रयोजकसद्भावे वाच्यत्वाऽभावापराधेन लक्ष्यत्वाऽभावाऽदर्शनादात्मनश्च "यतो वाचो निवर्तन्त" इत्यादिश्रुतेर्जात्याद्यभावाच्च† निरुपाधिकस्य वाच्यत्वानुपपत्तेस्त्वमहमादिशब्दवाच्यप्रमातृसाक्षितया तत्संबन्धस्य भावादभीष्टसर्वप्रत्यक्त्वप्रतिपत्तिप्रयोजनभावात्त्वहमादिशब्दवाच्यान्तःकरणोपाधावेव स्फुरतो व्यवहारयोग्यत्वात्तद्वाचकशब्दैरात्मा लक्ष्यते इत्यर्थः । त्वं प्रमाता ऽर्थो यस्य शब्दस्य स त्वमर्थस्त्वंशब्द इति यावत् ॥ ९८ ॥

ननु त्वमहमादिपदानां प्रत्यङ्मात्रवाचित्वात्साक्षादेवात्मा ऽभि-

---

* गुणलेशेन = गुणसम्बन्धेन ।

† ब्राह्मणत्वादिजात्याद्यभावादित्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

पुनः साक्षादेवेति । विधूतसर्वकल्पनाकारणस्वाभाव्यादात्मनो ऽत आह—

> व्योम्नि धूम्रतुषाराभ्र-
> मलिनानीव दुर्धियः ।
> कल्पयेयुस्तथा मूढाः
> संसारं प्रत्यगात्मनि ॥ ६६ ॥

ननु सर्वकल्पनानामप्यात्मन्यत्यन्तासंभवे समाने ऽहंवृत्तौ कः पक्षपाते हेतुर्येन वृत्त्यन्तराणि विधूयाहंवृत्त्यैवात्मोपलक्ष्यतइत्युच्यते—

> चिन्निभेयमहंवृत्तिः*
> प्रतीचीवाऽऽत्मनो ऽन्यतः ।

धीयतां किं तत्र लक्षणाकल्पनयेति शङ्कते कस्मात्पुनर्हेतोरिति ॥ तत्र वाच्यवाचककल्पनानां कारणभूतगुणक्रियादीनां वस्तुतो ऽभावादिति श्लोकमवतारयन्परिहरति विधूतेति ॥ संसारशब्दप्रवृत्तिनिमित्तभूतं षष्ठ्यर्थिकमित्यर्थः ॥ ६६ ॥

नन्वहंकारस्येव देहघटादेरप्यात्मन्यधिष्ठाने कल्पितत्वाविशेषात्तद्वाचकैरपि शब्दैरात्मा कस्मान्न लक्ष्यतइत्याशङ्क्य श्लोकेनोत्तरमाह नन्वित्यादिना ॥ अहंवृत्तिर्ह्यात्मविवर्ततया तप्तायःपिण्डवच्चिन्मयी भवति । आत्मनो यदन्यत्तस्माच्चिद्व्यतिरिक्तपदार्थेभ्यः प्रतीचीव प्रत्यग्भूतेव भवति । यद्वा ऽऽत्मनः प्रत्यगात्मनः समनन्तरमन्यतो देहादिभ्यः प्रत्यग्भूतेव भवति । यद्वा स्वस्मादन्यतो ऽन्यस्मात्प्रतीचि

---

* अहंवृत्तिश्चिद्बिम्बग्राहकत्वेन तन्निभा भवतीत्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

पूर्वोक्तेभ्यश्च हेतुभ्य-
स्तस्मादात्मा ऽनयोच्यते ॥ १०० ॥

वृत्तिभिर्युष्मदर्थाभि-
र्लक्ष्यते चेद्‌ दृशिः परः ।
अनात्मत्वं भवेत्तस्य
वितथं च वचः श्रुतेः ॥ १०१ ॥

यथोक्तेन—

अनेन गुणलेशेन
ह्यत्यहंकर्तृकर्मया ।

प्रत्यगात्मनीव सर्वान्तरत्वं भवतीति यस्मात्तस्मा"दात्मना चाविनाभाव"मित्यादिपूर्वोक्तहेतुभ्यश्च तच्छब्दैरेवात्मा लक्ष्यतइत्यर्थः ॥ १००॥

विपक्षे दोषमाह वृत्तिभिरिति ॥ घटादिवृत्तिभिस्तदभिधानैश्चात्मनो लक्ष्यत्वे घटादिवदनात्मत्वस्यैव प्रतीतिप्रसङ्गाद्‌ ब्रह्मात्मत्वेन प्रतीतिर्न स्यात्तथा चाहं ब्रह्मास्मि तत्त्वमस्यादिवाक्यानामेकत्वप्रतिपादकानां वैयर्थ्यमपुरुषार्थपर्यवसायित्वं च स्यादित्यर्थः ॥ १०१ ॥

उक्तार्थनिगमनपरं श्लोकमाकाङ्क्षितपदं पूरयन्नवतारयति यथोक्तेनेति ॥ अहंकर्तारं प्रमातारं तत्कर्म च देहघटादिकमतीत्य या वर्तते कूटस्थनिर्भासा ऽहंवृत्तिस्तया, यद्वा ऽतिशये ऽनहंकर्तैव कर्म विषयो यस्यास्तया, ऽसौ प्रत्यगात्मा लक्ष्यते । अनात्मनि अञ्जसा साक्षादभिधा वाच्यत्वं यतो न संभवति तत इत्यर्थः । गुणलेशेनेति हेतौ तृतीया । ननु हेत्वभिधानमन्तरेणात्मनि नाभिधायकः शब्द इति न शक्यते वक्तुमित्याशङ्क्य शब्दप्रवृत्तिनिमित्तानां संबन्धादीना-

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

लक्ष्यते ऽसावहंवृत्त्या
नाञ्जसा ऽत्राभिधीयते* ॥ १०२ ॥

नाञ्जसा ऽत्राभिधीयत इति को हेतुरिति चेत्—

षष्ठीगुणक्रियाजाति-
रूढयः शब्दहेतवः ।
नात्मन्यन्यतमो ऽमीषां
तेनात्मा नाभिधीयते ॥ १०३ ॥

यदि शब्दो ऽभिधानाभिधेयत्वसंबन्धाङ्गीकारेण नात्मनि वर्तते, कथं शब्दादहं ब्रह्मास्मीति सम्यग्बो-

---

मात्मनि असंभवो हेतुरिति श्लोकेन परिहरति नाञ्जसात्राभिधीयतइत्यादिना ॥ १०२ ॥

षष्ठीति ॥ तद्वाच्यः संबन्ध इत्यर्थः । क्व चित् षष्ठ्यर्थः संबन्धः शब्दप्रवृत्तिनिमित्तं, यथा राजपुरुष इत्यादिः । क्व चिद् गुणयोगः, यथा शुक्लः पट इत्यादिः । क्व चित्क्रियायोगः, यथा पाचक इत्यादिः । क्व चिज्जातियोगः, यथा गौरश्वः पुरुष इत्यादिः । क्व चिद्रूढिः, यथा ऽऽकाशः, द्यौः, नक्षत्रम्, इत्यादिः । एतेषां शब्दप्रवृत्तिनिमित्तानामन्यतमस्यप्यात्मन्यसङ्गत्वा,दगुणत्वा,दविक्रियत्वा,दसामान्यत्वा,त्प्रमाणान्तरायोग्यत्वेनागृहीतसंबन्धत्वाच्चाभावान्नाभिधेय आत्मेत्यर्थः ॥ १०३ ॥

आत्मनः परमार्थतः पदेन वाच्यवाचकलक्षणसंबन्धाभावे पदविषयत्वाभावाद्वाक्यात्सम्यग्बोधोत्पत्तिर्न स्यादित्याशङ्क्य परिहरति

---

* साक्षात्पदेन न बोध्यन्तइत्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

थोत्पत्तिं, तच्यते—

असत्ये वर्त्मनि स्थित्वा
निरुपायमुपेयते ।
आत्मत्वकारणाद्विज्ञो
गुणवृत्त्या विबोधिताः ॥ १०४ ॥

कथं पुनरभिधानमभिधेयेनानभिसंबद्धं सदनभिधेये ऽर्थे प्रमां जनयतीति, शृणु । यथा ऽनभिसंबद्धमप्यनभिधेये ऽर्थे ऽविद्यानिराकरणमुखेन बोधयतीत्याह—

शयानाः प्रायशो लोके
बोध्यमानाः स्वनामभिः ।
सहसैव प्रबुध्यन्ते
तथैवं प्रत्यगात्मनि ॥ १०५ ॥

यदीत्यादिना ॥ असत्ये, आरोपितरूपे वर्त्मनि उपाये शबलात्मनि स्थित्वा, अवस्थाय निरुपायं, सत्ताप्रतीतौ साक्षादुपायरहितमात्मतत्त्वमुपेयते, प्राप्यते यथा शाखाग्रे चन्द्रो यथा रेखाभिः सत्यावर्णा इत्यर्थः । तथापि प्रमाणान्तरसिद्धस्य लोके लक्ष्यत्वदर्शनात् तस्य प्रमाणान्तरादसिद्धस्य लक्षणया ऽप्यवगतिर्नोपपद्यत इत्याशङ्क्यात्मत्वादेव हेतोः स्वप्रकाशतया सिद्धत्वाल्लक्षणावृत्त्या तदवगतिरुपपद्यते इत्याह आत्मत्वकारणादिति ॥ १०४ ॥

उपलक्षणस्योपेयेन सत्यसंबन्धरहितस्य बोधकत्वे ऽप्यभिधानस्यागृहीतसंबन्धस्य बोधकत्वं क्वापि न दृश्यत इति विशेषमाशङ्क्य संबन्धग्रहणमन्तरेणापि बोधकत्वं यथोच्यते तथा शृण्वित्याह कथं

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

न हि नाम्ना ऽस्ति संबन्धो
व्युत्थितस्य शरीरतः ।
तथाऽपि बुध्यते तेन
यथैवं तत्त्वमित्यतः ॥ १०६ ॥

यथा च—

पुनरित्यादिना ॥ यथा निद्रितः पुमानुत्तिष्ठ देवदत्तेत्यामन्त्रणशब्देनागृह्यमाणाभिधेयसंबन्धेनैव बोध्यमानः प्रबुध्यति तद्वत्तत्त्वमस्यादिना ऽप्यविद्यया निद्रितो न गृह्यमाणसंबन्धेनैव बोध्यमानः प्रबुध्यतइत्यर्थः ॥ १०५ ॥

ननु नामभिः पूर्वसंबन्धग्रहणमस्त्येव, तस्माद् गृहीतसंबन्धानामेव तेषां तत्रापि बोधकत्वमित्यत आह न हीति ॥ शरीराद् व्युत्थितस्य देहेन्द्रियाभिमानरहितस्य सुषुप्तस्य स्ववाचकशब्दश्रवणसंबन्धस्मरणयोरभावात्तद्भावे च सति शरीरसंबन्धे प्रतिबोधः प्रतिबोधे सति शरीरसंबन्धः, अथ वा प्रतिबोधे सति श्रवणं श्रवणाच्च प्रतिबोध इति परस्पराश्रयप्रसङ्गादस्मर्यमाणसंबन्धस्यैव बोधकत्वं सुषुप्तावङ्गीकर्तव्यम्। तस्माद्वाचकशब्दस्य वाच्यएव संबन्धज्ञानापेक्षा न लक्ष्ये। अन्यत्र गृहीतसंबन्धस्यापि गङ्गाशब्दस्य संबन्धग्रहणं विनैव तीरादौ बुद्धिजनकत्वप्रदर्शनादेवं शबलेपि गृहीतसंबन्धानामपि तत्त्वमस्यादिशब्दानां लक्षणया ऽखण्डैकरसपर्यवसायित्वं नानुपपन्नमिति भावः ॥ १०६ ॥

ननु भवत्वेवं शब्दादात्मनि ज्ञानोत्पत्तिस्तथा ऽपि निवर्त्यनिवर्तकाज्ञानज्ञानाश्रयत्वादात्मनः सविकारत्वं प्राप्तमित्याशङ्क्य दृष्टान्तेनैव तन्निराचष्टे यथा चेति ॥ अमूर्तत्वान्नीरूपमाकाशमिति

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

बोधाबोधौ नभो ऽस्पृष्ट्वा
कृष्णधीनीडगौ यथा।
बाध्येतरात्मकौ* स्यातां
तथेहात्मनि गम्यताम् ॥ १०७ ॥

असत्त्ववर्त्मनि स्थित्वेत्युपश्रुत्यातिविस्मितो मन्द-
ता संभ्रमेण कश्चिच्चोदयति—

नासन्नुपायो लोके ऽस्ति
परमार्थविनिश्चये।
नासल्लिङ्गादि बाष्पादेः
कश्चिदग्निं प्रपद्यते ॥ १०८ ॥

बोधो, नीलोत्पलदलवन्नीलमित्यबोध, तौ यथा नभो गगनमस्पृष्ट्वा विकारमकृत्वैव बाध्यबाधकौ स्याताम्। कथं तर्हि तयोरप्यन्तरेण विषयगतमतिशयं निवर्त्यनिवर्तकभावः स्यादित्याशङ्क्याह कृष्ण-धीनीडगाविति॥ कृष्णाकारा धीः कृष्णधीस्तस्या नीडमालम्बनं विष-य इति यावत् तद्गतौ तद्विषयौ नीरूपं रूपवच्चेति विरुद्धाकारा-कारितौ तावन्मात्रेणैव यथा निवर्त्यनिवर्तकौ भवतस्तथा ऽऽत्मान-मविकृत्यैव संसार्यसंसारीति बोधाबोधौ निवर्त्यनिवर्तकौ स्याता-मित्यर्थः॥ १०७॥

ननु यस्य स्वरूपं मिथ्या तस्य तत्प्रयुक्तकार्यकरत्वं नास्ति† यथा बा-ष्पधूमस्य धूमत्वाभावान्न तत्प्रयुक्ताग्निगमकत्वमेवं श्रुत्याचार्यादेस्त-

---

* बाध्येतरात्मकौ—बाध्यबाधकरूपौ।

† अर्थक्रियाकारित्वाभावादिति भावः।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

इत्येवं चोदयेद्यो ऽपि
योजयेत्तं* घटादिना ।
सदसद्भ्यां विभक्तो ऽसौ
पर्यायश्च न चानयोः ॥ १०९ ॥

एवं कुचोद्यमुन्मूल्याधेदानीं प्रकृतमभिधीयते ।

द्रूपेण मिथ्यात्वान्न तत्प्रयुक्तबोधहेतुत्वसंभव इति चोदयतीत्याह असत्ये वर्त्मनि स्थित्वेत्युपश्रुत्येत्यादिना ॥ १०८ ॥

परिहरति इत्येवमिति ॥ ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य घटपटादेः प्रपञ्चस्य मायामयत्वाङ्गीकारात्तस्यार्थक्रियाकारित्वे तवाप्यविवादात्तुच्छतायाश्च मयेव त्वया ऽप्यनङ्गीकाराद् घटादिनैव दृष्टान्तेन प्रीणातु भवानित्यर्थः । दृष्टान्तो ऽप्यसंप्रतिपन्न इति मन्वानं प्रत्याह सदसद्भ्यामिति ॥ न हि घटादिः सन्, नास्तीत्यपि दर्शनात्, नाप्यसन्, अभावप्रतियोगित्वात्, ततः सदसद्भ्यां विलक्षण इत्यर्थः । तर्हि क्रमेण सत्त्वमसत्त्वं चेत्याशङ्क्याह पर्यायश्च न चानयोरिति ॥ यस्मिन् धर्मिणि सत्त्वाऽसत्त्वयोः क्रमेण समावेश इष्यते तस्य सत्त्वे ऽसत्त्वे च न समावेशः संभवति वैयर्थ्यादिविरोधाच्च । उभयविलक्षणत्वे चानिर्वचनीयता बलादापतति बाष्पधूमादेस्त्वव्याप्तत्वादेवाऽगमकत्वं प्रमेयत्वादिवत् न त्वसत्यत्वा,दसत्यस्यापि प्रतिबिम्बवर्णदैर्घ्यादेर्गमकत्वदर्शना,त्सत्यस्यापि घटपटादेरव्याप्तस्य गमकत्वादर्शनाच्चेति भावः ॥ १०९ ॥

---

* जोषयेत्तं घटादिनेति पाठान्तरम् । जोषयेद्=विवदमानं तं तूष्णीं कुर्यादित्यर्थः । घटादिनेत्यस्य दृष्टान्तेनेति शेषः ।

१ कथं तावदगृहीतसंबन्धस्य शब्दस्य ज्ञानद्वारा ऽज्ञाननिवर्तकत्वमित्येवंरूपं दुराक्षेपमित्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

प्रकृतं चानभिधेये कथमभिधाश्रुतिरविद्याध्वंसं स्वा-ऽऽत्मनि ज्ञानं जनयतीति तत्रैव कारणान्तरमुच्यते—

अतिदुःस्थो ऽप्रबोधो ऽत्र
स्वात्मैवास्य प्रबुद्धता ।
निमित्तमात्राद्व्येत्येषा
नासाग्रे बदरं यथा ॥ ११० ॥

अनुदितानस्तमितकूटस्थबोधमात्रस्वाभाव्यादात्मनो दुःसंभाव्यो ऽविद्यासद्भाव इति चेन्न। अविद्याप्रसिद्धेरेव त-

---

वृत्तकीर्तनपूर्वकं वर्तिष्यमाणस्य तात्पर्यमाह एवमिति ॥ कारणान्तरमिति ॥ अविद्यानिरासिज्ञानोत्पादकशब्दशक्त्यालोचनया ऽगृहीतसंबन्धस्यापि निवर्तकत्वं पूर्वमुदितमिदानीं निवर्त्याविद्यास्वभावपर्यालोचनया तदुपपन्नमित्युच्यत इत्यर्थः । अतिदुःस्थतामेवोपपादयति आत्मैवेति ॥ अनुदितानस्तमितप्रकाशस्वभावे आत्मन्यबोधः स्वप्रकाशस्वभावे सवितरीव तमः प्रतिभासव्यतिरेकेण वस्तुतो नोपपन्नस्तेन यत्किंचिन्निमित्तमासाद्य नासाग्रस्थबदरमिव व्येति अपगच्छतीत्यर्थः ॥ ११० ॥

ननु तर्हि उक्तयुक्तिबलान्न भवेदात्मनि अविद्येति चोद्यमुद्भाव्य प्रसिद्धत्वेन तस्याः सद्भावापह्नवायोगान्नित्यपरतन्त्रतया प्रतीतेः स्वातन्त्र्यायोगाज्जडाश्रयत्वस्य च निरस्तत्वादहमज्ञो मामन्यं च न जानामीति प्रतिभासानुसारेणाऽऽत्माश्रयत्वमेष्टव्यमिति परिहरति अनुदितेत्यादिना ॥ उलूकनिशावदिति ॥ यथा प्रमाणतर्काभ्यां स्वप्रकाशस्वभावस्याह्नो रात्रित्वासंभवे ऽपि उलूकानामपरोक्षत्वादह्न एव रात्रित्वं तद्वत्प्रमाणतर्काभ्यामात्मन्यविद्यासद्भावाऽभावे ऽप्यपरो-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

त्सद्भावसिद्धिरुलूकनिशावत् । इत्यत इदमुच्यते—

अहो धार्ष्ट्यमविद्याया
न कश्चिदतिवर्तते ।
प्रमाणं वस्त्वनादृत्य*
परमात्मेव तिष्ठति ॥ १११ ॥

यस्मादविद्याप्रसिद्ध्यैवाविद्यासद्भावसिद्धिरत आत्मवस्तुवृत्तानुरोधेन न कथं चनापि तत्संभावनाप्यस्ति । यत आह—

ज्ञानं यस्य निजं रूपं
क्रियाकारकवर्जितम् ।
संभावनाऽप्यविद्यायास्तत्र स्यात्केन हेतुना ॥ ११२ ॥

सत्वाद्स्तीत्यभ्युपेयमित्यर्थः । धार्ष्ट्यमेवोपपादयति प्रमाणमिति ॥ प्रमाणं वस्तुवृत्तं चानपेक्ष्य स्वयमेव परमार्थवदवभासते तस्मादविद्याया धार्ष्ट्यं विद्वानीश्वरोऽपि नातिवर्तितुं शक्नोतीत्यर्थः ॥ १११ ॥

ननु प्रसिद्धिबलाच्चेदात्मन्यविद्याऽभ्युपेयते तर्हि प्रसिद्धेः सार्थकत्वाय वास्तव एव सद्भावः किं न स्यादित्याशङ्क्य युक्तिबलान्नैवमित्याह यस्मादित्यादिना ॥ ननु ज्ञानस्य जन्यत्वात्परिणामादिक्रियावत्त्वात् कथमात्मरूपत्वमित्यत आह क्रियाकारकेति ॥ ११२ ॥

---

* तदुक्तम् ।
अविद्याया अविद्यात्वे इदमेव तु लक्षणम् ।
यन्मानाघसहिष्णुत्वमसाधारणमिष्यते ॥ इति ।

† आरोपमात्रेणेति शेषः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सोऽयमेवमनुदितानस्तमितावगतिमात्रशरीर आत्मापि सन्नविचारितप्रसिद्धाविद्यामात्रव्यवहित एवातथेवेक्ष्यते यतोऽतः—

अनुमानादयं भावाद्
व्यावृत्तोऽभावमाश्रितः।
ततोऽप्यस्य निवृत्तिः स्या-
द्वाक्यादेव बुभुत्सतः॥ ११३॥

भाववदभावादपि निवृत्तिरनुमानादेव किमिति न भवतीति चेच्छृणु—

ननु भवत्वेवमविद्यासद्भावः प्रसिद्धिबलादात्मनि, तथाऽपि कथं तन्निवृत्तिरित्याकाङ्क्षायां पूर्वोक्तान्वयव्यतिरेकलक्षणानुमानोपकृतावाक्यादिति श्लोकं तात्पर्यकथनपूर्वकमवतारयति सोऽयमित्यादिना॥ पूर्वमात्मत्वेन गृहीताद् देहेन्द्रियात्मकाद्भावादन्वयव्यतिरेकलक्षणानुमानाद् व्यावृत्तो देहादेरात्मा न भवतीति विविक्तत्वेनाधिगतोऽयमात्मा भावरूपदेहादिभ्यो व्यावृत्तत्वेनाधिगतत्वादेवाभावमाश्रितोऽभावरूपतामिवापन्नो भवतीति शेषः। स्वरूपनिर्द्धारणाभावादतः सत्त्वेन प्रतिपन्नदेहादिभ्यो व्यावृत्तस्य कोऽस्मीति बुभुत्सोरस्य वाक्याद् ब्रह्मात्मत्वप्रतिपत्तौ सत्यां विशेषस्वरूपनिर्द्धारणादभावाद्व्यावृत्तिः स्यात् ततोऽन्वयव्यतिरेकसहकृताद्वाक्यादविद्यानिवृत्तेरित्यर्थः॥ ११३॥

ननु देहाद् व्यावृत्तिर्यथाऽनुमानात्सिध्यति तद्वदभावो नात्मा दृश्यत्वाद् देहादिवदित्यभावाद्व्यावृत्तिरप्यनुमानात्सिध्यति ततः कथमन्वयव्यतिरेकसहकृताद्वाक्यादात्माऽवगतिः स्यादित्युच्यतइति श-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

न व्यावृत्तिर्यथा भावा-
द्भावेनैवा*ऽविशेषतः ।
अभावादप्यभावत्वा-
द्व्यावृत्तिर्न तथेष्यते ॥ ११४ ॥

यतो नाऽनुमानेन व्याविद्धाशेषक्रियाकारकफला-
त्मनि स्वराज्ये ऽभिषेक्तुं शक्यते तस्मात्—

अविद्यानिद्रया सो ऽयं
प्रसुप्तो दुर्विवेकया ।
भावाभावव्युदासिन्या†
श्रुत्यैव प्रतिबोध्यते ॥ ११५ ॥

श्लोकत्तरत्वेन श्लोकमवतारयति भाववदित्यादिना ॥ भावाद्देहेन्द्रियाद्यात्मलक्षणाद्यथा ऽऽत्मनो व्यावृत्तिर्न भावत्वाकारेणैव भवति उभयोर्भावस्वभावत्वाऽविशेषात् किं तु दृष्टदृश्यादिचतुर्विधान्वयव्यतिरेकलक्षणानुमानबलादेव निश्चीयते एवमभावाद्देहाद्यात्मवैधुर्यादनुमानविषयीकृताद्व्यावृत्तिरनुमानेनैव न प्रतीयते अनुमानविनिश्चिताऽभावत्वादेव ततो भावाभावविलक्षणब्रह्मरूपत्वप्रतिपादकवाक्यादेवाऽभावव्यावृत्तिप्रतीतिरिति भावः ॥ ११४ ॥

फलितार्थमुपसंहरति यत इत्यादिना ॥ दुर्विवेकया प्रमाणान्तरेण निवर्तयितुमशक्ययेत्यर्थः ॥ ११५ ॥

---

* भावेनैव=भावत्वेनैवेति भावप्रधानो निर्देशो बोध्यः ।

† भावाभावव्युदासिन्या=भावाभावत्वान्यतररूपेण विवेक्तुमशक्यया । प्रपञ्चकारणतया भावरूपत्वस्य, नीरूपतया ऽभावरूपत्वस्य च प्राप्तेर्व्यामोहादनिर्वचनीयस्वरूपयेत्याविद्यानिद्रयेत्येतद्विशेषणम् ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

अत्राहानुदितानस्तमितविज्ञानात्मस्वरूपत्वाद् दुःसंभाव्या विद्येति । नैतदेवं कुतो यत आह—

कुतो ऽविद्येति चोद्यं स्या-
न्नैवं प्राग्वेत्त्वसंभवात् ।
कालत्रयापरिच्छित्ते*-
र्न चोर्ध्वं चोद्यसंभवः ॥ ११६ ॥

यस्मात्तत्त्वमस्यादिवाक्यमेवात्मनो ऽशेषामविद्यां निरन्वयामपनुदति तस्मात्—

अज्ञातममनादृत्य
प्रमाणं सदसीति ये ।
बुभुत्सन्तो ऽन्यतः कुयु-
स्ते ऽज्ञापि रसवेदनम् ॥ ११७ ॥

पूर्वोक्तमनवबोधमुद्भाव्य प्रकारान्तरेण परिहरति अत्राहेत्यादिना ॥ किमनुदितायां विद्यायामविद्या न संभवतीति चोद्य,मुतोदितायाम् । नाद्यस्तावदात्मनो ऽनुदितानस्तमितविज्ञानस्वभावतया ऽनवगमाविर्भूतेः कथमविद्येति चोद्याऽनवतारादविद्यानुभवविरोधाच्च । नापि द्वितीयः । आत्मन्यविद्या नासीदस्ति भविष्यतीत्यवगतेस्तादृगविद्यानुभवविरोधिन न चोद्यसंभवः ॥ ११६ ॥

प्रसंख्यानादीनां नाविद्यानिवर्तकत्वमित्युपसंहरति यस्मादित्यादिना ॥ अज्ञातमं साक्षादात्मतत्त्वप्रमितिसमर्थतया निश्चिततमं तत्त्वमस्यादिवाक्यमनादृत्य प्रसंख्यानादिना ऽऽत्मतत्त्वं ये ऽवगन्तुमि-

---

* असद्रूपत्वादेव शशशृङ्गादिवत् कालत्रये ऽप्यपरिच्छिन्नत्वादित्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

एवमप्रतिहतामहं ब्रह्मेति प्रमां तत्त्वमस्यादिवाक्यं कुर्वदपि न प्रतिपादयतीति चेदभिमतं न कृत्स्नेना-पि प्रतिपत्तिः स्यादत आह—

इदं चेदनृतं ब्रूया-
त्सत्यामवगतावपि ।
न चान्यत्रापि विश्वासो
ह्यवगत्यविशेषतः ॥ ११८ ॥

न चोपादित्सिताद्वाक्यार्थाद्वा वाक्यार्थान्तरं कल्प-यितुं युक्तं, यस्मात्—

च्छन्तः प्रवर्तन्ते ते चक्षुरिन्द्रियेण रसविशेषान्प्रतिपत्तुमिच्छन्तीत्य-र्थः* ॥ ११७ ॥

उक्तन्यायेन वेदान्तानां प्रामाण्योपपत्तावपि यदि वैयर्थ्यादप्रामा-ण्यं ब्रूयात्तर्हि कृत्स्नस्यापि वेदस्य प्रत्यक्षादेश्चाप्रामाण्यं स्यादित्य-तिप्रसङ्गमाह इदमिति ॥ तत्त्वमस्यादिवाक्यान्निश्चिततात्पर्याव-गतौ सत्यामपि यदि कश्चिदिदमनृतमप्रामाण्यं ब्रूयात्तस्यान्यत्रापि कृत्स्नवेदे प्रत्यक्षादौ चावगतौ सत्यामप्यविशेषाद्विश्वासो न स्या-त्ततश्च सर्वाप्रामाण्यं व्याहन्यतइत्यर्थः ॥ ११८ ॥

ननु न च वयमप्रामाण्यं वेदान्तानां ब्रूमः किं त्वहं ब्रह्मास्मीत्युपा-सीतेत्युपासनाविधिपरत्वेन प्रामाण्यमिति । तत्राह न चोपादित्सिता-दिति ॥ अवगतत्वंपदार्थस्य यदि वाक्याद्वाक्यार्थज्ञानं न जायते त-

---

* एवं च यथा चक्षुरिन्द्रियस्य रसप्रत्यक्षे न कारणत्वमेवमात्मसाक्षात्कारे प्र-संख्यानादेर्न कथमपि कारणत्वमित्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

न चेदनुभवोऽतः स्या-
त्पदार्थावगतावपि।
कल्प्यं विध्यन्तरं तत्रा
न ह्यन्योऽर्थोऽवगम्यते॥ ११८॥

न च यथाऽभिमतोऽर्थो यथोक्तेन न्यायेन नावसीयते। कोऽसौ न्याय इत्याह—

नामादिभ्यो निराकृत्य
त्वमर्थं निष्परिग्रहः।
निःस्पृहो युष्मदर्थेभ्यः
शमादिविधि*चोदितः॥ १२०॥

दा विधिपरत्वं कल्प्यं, न चैतदस्ति। विज्ञातपदार्थस्याधिकारिणो वाक्यात्प्रमित्युत्पत्तेः। उक्तन्यायेन मुख्यार्थसंभवे विधेः कल्पयितुमशक्यत्वाच्च न विधिपरत्वेन प्रामाण्यं वाच्यमित्यर्थः। इतश्च न विधिपरत्वं कल्पनीयमित्याह तत्र न ह्यन्योर्थ इति॥ तत्त्वमस्यादिवाक्यप्रकरणे विधिपदाश्रवणादित्यर्थः॥ ११८॥

कथं तर्हि पदार्थावगतिहेतुतया वाक्यार्थप्रतिपत्त्युपयोगी न्यायः इति दर्शयितुं न्यायस्य तावत्तात्पर्यावसायकत्वमस्तीत्याह न चेति॥ प्रश्नपूर्वकं श्लोकद्वयमवतारयति कोसाविति॥ नामादिभ्यः प्राणान्तेभ्यश्छान्दोग्योपनिषत्प्रदर्शितेभ्य आत्मानं विविक्ततया अधिगम्याऽहंमानं वर्जयित्वा ममत्ववर्जनाच्च निष्परिग्रहः क्षेत्रपुत्रादिपरिग्रहः रहितो युष्मदर्थेभ्यो विस्पृहस्तदुपभोगं तृष्णावर्जितः शमाद्यधिका-

---

* शान्तो दान्त उपरतस्तितिक्षुरित्यादिश्रुतेरित्यर्थः।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

भङ्क्त्वा चान्नमयादींस्तान्
पञ्चानात्मतया ऽर्गलान्* ।
अहं ब्रह्मेति वाक्यार्थं
वेत्ति चेन्नार्थ ईहया† ॥ १२१ ॥

न चेदेवमभ्युपगम्यते वाक्यस्य प्रमाणस्य सतो ऽप्रामाण्यं प्राप्नोति । तदाह—

यदर्थं च प्रवृत्तं य-
द्वाक्यं तच्च न चेच्छ्रुतम् ।
प्रमामुत्पादयेत्तस्य
प्रामाण्यं केन हेतुना‡ ॥ १२२ ॥

अथ मन्यसे—

रिविशेषणसंपन्नस्तैत्तिरीयकोपनिषत्प्रतिपादितान्नमयादिपञ्चकोशेष्वहंममाभिमानहीनः क्षपितसमस्तप्रतिबन्धतया ब्रह्मात्मतां प्रतिपद्यते चेत्किं तत्रोपासनादिव्यापारेण कृत्यमित्यर्थः ॥ १२० ॥ १२१ ॥

एवमुक्ताधिकारिणो वेदान्ताः प्रमितिमुत्पादयन्तीत्युक्त,मिदानीं तदनङ्गीकारे तेषामप्रामाण्यं प्रसज्येतेति दोषमाह न चेदेवमित्यादिना ॥ १२२ ॥

ननु भवतु प्रामाण्यं तथापि तत्प्रसंख्यानविधिपरत्वेनैवेति शङ्कां दर्शयतीत्याह अथ मन्यस इति ॥ उत्तरमाह शब्द इति ॥ अन्यप-

* स्वरूपप्राप्तिप्रतिबन्धकान् ।

† ईहया=उपासनादिरूपव्यापारेण ।

‡ अध्येतव्य इत्यध्ययनविधेरर्थज्ञानपर्यन्ततया ऐक्यबोधकवाक्यस्य प्रमाऽजनकत्वे तस्याऽध्ययनविधेश्चाप्रामाण्यप्रसङ्ग इत्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

जानीयाच्चेत्प्रसंख्याना-
च्छब्दः सत्यवचाः कथम् ।
पारोक्ष्यं शब्दो नः प्राह
प्रसंख्यानात्त्वसंशयम् ॥ १२३ ॥

न च युक्तिशब्दावृत्तिलक्षणात्प्रसंख्यानाद्यथावत्प्रतिपत्तिर्भविष्यतीति संभावयामः । यस्मात्—

युक्तिशब्दौ पुरा ऽप्यस्य
न चेदकुरुतां प्रमाम् ।
साक्षादावर्तनात्ताभ्यां
किमपूर्वं फलिष्यति ॥ १२४ ॥

अथैवमपि प्रसंख्यानमन्तरेण प्रमाणान् धारयितुं न

रस्य वाक्यस्य प्रत्यक्षादिविरोधाद्द्वितीये ब्रह्मणि प्रामाण्यं न स्यादित्यर्थः । पुनः पूर्ववाद्याह पारोक्ष्यमिति ॥ शब्दः संसृष्टपरोक्षार्थविषयत्वान्नापरोक्ष्यहेतुः शब्दयुक्त्यभ्यासरूपं तत्प्रसंख्यानं निर्विचिकित्सं ब्रह्मात्मत्वं साक्षादनुभावयिष्यतीति भावः ॥ १२३ ॥

तदुत्तरत्वेन श्लोकमवतारयति न च युक्तीति ॥ युक्तिशब्दौ यदि पूर्वमपरोक्षप्रमां न कुरुतः परोक्षप्रमामेव कुरुतः पश्चात्कथमभ्यासात्तां कुर्वीयातां परोक्षतया ऽनुमानाधिगतवह्न्यादावभ्यासादापरोक्ष्यादर्शनादित्यर्थः ॥ १२४ ॥

नन्वावृत्तिरसकृदुपदेशात्*दिति सूत्रकारेण शब्दयुक्त्यभ्यासरूपप्रसंख्यानस्य स्वीकृतत्वान्न तदन्तरेण वाक्यं बोधकमिति शङ्कित्वा

---

* व्याससूअ० ४ । पा० १ । सू० १ ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

शक्नोषीति चेच्छ्रवणादावेव संपादयिष्यामः । कथम्—

प्रसंख्यानं श्रुतावस्य
न्यायो ऽस्त्वाम्रेडनात्मकः* ।
ईषच्छ्रुतं सामिश्रुतं†
सम्यक् श्रुत्वा ऽवगच्छति ॥ १२५ ॥

ननु प्रसंख्यानविधिमनभ्युपगच्छतः पारमहंसी चर्या बौद्धादिचर्यावदशास्त्रपूर्विका प्राप्नोति ततश्चारूढपतितत्वं न च स्यात्,‡ अशेषकर्मणां च निवृत्तिर्न प्राप्नोतीत्युच्यते—

ऽस्य ब्रह्मात्मवस्तुनो ज्ञानसाधनश्रवणमननादावेवावृत्तिः सूत्राभ्युपगता तत्रापाततो ऽभिगतशब्दयुक्तीनामावृत्तिव्यतिरेकेण सम्यक् स्वरूपावधारणाभावादावृत्तेरुपयोगो न तु श्रवणादिसाध्यविज्ञानइति परिहरति यथैवमित्यादिना ॥ १२५ ॥

ननु मुमुक्षोर्नित्यनैमित्तिकविधिप्रापितकर्मप्रवृत्तीनामनभ्युपगमात्प्रसंख्यानविध्यनभ्युपगमाच्च वैधस्य प्रवृत्त्यन्तरस्याप्यभावात्तदर्थतया नित्यनैमित्तिककर्मपरित्यागस्य वक्तुमशक्यत्वात्पाषण्डचर्या§वन्निर्मूलैव परमहंसचर्या स्यादिति शङ्कते नन्विति ॥ उत्पन्नविवेकेनानुष्ठितस्याचारस्याशास्त्रीयत्वे को दोष इत्याशङ्क्याह ततश्चेति ॥ सकलश्रुतिस्मृतिपुराणेषु प्रसिद्धमारूढपतितत्वं न सिध्यतीत्यर्थः ।

---

* आम्रेडनात्मकः=अभ्यासरूपः ।

† सामिश्रुतम्=अर्धश्रुतम् । इति श्रवणक्रमोक्तिः ।

‡ आरूढपतितत्वं च स्यादिति पाठान्तरम् ।

§ पाखण्डचर्यावदिति पु० पाठः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

त्वमर्थस्यावबोधाय
विधिरभ्याश्रितो यतः ।
तमन्तरेण ये दोषा-
स्ते ऽपि नायान्त्यहेतवः ॥ ११६ ॥

इति श्रीमत्पूज्यपादसुरेश्वराचार्यकृतनैष्कर्म्यसिद्धि-संबन्धोक्तौ तृतीयो ऽध्यायः ॥ ३ ॥

आरूढपतितत्वं च स्यादिति पाठे विधिपरिप्रापितसकलकर्मपरित्यागादारूढपतितत्वं स्यादित्यर्थः । किञ्च प्रसंख्यानविध्यनभ्युपगमे नित्यनैमित्तिककर्मनिवृत्तिर्न सिध्यतीत्याह अश्रेषेति ॥ प्रसंख्यानविध्यभ्युपगमे ऽनवरतमनन्यचित्ततया ज्ञानाभ्यासात्तद्विरुद्धनित्यनैमित्तिककर्मणां निवृत्तिर्भवति तदनभ्युपगमे तु "यावज्जीवमग्निहोत्र"मित्यादिश्रुतिचोदितकर्मणो ऽनुष्ठेयत्वात्सर्वकर्मसंन्यासस्यावसर एव नास्तीत्यर्थः । एतदुक्तत्वेन श्लोकमवतारयति उच्यतइति ॥ त्वंपदार्थविवेकाय श्रवणादिविधेरभ्युपगमात्तदङ्गत्वेन च सर्वकर्मसंन्यासस्य श्रुतिस्मृत्योर्विहितत्वान्नोक्ताशास्त्रीयत्वादिदोषप्रसक्तिरित्यर्थः ॥ ११६ ॥

इति श्रीज्ञानोत्तममिश्रविरचितायां नैष्कर्म्यसिद्धिचन्द्रिकायां तृतीयो ऽध्यायः ॥ ३ ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अथ चतुर्थोऽध्यायः ॥

नमः परस्मै ॥

पूर्वाध्यायेषु यद्वस्तु
विस्तरेणोदितं स्फुटम् ।
संक्षेपतोऽधुना वक्ष्ये
तदेव सुखवित्तये* ॥ १ ॥
संक्षेपविस्तराभ्यां हि
मन्दोत्तमधियां नृणाम् ।
वस्तूच्यमानमेत्यन्तः-
करणं तेन भण्यते ॥ २ ॥
आत्माऽनात्मा च लोकेऽस्मिन्
प्रत्यक्षादिप्रमाणतः ।

परमात्मने नमः ॥

एवं प्रथमद्वितीयतृतीयाध्यायैः क्रमेण समन्वयाविरोधवाक्यार्थज्ञानसाधनानि विचार्य चतुर्थाध्यायेन फलविचारं प्राधान्येनारभमाण एव संक्षेपतः पूर्वाध्यायत्रयस्यार्थ उक्त इत्यतः प्राक्तनस्य ग्रन्थस्यातीताध्यायत्रयेण पौनरुक्त्यं परिहरति पूर्वाध्यायेष्विति ॥ १ ॥

ननु विस्तरेणोक्तमपि न प्रतिपद्यते चेत्कथं संक्षिप्योक्तं सुखं प्रतिपद्येरन्नित्यत आह संक्षेपविस्तरेति ॥ २ ॥

---

* सुखवित्तये=सुखावबोधाय ।

DR. RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

सिद्धस्तयोरनात्मा तु
सर्वत्रैवात्मपूर्वकः ॥ ३ ॥
अनात्मत्वं स्वतःसिद्धं
देहाद्भिन्नस्य वस्तुनः ।
ज्ञातुरप्यात्मता तद्व-
न्मध्ये संशयदर्शनम् ॥ ४ ॥
असाधारणांस्तयोर्धर्मान्
ज्ञात्वा धूमाग्निवद्बुधः ।
अनात्मनोऽथ बुद्ध्यन्तान्
जानीयादनुमानतः ॥ ५ ॥

संदिग्धे न्यायः प्रवर्तत इति न्यायात्संदिग्धस्यैव विचार्यत्वात्तत्परिशोधयितुमविप्रतिपन्नमर्थं तावद्दर्शयति आत्मेति ॥ ननु प्रत्यक्षादिप्रमाणैरनात्मैव सिद्धो न पुनरात्मेत्याशङ्क्य द्रष्टृसिद्धिव्यतिरेकेण दृश्यस्यासिद्धेर्मैवमित्याह तथापीति ॥ किंलक्षणौ तर्ह्यात्मानात्मानौ प्रसिद्धावित्याह अनात्मत्वमिति ॥ दृश्या घटादयोऽनात्मानो द्रष्टैवात्मेति प्रसिद्धमित्यर्थः । कुत्र तर्हि संशय इत्याह मध्य इति ॥ घटादेः प्रत्यगात्मनश्चान्तराले शरीरेन्द्रियादौ कतमो द्रष्टेति वादिविप्रतिपत्तेः संशय इत्यर्थः ॥ ३ ॥ ४ ॥

कथं तर्हि निर्णय इत्याह असाधारणानिति ॥ द्रष्टृत्वाजडत्वादयो ह्यात्मनोऽसाधरणा धर्माः, दृश्यत्वजडत्वादयस्त्वनात्मधर्मास्तान् ज्ञात्वा धूमेनाग्निमिव देहादीन् बुद्ध्यन्तान् दृश्यत्वादिलिङ्गकानुमानैरनात्मनो जानीयादित्यर्थः ॥ ५ ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

इदमित्येव बाह्ये ऽर्थे
ह्यहमित्येव बोद्धरि ।
द्वयं दृष्टं यतो देहे
तेनायं मुह्यते* जनः ॥ ६ ॥

केन पुनर्न्यायेना† त्मानात्मनोरश्वमहिषयोरिव विभागः क्रियतइत्युच्यते—

न्यायः पुरोदितो ऽस्माभि-
रात्मानात्मविभागकृत् ।
तेनेदमर्थमुत्सार्य‡
ह्यहमित्यत्र यो भवेत् ॥ ७ ॥

मध्ये संशयदर्शनमित्युक्तं किं तत्र संशयकारणमित्यत्राह इदमिति ॥ इदमित्येव घटादिबाह्यविषये बुद्धिर्भवति अहमित्येव ज्ञातरि बुद्धिः शरीरे तु ममेदं शरीरमहं मनुष्य इति च बुद्धिद्वयमुपलभ्यते तेन संशयो जायतइत्यर्थः ॥ ६ ॥

किं पुनस्तन्निर्णयकारणमित्याकाङ्क्षायां द्रष्टृदृश्यादिचतुर्विधान्वयव्यतिरेकलक्षणो न्यायः पूर्वाध्यायेषूपपादित इत्याह केन पुनरित्यादिना ॥ तेनेदमिति ॥ इदमनिदंरूपसंभिन्ने ऽहंकारे य इदमंशस्तं दृश्यत्वादिहेतुभिरनात्मतयोत्सार्य यः परिशिष्टो ऽनिदमंशस्तमात्मानमुक्तलक्षणं तत्त्वमसीति वाक्याज्जानीयादित्यर्थः ॥ ७ ॥

---

* आत्मानात्मविवेकशून्यो भवतीत्यर्थः ।

† न्यायेन=प्रमाणेन, कारणेनेति यावत् ।

‡ उत्सार्य, भागत्यागलक्षणयेत्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

विद्यात्तत्त्वमसीत्यस्मा-
द्भावाभावदृशं सदा ।
अनन्तरमबाह्यार्थं
प्रत्यक्स्थं मुनिरञ्जसा* ॥ ८ ॥

उच्यतां तर्हि कया तु परिपाट्या† वाक्यार्थं वेत्तीति। उच्यते, अन्वयव्यतिरेकाभ्याम्—

त्यक्त्वाहमस्त्वेदमर्थत्वात्
त्यक्तो ऽहमिति मन्यते ।
नावगच्छाम्यहं यस्मा-
न्निजात्मानमनात्मनः ॥ ९ ॥

विद्यादिति ॥ ८ ॥‡

कस्तर्हि वाक्यार्थप्रतिपत्तौ क्रम इत्याकाङ्क्षायां प्रथममन्वयव्यतिरेकाभ्यां बुद्ध्यादीननात्मत्वेनोत्सार्य ततो विविक्तं प्रत्यगात्मानं तस्माच्चिण्मधिगम्य वाक्याद् ब्रह्मात्मतां प्रतिपद्यतइति क्रममभिप्रेत्याह उच्यतामित्यादिना ॥ वाक्यापेक्षायां कारणं दर्शयितुमाह त्यक्त्वाहमस्त्वेति ॥ पूर्वं देहादेर्बुद्ध्यन्तस्याहमित्यात्मत्वेन गृहीतस्यान्वयव्यतिरेकाभ्यामनात्मतया परित्यक्तत्वादहमात्मापि परित्यक्त इति मुमुक्षुर्मन्यते कुतो यतो ऽनात्मनः सकाशान्निष्कृष्य नि-

---

* भावाभावदृशं=साक्षिस्वरूपम् । अनन्तरं=विभेदकधर्मशून्यम् । अबाह्यार्थं=देहादिभिन्नम् ।

† परिपाट्या=क्रमेण ।

‡ सुगमत्वाद् व्याख्याकृता न व्याख्यातो ऽयं श्लोक इति भाति ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अथ शरीरादिबुद्धिपर्यन्तः स* सर्वोऽनात्मैवेति प्रमाणाद्विनिश्चित्य किमिति बुभुत्सातो नोपरमते, शृणु—

अनुच्छिन्नबुभुत्सश्च
प्रत्यग्वेतोरनात्मनः† ।
दोलायमानचित्तोऽयं
मुह्यते भीतवन्नरः ॥ १० ॥

अविलुप्तविज्ञानात्मन आत्मत्वादेव नित्यसांनिध्यात् बुभुत्सुः किमिति न प्रतिपद्यत इति । यस्मात्—

यैरद्राक्षीत्पुराऽऽत्मानं
यमनात्मेति वीक्षते ।

जनाकारं नाहमवगच्छामि तस्मादहं नष्टोऽस्मीति मन्यते तत्तत्त्वनिर्धारणाय बुभुत्सोर्वाक्यापेक्षेत्यर्थः ॥ ६ ॥

उक्तमेवार्थं प्रश्नपूर्वकं विशदयति अथेत्यादिना ॥ अनुच्छिन्ना बुभुत्सा बोद्धुमिच्छा यस्य स तथोक्तः । तत्र हेतुः प्रत्यग्वेतोरिति ॥ अनात्मनः सकाशात्प्रत्यगात्मनः प्रतिपत्तिहेतोः प्रतिपत्त्यर्थमिति यावत् । भीतः, भूतोपनिगृहीतो भ्रान्तस्तद्वदित्यर्थः ॥ १० ॥

नन्वात्मनः स्वसत्ताप्रयुक्तप्रकाशत्वाद्देशादिव्यवधानाभावाच्च नाप्रकाशो युक्तस्तत्कथं बुभुत्सानुपरम इति शङ्कते अविलुप्तेति ॥ तदुत्तरत्वेन श्लोकमवतारयति यस्मादिति ॥ यैश्चक्षुरादिभिः करणैर्विवेकोद-

---

* स इति न दृश्यते ४ पुस्तके ।

† अनात्मनोऽहङ्कारादेः । प्रत्यग्वेतोः=प्रत्यक्त्वादित्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

दृष्टेर्द्रष्टारमात्मानं
तैः प्रसिद्धैः प्रमित्सति ॥ ११ ॥

कस्मात्पुनर्हेतोः पराचीनाभिः शब्दाद्यवलोकिनीभिर्बुद्धिभिरात्मानमनात्मवन्न वीक्षते इत्युच्यते—

चक्षुर्न वीक्षते शब्द-
मतदात्मत्वकारणात् ।
यथैवं भौतिकी दृष्टि-
र्नात्मानं परिपश्यति ॥ १२ ॥

प्रत्यक्षादिप्रमाणस्वाभाव्यानुरोधेन तावत्तद्दर्शनकारणमुक्तम् । अथ प्रमेयस्वाभाव्यानुरोधेन प्रतिषेध उच्यते—

धीविक्रियासहस्राणां
हानोपादानधर्मिणाम् ।

यात्पूर्वं देहादिलक्षणमात्मानमद्राक्षीद् यमिदानीं विवेकोदये सत्यमात्मेति मन्यते तमद्राक्षीदित्यन्वयः । तैः प्रसिद्धैः करणैः प्रमातुरपि साक्षिणं प्रमातुमिच्छति यस्मात्तस्मान्न प्रतिपद्यत इति संबन्धः ॥ ११ ॥

इन्द्रियाणामनात्मविषयत्वे कारणं प्रश्नपूर्वकं दर्शयति कस्मादित्यादिना ॥ यथा चक्षुः शब्दं न पश्यति अतदात्मत्वकारणादशब्दगुणप्रकृतिकत्वाद्, एवं भौतिकान्तःकरणजनितं विज्ञानमन्तःकरणाप्रकृतिकमात्मानं न पश्यतीत्यर्थः ॥ १२ ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

सदा साक्षिणमात्मानं
प्रत्यक्त्वान्नाहमीक्षते ॥ १३ ॥

क्व पुनरियं विवेकबुद्धिः किमात्मन्युताऽनात्मनीति। किं चातः। यद्यात्मनि कूटस्थत्वव्याघातो ऽनात्मदर्शित्वात्, अथाऽनात्मनि तस्याप्यचैतन्यान्न विवेकसंबन्ध इत्युच्यते। दाह्यदाहकतैकत्वेत्युक्तपरिहारात्—

बुद्धावेव विवेको ऽयं
यदनात्मतया भिदा।
बुद्धिमेवोपमृद्नाति
कदलीं तत्फलं यथा* ॥ १४ ॥

नाहमीक्षतइति ॥ आत्मनः समस्तबुद्धिवृत्तिभावाभावसाक्षितया ऽविषयत्वेन प्रत्यक्त्वादहमन्तःकरणं विषयिणं न पश्यतीत्यर्थः† ॥ १३ ॥

एवं द्रष्टृदृश्यादिविवेकेनात्मानात्मविवेको दर्शितः। सेयं विवेकबुद्धिः किमाश्रयेत्याक्षिप्य समाधत्ते क्व पुनरित्यादिना ॥ अनात्मदर्शित्वादनात्माकारज्ञानपरिणामाश्रयत्वाङ्गीकारादित्यर्थः। दाह्यदाहकतैकत्वेति। "दाह्यदाहकतैकत्र यथा स्याद्वह्निदारुणोः" रित्यत्राहंकारात्मनोराध्यासिकतादात्म्यादहंकारस्याचेतनस्यापि ज्ञातृत्व-

---

* यथा तावत्कदलीफलं स्वोत्पत्त्या स्वकदल्युभयनाशकमेवं बुद्धिवृत्तेरपिस्वपरोभयनाशकत्वसंभव इत्यर्थः।

† तदग्रहणे हि आत्मनो विकारित्वं प्रसज्येत, विकारित्वे च स्वविकारसाक्षित्वं न संभवतीति भावः।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सोऽयमतत्त्वे तत्त्वदृक्—
अनुमानप्रदीपेन
हित्वा सर्वाननात्मनः।
संसारैकावलम्बिन्या
तद्भावं धियेष्यति ॥१५॥

योऽयमन्वयव्यतिरेकजो विवेक आत्माऽनात्मविभा-

मुपपादितं तेनाहंकारपरिणामलक्षणं विवेकज्ञानमात्मन्यध्यारो-प्यते तस्मान्नात्मनः कूटस्थत्वव्याघात नापि केवलाचेतनस्य ज्ञा-नाश्रयत्वमित्यर्थः। विशिष्टाश्रयोपि विवेकज्ञानपरिणामो बुद्ध्यु-पादानकत्वाद्बुद्धिगत एवात्मन्यध्यारोप्यते परमित्याह बुद्धाविति॥ यदनात्मतया यस्याः अनात्मतया आत्मनः सकाशाद्भेदो ऽवग-म्यते तस्यामेव बुद्धौ विवेक इत्यर्थः। कथं तर्हि तत्परिणामस्य तन्नि-वर्तकत्वमित्यत आह बुद्धिमेवेति॥ १४॥

एवं तर्हि यथोक्तविवेकेनैव बुद्ध्यादिद्वैतप्रपञ्चस्य निवर्तितत्वा-त्किं वाक्येनेत्यत आह सोऽयमित्यादिना॥ आत्माऽनात्मनोर्यौ भेदे-तरेतराभावौ तावप्यद्वैतविपरीतरूपत्वादतत्त्वमतस्तथाभूताविवे-कधीरपि भ्रान्तिरेव द्वैतलक्षणसंसारैकाऽवलम्बनत्वात्। न वाक्या-र्थज्ञानं विना तयैव भेदेतरेतराभावावलम्बनया न संसारनिवृत्ति-रिति भावः॥ १५॥

ननु वाक्येनाप्यनात्माकारपरिहारेणाऽऽत्मनो ऽसाधारणा-कारसमर्पणमेव क्रियते* नाधिकमिवमन्वयव्यतिरेकाभ्यामप्यना-त्मपरिहारेणाऽऽत्माऽसाधारणस्वरूपपरिग्रहणात्तत एव मुक्तिः किं न स्यात्किं वाक्येनेत्याशङ्क्याह योऽयमिति॥ यद्यपि देहाद्य-

---

* विक्रियते इति १ पु० पाठः।

www.astrology-tantra.com
DR.RUPNATHJI(DR.RUPAK NATH)

गतत्वाणो ऽनात्मस्थः स्थाणौ संशयावबोधवत् प्रतिपत्तव्यो ऽयथावस्तुस्वाभाव्यान्मृगतृष्णिकोदकप्रबोधवदित्यत आह—

संसारबीजसंस्थो ऽयं
तद्धिया मुक्तिमिच्छति ।
शशो निमीलनेनेव
मृत्युं परिजिहीर्षति ॥ १६ ॥

अस्यार्थस्य दृढिम्ने श्रुत्युदाहरणम्—

इममर्थं* पुरस्कृत्य
श्रुत्या सम्यगुदाहृतम् ।

नात्माकारपरिहारेणान्वयव्यतिरेकाभ्यामात्मा समर्प्यते तथाप्यनात्मभ्यो भेदेन समर्प्यमाणेऽहेदस्य चाखण्डैकरसप्रत्यगात्मस्वभावत्वाभावात्तद्विषयं ज्ञानं संशयविपर्यासज्ञानवदात्माऽसाधारणस्वभावावलम्बनं न भवति तेन वाक्यजमद्वैतज्ञानमेव मुक्तिहेतुर्न विवेकज्ञानमित्यर्थः । संसारबीजमिति ॥ संसारबीजमज्ञानं तत्संस्थ एव विवेकदर्शी भेदज्ञानस्याज्ञानजन्यत्वादेवंविधस्तद्धिया संसारगोचरया विवेकदृष्ट्या मुक्तिमिच्छति । सो ऽयं नयननिमीलनेन मृत्युं परिजिहीर्षति यः शश इव भवति अतद्धेतुमेव तद्धेतुं मन्यत इत्यर्थः ॥ १६ ॥

एवं द्वैतग्राहकप्रत्यक्षादिप्रमाणाविषयत्वमात्मनस्तर्केणोपपाद्य तस्य प्रशिथिलमूलत्वपरिहाराय प्रमाणमुदाहर्तुमाह अस्येति ॥

---

* इममर्थम्=वाक्यमेवाज्ञाननिवर्तकं नान्यदित्येतद्रूपम् ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

यच्चक्षुषेति विस्रब्धं
न दृष्टेरिति च स्फुटम् ॥ १७ ॥
बुद्ध्यन्तमपविद्धैवं
कोन्वहं स्यामितीच्छितुः ।
श्रुतिस्तत्त्वमसीत्याह
सर्वमानातिगामिनी ॥ १८ ॥

एष संक्षेपतः पूर्वाध्यायत्रयस्यार्थ उक्तः सो ऽयं न्याय्योपि वेदान्तार्थः शास्त्राचार्यप्रसादलभ्यो ऽप्यनपेक्षितशास्त्राचार्यप्रसादो ऽनन्यापेक्षसिद्धस्वभावत्वात्कैश्चिच्छद्मधानैर्न प्रतीयते, तेषां संग्रहार्थमभिमतप्रामाण्योदाहरणम्—

"यच्चक्षुषा न पश्यति" "न दृष्टेर्द्रष्टारं पश्ये"रित्यादिश्रुत्या सर्वप्रमाणानामविषयत्वमात्मनो दर्शितमित्यर्थः ॥ १७ ॥

यदि प्रत्यक्षाद्यगम्यं केन तर्हि प्रमाणेनावसीयतइत्यत आह बुद्ध्यन्तमिति ॥ एवं पूर्वोक्तान्वयव्यतिरेकाभ्यामनात्मनो निराकृत्य को ऽहमित्यात्मस्वरूपविशेषबुभुत्सोः श्रुतिः सर्वमानान्यतीत्य तदगोचरं वस्त्वधिगन्तुं शीलमस्या अस्तीति सर्वमानातिगामिनी तद् ब्रह्म त्वमसीति विशेषस्वरूपमवगमयतीत्यर्थः ॥ १८ ॥

वृत्तकीर्तनपूर्वकं वर्तिष्यमाणग्रन्थस्य तात्पर्यमाह एष इत्यादिना ॥ एवं वेदान्तार्थो न्यायोपेतो ऽपि शास्त्राचार्यप्रसादलभ्यो ऽपि अनपेक्षितशास्त्राचार्यप्रसादः स्वगुर्वनुग्रहप्राप्तवेदान्तार्थसंप्रदायो न भवत्यनन्यापेक्षसिद्धस्वभावत्वात्केवलं स्वम-

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

भगवत्पूज्यपादैश्च
उदाहार्यैवमेव तु ।
सुविस्पष्टो ऽस्मदुक्तोर्थः
सर्वभूतहितैषिभिः । १६ ॥

किं परमात्मन उपदेश उतापरमात्मन इति । किंचाऽतो यदि परमात्मनस्तस्योपदेशानन्तरेणैव मुक्तत्वान्निरर्थक उपदेशो ऽथापरमात्मनस्तस्यापि स्वत एव संसारस्वभावत्वान्निष्फल उपदेशः । एवमुभयथापि दोषवत्त्वात् । अतआह—

नीषिकामात्रपरिकल्पितत्वादिति गुरुसंप्रदायावगतवेदान्तार्थश्रद्धालुभिः कैश्चिन्न प्रतीयते न संगृह्यते । ततस्तेषां बुद्धिसंग्रहायाभिमतप्रामाण्यस्याचार्यस्य वाक्यं मर्यादाक्रियतइत्यर्थः । यद्वा वेदान्तार्थो ऽविद्यादशायां शास्त्राद्यधीनो ऽपि विद्योत्तरकालं स्वानुभवसिद्धत्वादनपेक्षितशास्त्राचार्यसंप्रसाद एव तथापि गुरुसंप्रदायावगतवेदान्तार्थश्रद्धालुभिर्गुरुसंप्रदायदर्शनं विना न निश्चीयते ततस्तेषां संग्रहायोदाहरणमित्यर्थः । अथ वा वेदान्तार्थो न्याय्यो ऽपि शास्त्राचार्यप्रसादलभ्यो ऽप्यनन्यापेक्षसिद्धस्वभावत्वादनपेक्षशास्त्राचार्यप्रसादलभ्य एवेति श्रद्दधानैः कैश्चिद्गुरुसंप्रदायदर्शनं विना न निश्चीयते ऽतस्तेषां संग्रहाय तत्प्रदर्शनं क्रियतइत्यर्थः ॥ १६ ॥

इदानीमुपदेशसहस्र्यां भगवत्पादाचार्यैः पूर्वपक्षत्वेनोक्तमर्थमुदाहरति किं परमात्मन इति ॥ एतदुत्तरत्वेन भाष्यकारीयमेव

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अविविच्योभयं वक्ति
श्रुतिश्चेत्स्याद्‌ ग्रहस्तया ।
इति पक्षमुपादाय
पूर्वपक्षं निशात्य च* ॥ २० ॥

तच्चेदमविवेकात्स्वतो विविक्तात्मने तत्त्वमसीत्युपदिष्टम्—

वचनं दर्शयति अविविच्येति ॥ उभयमिदमनिरूपमात्मानात्मलक्षणं वस्त्वविविच्याध्यस्यान्तःकरणकञ्चुकं परिधायाहमिति व्यवस्थितं प्रत्यगात्मानमुद्दिश्य यदि तत्त्वमसीत्युपदिशेच्छास्त्रं तथा सति उपदेशः संभवतीति स्वीकारः स्यात्केवलाऽनात्मनः केवलपरमात्मनश्चोपदेशासंभवस्य दर्शितत्वात्तौ पक्षौ पूर्वपक्षत्वेन निराकृत्य इमं च पक्षं सिद्धान्तत्वेन स्वीकृत्य भगवत्पूज्यपादैरुदाहारीति संबन्धः । तदित्थं क्व पुनरियं विवेकबुद्धिरिति पूर्वपक्षीकृत्य दाह्यदाहकतैकत्वेति न्यायेन बुद्धावेव विवेकोऽयमिति यदस्माभिरुक्तं तदेतद्भाष्यकारैरपि निदर्शितमिति भावः ॥ २० ॥

एवं “ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावे”दित्यादिवाक्यतात्पर्यपर्यालोचनया परमात्मन एवान्तःकरणकञ्चुकस्य तदविविक्तस्योपदेश इति दर्शितम् । तर्ह्यात्माऽनात्मविवेकाऽन्वयव्यतिरेकौ व्यर्थाविव्यागङ्क्याह तच्चेदमिति ॥ स्वतो वाक्यप्रवृत्तेः प्रागेवाऽन्वयव्यतिरेकाभ्यां कार्यकारणसंघातादिविक्तो विवेचित आत्मा यस्य तस्मै तदिदं ब्रह्मात्मतत्त्वं तत्त्वमसीत्युपदिष्टं तस्मादन्वयव्यतिरेकयोर्न वैयर्थ्यमित्यर्थः । तर्ह्यन्वयव्यतिरेकाभ्यामेव विमुक्तत्वात्किमर्थमुप-

---

* निशात्य=निरस्येत्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

युष्मदस्मद्विभागज्ञे
स्यादर्थवदिदं वचः ।
यतोऽनभिज्ञे* वाक्यं स्याद्
बधिरेष्विव गायनम् ॥ २१ ॥

तस्य च युष्मदस्मद्विभागविज्ञानस्य का युक्तिरुपायभावं प्रतिपद्यते । शृणु—

अन्वयव्यतिरेकौ हि
पदार्थस्य पदस्य च ।
स्यादेतदहमित्यत्र
युक्तिरेवावधारणे† ॥ २२ ॥

कथं तौ‡ युक्तिरित्याह—

देश इत्यत आह अविवेकादिति ॥ अविवेकस्यानवबोधस्याज्ञानस्य स्थितत्वात्तन्निराकरणार्थोपदेश इत्यर्थः । विपक्षे दोषमाह यतोऽनभिज्ञ इति ॥ पदार्थाऽनभिज्ञस्य वाक्यं वाक्यार्थबोधकं न स्यादित्यर्थः ॥ २१ ॥

अन्वयव्यतिरेकौ पदपदार्थविवेककारणमिति यदस्माभिरुक्तं तदपि भगवत्पादाचार्यैः प्रदर्शितमित्याह तस्य चेति ॥ पदपदार्थयोरन्वयव्यतिरेकाभ्यामेतदिदमनात्मरूपमहमात्मेत्यस्मिन्नवधारणे युक्तिरुपायः स्यादित्यर्थः । यद्वैतदहंकाररूपमेतत्साक्षिरूपमित्येतस्मिन्नवधारणे युक्तिः स्यादित्यर्थः ॥ २२ ॥

---

* जडाजडविभागाऽनभिज्ञे ।

† युक्तिः=अनुकूलस्तर्क इत्यर्थः ।

‡ तौ=अन्वयव्यतिरेकौ ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

नाद्राक्षमहमित्यस्मिन्
सुषुप्ते ऽन्यन्मनागपि ।
न वारयति दृष्टिं स्वां*
प्रत्ययं तु निषेधति ॥ २३ ॥
एवं विज्ञातवाक्यार्थे†
श्रुतिलोकप्रसिद्धितः ।
श्रुतिस्तत्त्वमसीत्याह
श्रोतुर्मोहापनुत्तये ॥ २४ ॥

आगमापायितदवध्यन्वयव्यतिरेकावपि पदार्थविवेकोपायत्वेनाऽस्मदुक्तावाचार्यैरपि दर्शिताविति दर्शयति कथमिति ॥ अहमिदानीमस्मिन् सुषुप्ते नात्मनो ऽन्यत्किंचिदद्राक्षमिति सुषुप्तादुत्थितः परामृशन्स्वात्मभूतां दृष्टिं न निवारयति परामर्शापेक्षितपूर्वानुभवरूपत्वेन तत्र स्थितत्वात्, किं तु घटपटादिविषयप्रत्ययमेव निषेधति तेनात्मैवाऽव्यभिचारी अनात्मा तु व्यभिचारीत्युक्तलक्षणाऽन्वयव्यतिरेकौ दर्शिताविव्यर्थः । अत्रेति पाठे आत्मन्यस्मिन्काले वेत्यर्थः ॥ २३ ॥

इत्थं कृतान्वयव्यतिरेकस्य वाक्यमेवैकत्वप्रतिपादकं नान्यदिति यदुक्तं तदाचार्यैरप्युक्तमित्याह एवमिति ॥ न हि द्रष्टुरित्यादिश्रुतिलोकप्रसिद्धिद्वारेण विज्ञातवाच्यार्थे विविक्तज्ञातवाच्यार्थे ऽनात्मनिरासेनावगतवाच्यार्थ इत्यर्थः । विज्ञातवाक्यार्थ इति पाठे विज्ञातपदार्थ इत्यर्थः ॥ २४ ॥

---

* स्वाम्=स्वीयाम् ।

† विज्ञातवाक्यार्थे इति पाठान्तरम् ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

तत्र त्वमिति पदं यत्र लक्षणया वर्तते सोऽर्थ उच्यते—

अहंशब्दस्य या निष्ठा
ज्योतिषि प्रत्यगात्मनि ।
सैवोक्ता सदसीत्येवं
फलं तत्र विमुक्तता ॥ २५

अन्यश्चान्वयव्यतिरेकोदाहरणम्—

छित्त्वा त्यक्तेन हस्तेन
स्वयं नात्मा विशेष्यते ।

पदार्थस्यैव वाक्यार्थत्वात्त्वंपदलक्षणमपि यथोक्तमाचार्यैरपि दर्शितमित्याह तत्रेति ॥ अहंशब्दस्यात्मवाचकस्य प्रत्यगात्मज्योतिषि लक्षणया या निष्ठा पर्यवसानं* सैवोक्ता सदसीत्यपि वाक्ये विवक्षिता । त्वंपदार्थात्तत्पदलक्ष्यस्य न भेदोऽस्तीत्यर्थः । फलत्वादप्येकत्वएव श्रुतेस्तात्पर्यमाह फलं तत्रेति ॥ अथ वा ऽहं ब्रह्मास्मीत्यत्राहंशब्दस्य लक्ष्यं वस्तु तदेव तत्त्वमसीत्यत्र त्वंपदलक्ष्यमित्याह अहंशब्दस्येति ॥ एवमहंशब्दलक्ष्ये वस्तुनि त्वंपदलक्ष्ये सति किं फलमित्यपेक्षायामाह फलं तत्रेति ॥ २५ ॥

आत्मानात्मविवेकायान्वयव्यतिरेकौ प्रकारान्तरेणापि दर्शितावाचार्यैरुत्तरश्लोकपञ्चकस्य तात्पर्यमाह अन्यश्चेति ॥ छित्त्वा त्यक्तेनेति । यथा छित्त्वा त्यक्तेन हस्तेन स्वयमात्मा शोभनहस्तो विरूपहस्त इति वा पूर्वं तेन विशिष्यमाणोऽपि न विशिष्यते तथा विशिष्टेन सर्वेण येन येन स्थूलदेहसमवायिना श्रोत्रादिना सूक्ष्म-

---

* लक्षणया तद्बोधकत्वमित्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

तथा श्लिष्टेन सर्वेण
येन येन विशेष्यते ॥ २६ ॥
विशेषणमिदं सर्वं
साध्वलङ्करणं यथा ।
अविद्याध्यस्तमतः सर्वं
ज्ञातआत्मन्यसद्भवेत् ॥ २७ ॥
तस्मात्त्यक्तेन हस्तेन
तुल्यं सर्वं विशेषणम् ।
अनात्मत्वेन तस्माद्ध ज्ञो
मुक्तः सर्वविशेषणैः ॥ २८ ॥
ज्ञातैवात्मा सदा ग्राह्यो
ज्ञेयमुत्सृज्य केवलः ।

देहसमवायिना च दुःखित्वादिना पूर्वं विशेष्यते तेन तेनापि न विशेष्यत इत्यर्थः ॥ २६ ॥

ननु किमिति न तेन विशेष्यत इत्याशङ्क्य विशेषणानामविद्याध्यस्तत्वेनासत्त्वादित्याह विशेषणमिदमिति ॥ यथा सुवर्णादिलक्षणमलंकरणं देहाद्व्यतिरिक्तस्य देहाद्यध्यासवशादध्यस्तं तथैव तदपि सर्वं विशेषणमात्मनि यतोऽविद्याध्यस्तमतः शास्त्राचार्यप्रसादादहं ब्रह्मास्मीति विज्ञातआत्मन्यसद्भवेदित्यर्थः ॥ २७ ॥

यस्मादविद्याध्यस्तं तस्मात् त्यक्तहस्तवदनात्मैव सर्वं विशेषणं तस्मादात्मा निरस्तसमस्तविशेषण इत्याह तस्मात्त्यक्तेनेति ॥ २८ ॥

ननु विशेषणानां व्यभिचारित्वादनात्मत्वं चेत्कस्तर्ह्यात्मेत्या-

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

अहमित्यपि यद्ग्राह्यं
व्यपेताङ्गसमं हि तत् ॥ २९ ॥
दृश्यत्वादहमित्येष
नात्मधर्मो घटादिवत् ।
तथाऽन्ये प्रत्यया ज्ञेया
दोषाश्चात्माऽमलो ह्यतः ॥ ३० ॥

सर्वन्यायोपसंग्रहः—

नित्यमुक्तत्वविज्ञानं
वाक्याद्भवति नान्यतः ।

शङ्क्य व्यभिचारिसर्वविशेषणसाक्षित्वेन यः सर्वदा ऽन्वितः स सर्वसाक्षी सर्वविशेषणपरित्यागेनात्मेति ग्राह्य इत्याह ज्ञातैवेति ॥ केवलो निरवयवः । नन्वात्मनः सर्वविशेषणवर्जितत्वमनुपपन्नमहमिति विशेषपुरस्कारेणैव सर्वैर्ग्रहणादित्यत आह अहमित्यपीति ॥ अहमित्यपि सर्वैर्यद् ग्राह्यमहंरूपं व्यपेताङ्गसमं त्यक्तहस्तादिसमं सुषुप्त्यादौ व्यभिचारात्समस्तविशेषणवर्जित आत्मेत्यर्थः । २९ ॥

एवं व्यभिचारित्वेनाहङ्कारादीनां छिन्नहस्तवदनात्मत्वमतद्विशेषणत्वं चाभिधाय दृश्यत्वादप्यनात्मत्वमनात्मधर्मत्वं च तेषामाचार्यैर्नान्यदित्यन्यत्प्रकरणे दर्शितमित्याह दृश्यत्वादिति ॥ अहमित्येष तत्परिणामवानहङ्कारोनाऽऽत्मधर्मो दृश्यत्वाद् घटादिवदिति । तथैवाऽन्ये परिणामप्रत्ययाः सुखदुःखादयो दोषाः रागादयश्चेति तथा ज्ञेयाः दृश्यत्वान्नात्मधर्मा इति ज्ञेया इत्यर्थः ॥ ३० ॥

पुनरपि भगवत्पूज्यपादाचार्यैरस्मदुक्तो न्यायस्तत्त्वमसिप्रकरणे-

DR.RUPNATHJI (DR.RUPAK NATH)

www.astrology-tantra.com

वाक्यार्थस्यापि विज्ञानं
पदार्थस्मृतिपूर्वकम् ॥ ३१ ॥
अन्वयव्यतिरेकाभ्यां
पदार्थः स्मर्यते ध्रुवम् ।
एवं निर्दुःखमात्मान-
मक्रियं प्रतिपद्यते ॥ ३२ ॥
सदेवेत्यादिवाक्येभ्यः
प्रमा स्फुटतरा भवेत् ।
दशमस्त्वमसीत्यस्मा-
द्यथैवं प्रत्यगात्मनि ॥ ३३ ॥

प्रदर्शितसमस्तन्यायोपसंहारैः पञ्चभिः श्लोकैः प्रदर्शित इत्याह सर्व-न्यायेति ॥ नित्यमुक्तत्वेति ॥ अहं ब्रह्मास्मीत्यपरोक्षानुभवो वाक्या-त्तत्त्वमस्यादिलक्षणाद्भवति नान्यतः प्रसंख्यानाद्यनुष्ठानादिभ्यः* । वाक्यार्थस्य प्रमितेः पुष्कलकारणमाह वाक्यार्थस्येति ॥ अखण्ड-द्वयापरोक्षवाक्यार्थज्ञानं ब्रह्मात्मरूपं तत्त्वंपदार्थस्मरणपूर्वकं भवि-तुमर्हति ॥ ३१ ॥

तत्त्वंपदार्थस्मरणञ्च पूर्वोक्तान्वयव्यतिरेकाभ्यां वृद्धव्यवहारानुसा-रेण भवतीत्यर्थः ॥ एवमुक्तप्रकारेण सर्वविशेषणरहितमात्मानं वाक्यादहं ब्रह्मास्मीति प्रतिपद्यतइत्याह एवमिति ॥ ३२ ॥

कथं वाक्यात्प्रतिपद्यतइत्यत आह सदेवेति ॥ "सदेव सोम्येद-मग्रआसी"त् "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिवाक्येभ्यो ऽवगतं ब्रह्म यदा तत्त्वमसीत्याचार्यो बोधयेत्तदा विविक्तपदार्थस्याहं ब्रह्मास्मीति प्रमि-

---

* निदिध्यासनादिभ्य इत्यर्थः ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

वीक्षापन्नस्योदाहरणम्—

नवबुद्ध्यपहाराद्धि
स्वात्मानं दशपूरणम् ।
अपश्यन् ज्ञातुमेवेच्छेत्
स्वमात्मनं जनस्तथा ॥ ३४ ॥

अविद्याबद्धचक्षुष्ट्वात्
कामापहृतधीः सदा ।
विविक्तं दृशिमात्मानं
नेक्षते दशमं यथा ॥ ३५ ॥

तिर्जायत इत्यर्थः । अत्र दृष्टान्तमाह दशमस्त्वमसीति ॥ यथा दशमो ऽसीति वाक्याद् स्वात्मन्यहं दशमो ऽस्मीति स्फुटा प्रमितिर्भवत्येवं तत्त्वमसीति वाक्यान्मुमुक्षोः प्रत्यगात्मनि ब्रह्मस्वरूपे ऽहं ब्रह्मास्मीति प्रमितिर्भवतीत्यर्थः ॥ ३३ ॥

यदस्माभिस्तृतीये ऽध्याये वीक्षापन्नस्य को ऽस्मीत्याद्यभिहितं यच्च नवसंख्याहृतज्ञान इत्युदाहरणपूर्वकमपविद्धयोरप्येवमिति दार्ष्टान्तिकमुक्तं तदपि न स्वोत्प्रेक्षामात्रमाचार्यैरपि दर्शितत्वादित्याह वीक्षापन्नस्येति ॥ नवैव वयमिति संख्याभिनिवेशादपहृतदशमज्ञानो जनः स्वव्यतिरिक्तान्नव पुरुषान्वीक्षमाणो ऽपि यथा विभ्रमादात्मानं दशसंख्यापूरकमजानानो वेदितुमिच्छति तथा ऽविद्याप्रतिबद्धसम्यग्दर्शनो विषयाभिष्वङ्गलक्षणकामेन विषयाभिमुखमपहृतचित्तः समस्तद्वैतनिर्मुक्तं सर्वसाक्षिणमपरोक्षमात्मानं दशममिव न प्रतिपद्यत इति श्लोकद्वयार्थः ॥ ३४ ॥ ३५ ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सोऽयमेवमविद्यापटलावगुण्ठितदृष्टिः सन् कथमुत्थाप्यतइत्याह—

यथा स्वापनिमित्तेन*
स्वप्नदृक् प्रतिबोधितः ॥
करणं कर्मकर्त्तारं
स्वाप्नं नैवेक्षते स्वतः ॥ ३६ ॥
अनात्मज्ञस्तथैवायं
सम्यक् श्रुत्याऽवबोधितः ।
गुरुं शास्त्रं तथा मूढं
स्वात्मनोऽन्यन्न पश्यति† ॥ ३७ ॥

नन्वेवमविद्याबद्धसम्यग्दर्शनस्य श्रुत्यादिदर्शनकारणानि किं सत्यानि उताऽसत्यानि, सत्यत्वे अद्वैतव्याघातः । असत्यत्वे च न सम्यग्दर्शनकारणमित्याशङ्क्योत्तरश्लोकाभ्यां दृष्टान्तप्रदर्शनपुरःसरं परिहारमाह सोयमित्यादिना ॥ यथा स्वप्नदृक् चोरव्याघ्रादिकस्य स्वाविद्यापरिकल्पितस्य दर्शननिमित्तभयवशात्सहसा प्रतिबुद्धः स्वप्नदशायां स्वाज्ञानकल्पितं कारणादिकं स्वतो विलक्षणं नेक्षते तथा अनाद्यविद्यानिद्रापरवशः स्वाविद्यापरिकल्पितश्रुत्याचार्यादिवशादहमस्मि परं ब्रह्मेति प्रतिबुद्धः स्वातिरिक्तं श्रुत्याचार्यादिकं न पश्यति तेन श्रुत्याचार्यादेरविद्याविवर्तत्वान्नाद्वैतव्याघातः । नापि विद्यानुदयः । तथा श्रुतिभ्योऽपि विद्योदयस्य दर्शितत्वादिति भावः ॥ ३६ ॥ ३७ ॥

---

* स्वप्ननिमित्तेनेति पाठान्तरम् ।

† सर्वस्य स्वात्मनि कल्पितत्वात् स्वातिरिक्तं न पश्यतीत्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

स किं सकलसंसारप्रविविक्तमात्मानं वाक्यात्प्रतिपद्यते उत नेतीत्यत्र ब्रूमः। कूटस्थावगतिमात्रशेषत्वात्प्रतिपत्तेरत आह—

दण्डावसाननिष्ठः स्या-
द्दण्डसर्पो यथा तथा।
नित्यावगतिनिष्ठं स्या-
द्वाक्याज्जगदसंशयम्॥ ३८॥

ननु भवत्वेवं बोधोत्पत्तिस्तथापि किं प्रपञ्चाद्भेदेन ब्रह्माऽवबोध्यते उताऽभेदेन। आद्ये अद्वैतव्याघातो, द्वितीये च सप्रपञ्चत्वमित्याशङ्क्य प्रपञ्चस्यात्मन्यविद्याध्यारोपितत्वान्न ततो भेदेन नाप्यभेदेनासौ बोध्यते किं त्वन्वयव्यतिरेकाभ्यां भावपरिहारेण तावन्मात्रतयेति दृष्टान्तेन दर्शयति स किमित्यादिना॥ कूटस्थावगतिशेषमात्रत्वात्प्रतिपत्तेरिति॥ कूटस्थावगतिरेव यथा शिष्यते तावन्मात्रैव प्रतिपत्तिर्न पुनः प्रपञ्चभावाऽभावाऽवलम्बिनीत्यर्थः। दण्डावसाननिष्ठः स्यादिति॥ दण्डरूपेणावसानं पर्यवसानं तदेव निष्ठा काष्ठा यस्य दण्डे परिकल्पितसर्पस्य स तथोक्तः। न हि तत्र सर्पस्य दण्डे भावरूपता, बाध्यत्वात्। नापि तत्राभावः। कल्पितसर्पस्य प्रतियोगित्वेन ह्यभावत्वात्*। तदेवमन्वयव्यतिरेकाभ्यां भावपरिहारेण यथा सर्पस्य दण्डतावन्मात्रत्वं तथा जगतोऽप्यवगतिरूपब्रह्ममात्रत्वमित्यर्थः॥ ३८॥

---

* अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वेनाप्रसिद्धप्रतियोगिकाभावस्यानङ्गीकारादित्यर्थः।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

कुत एतत्, यस्मात्-
पश्यन्तीति यदाह्नोचैः
प्रत्यक्षमजमद्वयम्।
अपूर्वानपरानन्तं
त्वमा तदुपलक्ष्यते ॥ ३८ ॥
तत्त्वमस्यादिवाक्योत्थ-
विज्ञानेनैव बाध्यते।
यस्मात्—

उक्तेऽर्थे हेतुपरत्वेनोत्तरश्लोकमवतारयति कुत एतदिति ॥ यस्मा-दित्ययं शब्दस्त्वमा तदुपलक्ष्यत इत्यनेन संबध्यते। "यद्वै तन्न पश्यति पश्यन्वैतन्न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविना-शित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति यो ऽस्तसमस्तद्वैतकूटस्थदृष्टिमात्मानं सुषुप्त्यवस्थायां दर्शयति तदेवा-पूर्वादिलक्षणं वस्तु त्वमैव लक्ष्यते यस्मात्तस्मात्तद्विपरीतं द्वैतमा-त्माविद्याध्यारोपितं विद्यया निवर्त्यमानमात्ममात्रावशेषं नि-र्वर्त्यत इति भावः ॥ ३८ ॥

निरस्तसमस्तद्वैतं वस्तु सुषुप्त्यवस्थायां स्वत एव सिद्धं चेत्किं त-त्त्वमस्यादिवाक्यजन्यविज्ञानेन, तेन विनापि तस्य सिद्धत्वादित्या-शङ्क्याह तत्त्वमस्यादीति ॥ यस्मादविद्या पूर्वोक्तन्यायेन तत्त्वमस्या-दिवाक्योत्थविज्ञानेनैव बाध्यते तस्मादविद्यानिवृत्तये वाक्यमपेक्ष-णीयमित्यर्थः। ननु यद्यविद्यानिवृत्तिस्तत्त्वमस्यादिवाक्योत्थवि-ज्ञानेनैव क्रियते कथं तर्हि निर्विशेषं वस्तु सुषुप्त्यवस्थायां सिद्धमि-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

अस्माद्यदपरं रूपं
नास्तीत्येव निरूप्यते ।
अन्यथाग्रहणाभावाद्
बीजं तत्स्वप्नबोधयोः ॥ ४० ॥

अस्यार्थस्य दृढिम्ने उदाहरणम्—

कार्यकारणबद्धौ ता-
विष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु
द्वौ तौ तुर्ये* न सिध्यतः ॥ ४१ ॥

ति "न तु तद्द्वितीयमस्ती"त्यादिश्रुत्योच्यत इत्याशङ्क्याह अस्माद्यदपरमिति ॥ सुषुप्तिदशायामन्यथाग्रहणाभावाद् द्वैतरूपजाग्रत्स्वप्नयोरभावादस्मात्प्रज्ञातादात्मनोऽपरं रूपं नास्तीति न तु तद्द्वितीयमस्तीत्यादिश्रुत्या निरूप्यते न तु तत्कारणस्याग्रहणस्याभावात् । तच्चाग्रहणं स्वप्नप्रबोधयोर्बीजं तत्रास्त्येव, तेन तन्निवर्तकं वाक्यमपि सार्थकमित्यर्थः ॥ ४० ॥

वाक्यश्रवणे सत्येवाऽग्रहणं निवर्तते ततः प्राक् सुषुप्ते तन्निवृत्तिर्नास्तीति यदुक्तं तत्र प्रमाणत्वेन गौडपादीयवाक्यमुदाहरति अस्येत्यादिना ॥ कार्यमन्यथाग्रहणं कारणं तत्त्वाग्रहणं ताभ्यां बद्धौ संगृहीतौ जाग्रत्स्वप्नाभिमानिनौ विश्वतैजसौ, प्राज्ञः पुनः सुषुप्त्यभिमानी कारणेनैव तत्त्वाग्रहणेनैव बद्धः । द्वावप्येतौ कार्यकारणबद्धौ तुर्यावस्थायां न सिद्ध्यतो न संभवत इत्यर्थः ॥ ४१ ॥

---

* द्वौ तु तुर्ये इति पाठान्तरम् ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

योऽविकारो विजानाति
परागेवास्य तत्तमः ॥ ४५ ॥

यत एतदेवमतस्तस्यैव बीजात्मनस्तमसश्चित्तधर्मविशिष्टस्य स्वकार्यद्वितीयाभिसंबन्धो न त्वविकारिण आत्मन इत्याह दृष्टान्तेन—

रूपप्रकाशयोर्यद्व-
त्संगतिर्विक्रियावतोः* ।
सुखदुःखादिसंबन्ध-
श्चित्तस्यैवं विकारिणः ॥ ४६ ॥

तदेतदन्वयव्यतिरेकाभ्यां दर्शयिष्यन्नाह—

त्योस्तत्परतन्त्रत्वादेवेति भावः ॥ ४५ ॥

ननु सुखदुःखादिसंबन्धवदज्ञानसंबन्धोऽप्यात्मनः किं न स्यादित्याशङ्क्याविकारित्वादेवात्मनः सुखदुःखसंबन्धासंभवान्नैवमिति दृष्टान्तेन दर्शयति यत एतदेवमित्यादिना ॥ आत्मा विकाररहित एव जानाति यतस्तच्चित्ताख्यपरिणामविशिष्टस्यैवाज्ञानस्य द्वितीयसम्बन्धो न त्वात्मनस्तस्य त्वज्ञानजनितचित्तोपाधिद्वारा भवति न तु स्वभावत इत्यर्थः । रूपप्रकाशयोरिति ॥ सुखदुःखादिसंबन्धोऽपि विक्रियावत एव भवितुमर्हति संबन्धत्वाद् रूपप्रकाशसंबन्धवदित्यर्थः ॥ ४६ ॥

सति चित्तसंबन्धे सुखदुःखादिसंबन्धो नास्तीत्युक्तमर्थमन्वयव्यतिरेकाभ्यां दर्शयितुमुत्तरश्लोक इत्याह तदेतदिति ॥ संप्रसादे सु-

---

* प्रकाश्यप्रकाशकभावसंबन्धरूपविकारं प्राप्तयोः ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

संप्रसादे विकारित्वा-
दस्तं याते* विकारिणि ।
पश्यतो नात्मनः किञ्चिद्
द्वितीयं स्पृशते ऽण्वपि ॥ ४७ ॥

सोयं कूटस्थज्ञानमूर्त्तिरात्मा—

यथा प्राज्ञे तथैवायं
स्वप्नजागरितान्तयोः ।
पश्यन्नप्यविकारित्वाद्
द्वितीयं नैव पश्यति ॥ ४८ ॥

एवं ज्ञानवतो नास्ति
ममाहंमतिसंश्रयः† ।

सुप्तिसमये विकारिणि चित्ते ऽस्तं याते सति आत्मनो ऽविकारित्वात्कूटस्थदृष्टित्वात्पश्यतो ऽपि तस्यात्मनो नाण्वपि द्वितीयं स्पृशति नात्मना संबध्यत इत्यर्थः ॥ ४७ ॥

संप्रसाद इति विशेषणादितरावस्थयोर्द्वितीयसंबन्धो ऽभिमत इत्याशङ्क्य तयोरप्यवस्थयोः परमार्थतस्तत्संसर्गाभावं दर्शयति सोयमित्यादिना ॥ प्राज्ञावस्थायामिव स्वप्नजागरितयोरप्यात्मनो द्वितीयसंसर्गो नास्तीत्यर्थः । अत्रान्तःशब्दः स्वरूपवचनः ॥ ४८ ॥

अवस्थात्रयेपि कूटस्थ आत्मेति विजानतः फलमाह एवमि-

---

* अस्तं याते=स्वकारणात्मना प्रविलीने इत्यर्थः ।

† ममाहंमतिसंश्रयमिति पाठान्तरम् ।

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

भास्वत्प्रदीपहस्तस्य
ह्यन्धकार इवाग्रतः ॥ ४९ ॥

तत्र दृष्टान्तः—

आ प्रबोधाद्यथा सिद्धि-
र्द्वैतादन्यस्य वस्तुनः ।
बोधादेवमसिद्धत्वं
बुद्ध्यादेः प्रत्यगात्मनः ॥ ५० ॥

स एष विद्वान् हानोपादानशून्यमात्मानमात्मनि पश्यन्—

सर्वमेवानुजानाति
सर्वमेव निषेधति ।
भेदात्मलाभो ऽनुज्ञा स्या-
न्निषेधो ऽतत्स्वभावतः ॥ ५१ ॥

ति ॥ ममाहमिति ॥ यदिदं ज्ञानद्वयमन्तःकरणाश्रयं तदेवंविदो नास्तीत्यर्थः ॥ ४९ ॥

आ प्रबोधादिति ॥ द्वैतादन्यवस्तुविषयबोधपर्यन्तं द्वैतसिद्धिर्यथा तथा बाधकबोधोदयादूर्ध्वं तस्यासिद्धिर्युक्तैवेत्यर्थः । यद्वा बोधात्पूर्वं यथा द्वैतादन्यस्याद्वितीयवस्तुनो ऽसिद्धिरेवं बोधादूर्ध्वं प्रत्यगात्मना संबन्धासिद्धिरित्यर्थः ॥ ५० ॥

विदुषो ऽनुभवप्रकारमिदानीं दर्शयति स एष इति । कथमेतद्विरुद्धमभिधीयत इत्यत आह भेदात्मेति ॥ व्यवहारदृष्ट्या द्वैतप्रपञ्चस्य स्वरूपलाभो ऽनुज्ञा, तत्त्वदृष्ट्या तदभावो निषेध इत्यर्थः* ॥ ५१ ॥

---

* एवं च व्यवहारकाले ऽपि विदुषो द्वैतदृष्ट्यभावान्नानुपपत्तिरिति भावः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सर्वस्योक्तत्वादुपसंहारः—

परमार्थात्मनिष्ठं य-
त्सर्ववेदान्तनिश्चितम् ।
तमोऽपनुद्धियां* ज्ञानं
तदेतत्कथितं मया ॥ ५२ ॥

एतावदिहोक्तम्—

नेहात्मविन्मदन्योऽस्ति
न मत्तोऽज्ञोऽस्ति कश्चन ।

इदानीं प्रकरणमुपसंहरति सर्वस्येति ॥ सर्ववेदान्तनिश्चितं स्वान्ताऽन्धकारनिवर्तकं यज्ज्ञानं परमार्थवस्तुविषयं तदेतदस्मिन्प्रकरणे मया कथितं नातः परं ज्ञातव्यमवशिष्यत इत्यर्थः ॥ ५२ ॥

सांख्यानामिव नानात्मवादशङ्कानिरासार्थं पुनरपि संगृह्योक्तमर्थं दर्शयति एतावदिति ॥ विजानातीत्युक्ते ज्ञानपरिणामित्वं प्राप्तमित्यत आह अजानन्निति ॥ अपरिणामिना कूटस्थचैतन्येनैवानुभवतीत्यर्थः । यद्वा स्वात्मानं विजानाति चेत्तस्य कर्मत्वं कर्तृत्वं च स्यादिति विशिनष्टि अजानन्निति ॥ वृत्तिज्ञानात्कर्मत्वेनाजानन्नपि स्वरूपचैतन्येन स्वयंप्रकाशतया ऽनुभवतीत्यर्थः । सोपाधिकचैतन्यानामुपाधिप्रधानत्वादुपाधिभेदवदेव परिकल्पिततया ज्ञानाज्ञानाश्रयत्वायोगादपास्तसमस्तोपाधेरहैतचैतन्यस्यैव मम तदाश्रयत्वमिति भावः । इह लोके मत्तो ऽन्यः कश्चिदात्मविषयाज्ञानाश्रयो नास्ति नापि तद्विषयज्ञानाश्रयः, किं त्वहमेक एव ज्ञानाज्ञा-

---

* धियां= बुद्धिप्रधानानां जीवानाम् ।

www.astrology-tantra.com

इत्यज्ञानन्विजानाति
यः स ब्रह्मविदुत्तमः ॥ ५३ ॥

एवमात्मानं ज्ञात्वा किं प्रवर्तितव्यमुत निवर्तितव्यमाहो स्विन्मुक्तप्रग्रह इत्युच्यते—

ज्ञेयाभिन्नमिदं *यस्माद्
ज्ञेयवस्त्वनुसार्यतः ।
न प्रवृत्तिं निवृत्तिं वा
कटाक्षेणापि वीक्षते ॥ ५४ ॥

कुत एतद् ज्ञेयाभिन्नमिति, यतः—

प्रागात्मबोधाद् बोधो ऽयं
बाह्यवस्तूपसर्जनः† ।

नाश्रयो मत्तो ऽन्यस्य चैतन्यस्याभावादित्यद्वैतमात्मानं वृत्तिज्ञानेनाजानन् स्वरूपचैतन्येन स्वप्रकाशतया विजानाति स ब्रह्मविदुत्तम इत्यन्वययोजना ॥ ५३ ॥

एवं तत्त्वविचारं समाप्य तत्त्वविदश्चर्यामिदानीं निरूपयन् किं ब्रह्मविदा वर्णाश्रमधर्मेषु वर्तितव्यमुत तेभ्यो निवर्तितव्यमथ वा स्वच्छन्दं वर्तितव्यमिति पृच्छति एवमिति ॥ ज्ञानस्य ज्ञेयाद्वैतचैतन्याभिन्नतया तदनुसारित्वाद् ज्ञेयस्य च प्रवृत्तिनिवृत्तिशून्यस्वभावत्वात् तद्रूपेण ब्रह्मविदो ऽवस्थानं न तु प्रवृत्तिनिवृत्त्यादिसंबन्ध इत्युत्तरमाह उच्यत इति ॥ ५४ ॥

ज्ञानस्य ज्ञेयाभिन्नत्वं कुत इत्याशङ्क्य तदुत्तरत्वेन श्लोकमवतारयति

---

* इदं=ज्ञानम् ।

† बाह्यवस्तूपसर्जनो=विशिष्टावगाही,सविकल्पक इत्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

प्रध्वस्ताखिलसंसार

आत्मैकालम्बनः *स्मृतेः ॥ ५५ ॥

एवमवगतपरमार्थतत्त्वस्य न शेषशेषिभावस्तत्का-
रणस्योत्सारितत्वादित्याह--

वास्तवेनैव वृत्तेन

निरुणद्धि यतो भवम् ।

निवृत्तिमपि स्रुद्नाति

सम्यग्बोधः प्रवृत्तिवत् ॥ ५६ ॥

कुत एतदित्यादिना ॥ यत्र चान्यदिव स्यात्तत्रान्यो ऽन्यत्पश्येत् यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुतेरविद्यावस्थायां ज्ञानस्य भेदालम्बनत्वं विद्योदयेनाशेषसंसारनाशे त्वात्मैकमात्रपर्यवसानमवसीयतइत्यर्थः ॥ ५५ ॥

ननु विदुषः प्रवृत्तिधर्माणामभावे ऽपि अमानित्वादयो निवृत्तिधर्मा विद्यन्ते ऽतस्तद्विधिशेष एवायं विद्वानित्याशङ्क्य तत्रापि वस्तुस्वभावात्प्रवर्तते न तु शास्त्रान्नियोज्यत्वकारणभूतार्थित्वहेत्वविद्यायास्तत्त्वज्ञानेन निवृत्तत्वादित्याह एवमिति ॥ वास्तवेनैवेति ॥ यतः सम्यग्बोधः प्रवृत्तिनिवृत्तिशून्यात्मवस्तुवृत्तानुरोधेन संसारं निवर्तयत्यतो वैधप्रवृत्तिवद्वैधनिवृत्तिमपि निवर्तयति तस्माद्वस्तुस्वभावादेवामानित्वादौ विद्वान्वर्ततइत्यर्थः ॥ ५६ ॥

ननु यदि सम्यग्बोधः स्वोत्पत्तिमात्रेणैव संसारं निवर्तयेत् तदेवं स्यात् न त्वेतदस्ति तस्यानादिकालप्रवृत्तमिथ्याज्ञानतत्संस्का-

---

* आत्मैकालम्बनः = निर्विकल्पक इत्यर्थः ।

DR.RUPNATHJI (DR.RUPAK NATH)

www.astrology-tantra.com

सकृदात्मप्रसूत्यैव
निरुणद्ध्यखिलं भवम् ।
ध्वान्तमात्रनिरासेन
ततोन्या त्वन्यथामतिः* ॥ ५७ ॥

देशकालाद्यसंबन्धा-
द्देशादेर्मोहकार्यतः ।
नानुत्पन्नमदग्धं वा
ज्ञानमज्ञानमस्त्यतः ॥ ५८ ॥

रनिरासायाभ्यासापेक्षत्वात्तदवसरे च निवृत्तिविधीनामपि सावकाशत्वादित्यत आह सकृदिति ॥ स्वोत्पत्तिमात्रेणाविद्या-निवर्तकत्वेन गृहीतान्वयव्यतिरेकः सम्यग्बोधः स्वोत्पत्तिमात्रेणा-विद्यां निवर्तयन् तदानीमेव मिथ्याज्ञानतत्संस्काररलक्षणं सकलमपि संसारं निवर्तयति न त्वभ्यासादिकमपेक्षत इत्यर्थः । कुतस्तदानी-मेव मिथ्याज्ञानादिकं निवर्तयतीत्यत आह न ततोन्येति ॥ मिथ्या-ज्ञानादिरविद्याकार्यत्वान्नाविद्यातो विलक्षणस्तस्मादविद्यां निव-र्तयन् बोधस्तदानीमेव मिथ्याज्ञानादिकं निवर्तयतीत्यर्थः ॥ ५७ ॥

ननु कथं सकृदेव सकलाज्ञाननिवर्तकं ज्ञानमुत्पद्यते यावता लो-के प्रमाणज्ञानानां स्वदेशकालोपाधावेव स्वविषयाज्ञाननिवर्तकत्वं न तु सकलाज्ञाननिवर्तकत्वं दृश्यत इत्याशङ्क्याह देशकालेति ॥ घटा-दीनां देशकालावस्थादिपरिच्छिन्नत्वाज्जडत्वाच्च तद्विषयज्ञानानां देशकालाद्यपेक्षया तत्तदज्ञाननिवर्तकत्वे ऽपि आत्मनो ऽविद्याका-र्यदेशकालादिभिरसंस्पृष्टत्वात्स्वयंप्रभत्वाच्च तत्रानिवृत्तमज्ञानान्तरं

---

* अन्यथामतिः=भ्रमसंशयादिरूपा ।

सम्यग्ज्ञानशिखिप्लुष्ट-
मोहतत्कार्यरूपिणः ।
सकृन्निवृत्तेर्बाध्यस्य*
किं कार्यमवशिष्यते ॥ ५९ ॥

वास्तवेनैव वृत्तेनाविद्यायाः प्रध्वस्तत्वान्न किं चिदवशिष्यत इत्युक्तः परिहारः । इदानीमपरः सांप्रदायिकः—

निवृत्तसर्पः †सर्पोत्थं
यथा कम्पं न मुञ्चति ।
विध्वस्ताखिलमोहोऽपि
मोहकार्यं तथात्मवित् ॥ ६० ॥

तन्निवृत्तये ऽपेक्षितमनुत्पन्नं ज्ञानान्तरं वा नास्तीत्यर्थः । अनुत्पन्नं ज्ञानमदग्धमज्ञानं वा नास्तीत्यन्वयः ॥ ५८ ॥

तस्मात्सम्यग्ज्ञानोत्पत्तौ सकलाज्ञाननिवृत्तेर्न शेषशेषिभाव इति युक्तमेवोक्तमित्युपसंहरति सम्यगिति ॥ सम्यग्ज्ञानाग्निना दग्धाविद्यातत्कार्यस्वभावस्यात्मनः कार्यं किं चिन्नावशिष्यते बाधयोग्यस्य सर्वस्य सकृदेव निवृत्तत्वात्ततश्च न शेषशेषिभाव इत्यर्थः ॥ ५९ ॥

एवं सद्योमुक्तिपक्षमङ्गीकृत्य शेषशेषिभावः परिहृतः, सांप्रतं जीवन्मुक्तिपक्षे ऽपि न शेषशेषिभाव इत्युत्तरग्रन्थस्य तात्पर्यमाह वास्तवेनेत्यादिना ॥ सम्यग्बोधाद्बाधितसर्पविभ्रमस्य पुंसो यथा भयक-

---

* बाध्यस्य=बाधयोग्यस्य, सर्वस्य प्रपञ्चस्य ।

† निवृत्तसर्पः= निवृत्तसर्पबुद्धिरित्यर्थः ।

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

यतः प्रवृत्तिबीजमुच्छिन्नं तस्मात्—

तरोरुत्खातमूलस्य
स्पर्शेनैव यथा क्षयः ।
तथा बुद्धात्मतत्त्वस्य
निवृत्त्यैव तनुक्षयः ॥ ६१ ॥

अथालेपकपक्ष*निरासार्थमाह—

बुद्धाद्वैतसतत्त्वस्य
यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशां चैव
को भेदो ऽशुचिभक्षणे ॥ ६२ ॥

स्यादिकं कं चित्कालमनुवर्तते तथा विदुषो ऽपि बाधितो ऽपि संसारः प्रारब्धकर्मफलभोगपर्यन्तमनुवर्तत इत्यर्थः ॥ ६० ॥

भवत्वेवं तथापि कथं शेषशेषिभावाऽसंभव इत्यत आह यत इति ॥ विविधवैधप्रवृत्तिबीजमविद्याकामादिकं सम्यग्ज्ञानादुच्छिन्नमिति यतस्ततश्च न शेषशेषिभावस्ततश्च निवृत्त्या प्रारब्धकर्मणो भोगेन निवृत्त्या प्रातिभासिकस्य शरीरादेः क्षय इत्यर्थः ॥ ६१ ॥

ननु विदुषो दृश्यमानानां प्रवृत्तीनां विधिनिबन्धनत्वाभावे रागद्वेषादिनिबन्धनत्वं स्यात्तथा च न स्वैरचेष्टायां दोष इति प्राप्तमित्याशङ्क्य तन्निरासायोत्तरश्लोक इत्याह यथेत्यादिना ॥ तत्त्वदृशां संस्कारवशान्मनुष्यत्वजात्युचितैव प्रवृत्तिर्न तु यत्किंचिज्जात्युचितेति यथा स्वयेष्यते तथा प्रातिभासिकवर्णाश्रमोचितैव प्रवृत्तिस्तत्संस्का-

* अलेपकपक्षः=शास्त्रप्रामाण्याऽनङ्गीकारिणां निर्लेपात्मवादपक्ष इत्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

कस्मान्न भवति, यस्मात्—

अधर्माज्जायते ऽज्ञानं
यथेष्टाचरणं ततः ।
धर्मकार्यं कथं तत्स्या-
द्यत्र धर्मोऽपि नेष्यते ॥ ६३ ॥
प्रत्याचक्षाण आहातो
यथेष्टाचरणं हरिः ।

रवशाद्भवति नेतरेत्यभ्युपेयं तस्मान्न तैर्यथेष्टाप्रसङ्ग इत्यर्थः ॥ ६२ ॥

ननु वर्णाश्रमाभिमानस्यागन्तुकत्वात्स्वभावसिद्धत्वाच्च जात्यभिमानस्य मनुष्यत्वजातिमात्रोचितैव प्रवृत्तिस्तत्संस्कारवशात्किं न स्यादिति विशेषहेतुर्वाच्य इत्याशङ्क्योत्तरश्लोकेन परिहरति कस्मादित्यादिना ॥ जन्मान्तरानुष्ठिताधर्मवशादभक्ष्यभक्षणादौ कर्त्तव्यताबुद्धिस्ततश्च यथेष्टाचरणं, ज्ञानं पुनरत्यन्तोत्कृष्टपुण्यकार्यम् । धर्मात्सुखं च ज्ञानं चेति वचनात् । यस्मिंश्च ज्ञाने सति प्रवर्तककामादिदोषाणामत्यन्तमुच्छिन्नत्वाद्धर्मेऽपि प्रवृत्तिर्न भवति तथाभूते ज्ञाने सति कथं यथेष्टाचरणम् ।

भावितैः करणैरेभिर्बहुसंसारयोनिषु ।
आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥

इति स्मरणाद् अतीतानेकजन्मस्वपि यथेष्टाचरणाभावेन तत्संस्कारस्याप्यभावान्न तद्वशादपि यथेष्टाचरणमित्यर्थः ॥ ६३ ॥

विदुषो यथेष्टाचरणाभावे भगवद्वचनमपि प्रमाणमित्याह प्रत्याचक्षाण इति ॥ ६४ ॥

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

यस्य सर्वे समारम्भाः
प्रकाशं चेति सर्वदृक्* ॥ ६४ ॥

तिष्ठतु तावत् सर्वप्रवृत्तिबीजघस्मरं ज्ञानं मुमुक्षु-वस्थायामपि न संभवति यथेष्टाचरणं, तदाह—

यो हि यत्र विरक्तः स्या-
न्नासौ तस्मै प्रवर्तते ।
लोकत्रयविरक्तत्वा-
न्मुमुक्षुः किमितीहते ॥ ६५ ॥

तत्र दृष्टान्तः—

क्षुधया पीड्यमानो ऽपि
न विषं ह्यत्तुमिच्छति ।

इदानीं कैमुतिकन्यायेनापि विदुषो यथेष्टाचरणाभावमाह तिष्ठत्वित्यादिना ॥ मुमुक्षुरपि यत्र न चेष्टते तत्र मुक्तो न चेष्टतइति किमु वक्तव्यमित्यर्थः ॥ ६५ ॥

किमु वक्तव्यन्यायमेव दृष्टान्तेन स्पष्टयति तत्र दृष्टान्त इत्यादिना ॥ यथा लोके क्षुत्क्षामस्तन्निवृत्तिसाधने प्रयतमानो ऽप्यतत्साधने प्रत्युत प्रतिकूले विषदूषितान्ने न प्रवर्तते तत्र मिष्टान्नेन ध्वस्ततृष्णस्तस्य विषदूषितत्वं जानन्विवेकी न तदत्तुमिच्छतीति किमु वक्तव्यम् । तथा मुमुक्षुरप्राप्तपरमपुरुषार्थस्तत्साधने प्रवर्तमानो ऽप्य-

---

* यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ।
इति गीतावाक्यमत्रानुसंधेयम् ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

मिष्टान्नध्वस्ततृड् जान-
न्नामूढस्तज्जिघत्सति ॥ ६६ ॥

यतोऽवगतपरमार्थतत्त्वस्य यथेष्टाचरणं न मना-
गपि घटते मुमुक्षुत्वेऽपि च, तस्मात्—

रागो लिङ्गमबोधस्य
चित्तव्यायामभूमिषु ।
कुतः शाड्वलता तस्य
यस्याग्निः कोटरे तरोः ॥ ६७ ॥

सकलपुरुषार्थसमाप्तिकारिणोऽस्यात्मावबोधस्य कु-
तः प्रसूतिरित्युच्यते—

अमानित्वादिनिष्ठो यो
यश्चाद्वेष्ट्रादिसाधनः ।

नित्यत्वादिदोषदूषितैहिकामुष्मिकादिसुखेभ्यो विरक्तस्तत्साधनेषु न प्रवर्तते तत्र किमु वक्तव्यं परब्रह्मानन्दानुभवपरितृप्तो विद्वान् बहुलायासपरिक्लिष्टेषु वैषयिकसुखलवेषु न प्रवर्तत इति भावः ॥ ६६ ॥

यस्मात्सिद्धस्य साधकस्य च न रागद्वेषनिबन्धने प्रवृत्तिनिवृत्ती भवतस्तस्मात्प्रवृत्त्यादिनाऽनुमितो रागोऽविद्वत्ताया लिङ्गमित्युपसंहरति यत इत्यादिना ॥ चित्तव्यायामभूमिषु चित्तस्य स्वारसिकप्रवृत्त्यालम्बनेषु शब्दादिषु यो रागः सोऽयमबोधस्य लिङ्गम् । तत्र दृष्टान्तः कुत इति ॥ यथा यत्राग्निस्तत्र न शाड्वलता तथा यत्र रागस्तत्र न बोध इत्यर्थः ॥ ६७ ॥

एवं प्रसङ्गागतमलेपकपक्षनिरासं समाप्य पूर्वोदिततत्त्वंपदार्थ-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

ज्ञानमुत्पद्यते तस्य
न बहिर्मुखचेतसः ॥६८॥

उत्पन्ने आत्मविज्ञाने किमविद्याकार्यत्वात्प्रशान्तिव-न्निवृत्त्यात्मकामानित्वादयो निवर्त्तन्ते उत नेति, नेति ब्रूमः । किं कारणं निवृत्तिशास्त्राऽविरुद्धस्वभावत्वात्पर-मात्मनो न तु नियोगवशात् । कथं तर्हि, शृणु—

उत्पन्नात्मप्रबोधस्य
त्वद्वेष्टृत्वादयो गुणाः ।
अयत्नतो भवन्त्यस्य
न तु साधनरूपिणः ॥ ६९ ॥

यत एतदेवमतः—

विवेकमात्रस्यैव ज्ञानसाधनत्वमिति शङ्कानिरासाय सम्यग्दर्शन-साधनानि संकल्प्य दर्शयति सकलेति ॥ "अमानित्वमदम्भित्व" "अद्वे-ष्टा सर्वभूताना"मित्यादिभगवद्गीतोक्तगुणवत एव सम्यग्ज्ञानोत्पत्ति-र्न विषयाभिमुखचेतस इत्यर्थः ॥ ६८ ॥

ननु साधकस्यामानित्वादिकं साधनं चेत्सिद्धस्य तर्हि 'साध्याभावे महाबाहो साधनैः किं प्रयोजन'मिति न्यायेन तेषामविद्याकार्याणां विद्याविरोधादसंभवः संभवे वा निवृत्तिशास्त्रनियोज्यत्वं विदुषः प्रसज्येतेत्याशङ्क्य विधितस्तेषामनुष्ठेयत्वाभावेपि विद्यापि विषयपर-मार्थात्मस्वभावाऽविरोधादयत्नसाध्या अमानित्वादयो विदुषो लक्षण-त्वेनानुवर्तन्त इति परिहरति उत्पन्नेत्यादिना ॥ ६९ ॥

यस्मादेवं साधकस्य साधनत्वेन सिद्धस्य च लक्षणं तेन सर्वथा ऽध्य-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

इमं ग्रन्थमुपादित्सु-
रमानित्वादिसाधनः ।
यत्नतः स्यान्न दुर्वृत्तः
प्रत्यग्धर्मानुगो ह्ययम् ॥ ७० ॥

न दातव्यश्चायं ग्रन्थः—

नाविरक्ताय संसारा-
न्नानिरस्तैषणाय च ।
न चायमवते देयं
वेदान्तार्थप्रवेशनम् ॥ ७१ ॥

ज्ञात्वा यथोदितं सम्य-
ग्ज्ञातव्यं नावशिष्यते ।

ङ्गीकार्यास्तस्मात्परमहंसो ज्ञानसाधनभूतनैष्कर्म्यसिद्धिप्रकरणश्रवणाद्यभिमुखोऽप्यमानित्वादिनिष्ठो भवेदित्याह यत इत्यादिना ॥ प्रत्यग्धर्म आत्मा प्रत्यक् चासौ धर्मश्चेति तमनुगच्छति तद्याथात्म्यप्रतिपत्तिप्रतिपादकत्वेनायं ग्रन्थ इति प्रत्यग्धर्मानुग इत्युक्तम् ॥ ७० ॥

एवं शिष्यस्य नियममभिधायाचार्यस्य नियममाह न दातव्य इति ॥ यमा अहिंसादयस्ते यमादयो यस्य विद्यन्ते स यमवान् नयमवान् अयमवान् तस्मै अयमवते । कुतो न देयमित्यत आह वेदान्तेति ॥ वेदान्तानामर्थे प्रवेशो ऽधिगमो ऽनेनेतीदं प्रकरणं वेदान्तार्थप्रवेशनम् । तेन य एवं वेदान्तश्रवणादिष्वधिकृतो मुमुक्षुः स एवात्राधिकारीति नान्यस्तस्मात्कुतूहलाद्बहुश्रुतत्वादिबुद्ध्या वा प्रवर्तमानायेदं न देयमित्यर्थः ॥ ७१ ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

न चानिरस्तकर्मेदं
जानीयादञ्जसा ततः ॥ ७२ ॥
निरस्तसर्वकर्माणः
प्रत्यक्प्रवणबुद्धयः ।
निष्कामा यतयः शान्ता
जानन्तीदं यथोदितम् ॥ ७३ ॥
श्रीमच्छङ्करपादपद्मयुगलं
संसेव्य लब्ध्वोचिवान्
ज्ञानं पारमहंस्यमेतदमलं
स्वान्तान्धकारापनुत् ।
मा भूदत्र विरोधिनी मतिरतः
सद्भिः परीक्ष्यं बुधैः
सर्वत्रैव विशुद्धये मतमिदं
सन्तः परं कारणम् ॥ ७४ ॥

ननु किमेतत्प्रकरणपरिज्ञानाद्भवति येनात्रानधिकारिणां प्रवेशो न सिध्येदित्यत आह ज्ञात्वेति ॥ तेन कुतूहलादिवशात्प्रवृत्तो न फलपर्यन्तं ज्ञानमधिगच्छतीत्यर्थः । न चानिरस्तेति ॥ ७२ ॥

के तर्हि प्रकरणार्थं सम्यक् प्रतिपद्यन्ते इत्यत आह निरस्तेति ॥ ७३ ॥

इदानीमस्य प्रकरणस्य विशिष्टगुरुसंप्रदायपूर्वकत्वादत्र दोषदृष्टिर्मा भूत्किं तु यत्नात्सद्भिः परीक्षणीयमिदं प्रकरणं यतः सन्त एव गुणदोषावधारणे परं कारणं तस्मात्परीक्षणीयमेवेति विद्वज्जनेष्वात्म-

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

सुभाषितं चार्वपि नाऽमहात्मनां
दिवाकरो नक्तदृशा*मिवामलः ।
प्रभाति भात्येव विशुद्धचेतसां
निधिर्यथाऽपास्ततृषां महाधनः ॥ ७५ ॥

विष्णोः पादानुगां यां
निखिलभवनुदं शङ्करोऽवाप योगा-
त्सर्वज्ञं ब्रह्मसंस्थं
मुनिगणसहितं सम्यगभ्यर्च्य भक्त्या ।
विद्यां गङ्गामिवाहं
प्रवरगुणनिधेः प्राप्य वेदान्तदीप्तां

नो ऽनौद्धत्यं दर्शयति श्रीमदिति ॥ उचिवानुक्तवानित्यर्थः ॥ ७४ ॥

ये पुनरनुनीयमाना अनेनयादेवानुनेतुरशक्तिं मन्यन्ते दुर्विदग्धा-न् तान्प्रति साविष्कारमात्मनो वैदग्ध्यं दर्शयति सुभाषितमिति ॥ निःस्पृहाणां निधयः प्रकाशन्ते । तदुक्तं भगवता पतञ्जलिना रत्नो-पस्थानमिति ॥ अस्तेयप्रतिष्ठायामात्मस्पृहायां रत्नोपस्थानं सर्वदि-क्स्थान्यस्योपतिष्ठन्ति रत्नानीत्यर्थः ॥ ७५ ॥

एवं विशिष्टगुरुसंप्रदायप्राप्तस्य प्रकरणस्य परानुग्रह एव प्रयोजनं न तु दृष्टमदृष्टं वा विद्यया कृतार्थत्वादिति दर्शयति विष्णोरिति ॥ विष्णोर्व्यापिनो जगत्कारणस्य पदमधिष्ठानं सच्चिदानन्दैकरसमनु-गच्छतीति विष्णोः पादानुगा विद्या । गङ्गापि विष्णोः पुरुषोत्तम-स्य चरणमनुसृत्य गच्छतीति वामपादाङ्गुष्ठनखस्रोतोविनिर्गता-

* नक्तदृशाम्=दिवान्धानाम्,उलूकादीनामित्यर्थः ।

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

कारुण्यात्तामवोचं जनिमृति-
निवहध्वस्तये दुःखितेभ्यः ॥ ७६ ॥

वेदान्तोदरवर्ति भास्वदमलं ध्वान्तच्छिदस्मद्धियो
दिव्यज्ञानमतीन्द्रियेऽपि विषये व्याहन्यते न क्वचित् ।
यो नो न्यायशलाकयैव निखिलं संसारबीजं तमः
प्रोत्सार्याऽऽविरकार्षीद्गुरुगुरुः पूज्याय तस्मै नमः॥७७॥

मिति स्मरणात् । पुनरपि विद्यागङ्गयोः समानं विशेषणमाह । निखिलभवनुदमिति । यामेवंविधां विद्यां गङ्गां च भगवत्पादाचार्यः परमेश्वरश्च योगसामर्थ्यादवापत्तमाचार्यं सर्वज्ञं ब्रह्मसंस्थं मुनिगणैः सहितं भक्त्या सम्यगभ्यर्च्य तस्मात्प्रवरगुणनिधेराचार्यात्तां वेदान्तदीप्तां परमेश्वरं समभ्यर्च्य तस्माद्भगीरथो वेदान्तदीप्तां सितासिते इमं मे गङ्गे इत्यादिवेदान्तप्रतिपाद्यां गङ्गामिव साकल्येनाहं प्राप्याऽर्थिभ्यः सकारणसंसारनिवृत्तये ऽवोचमित्यर्थः ॥ ७६ ॥

गुरुभक्तेर्विद्यां प्रत्यन्तरङ्गसाधनत्वं दर्शयितुं प्रकरणारम्भइव प्रकरणपरिसमाप्तावपि गुरुनमस्कारं करोति । वेदान्तेति । वेदान्तोदरवर्ति वेदान्तप्रमाणजन्यं भास्वच्छुद्धसत्त्वात्मकममलं रागादिदोषरहितं ध्वान्तच्छित् अस्मद्धियो ऽस्मदन्तःकरणतमोनिवर्तकं दिव्यं स्वयंप्रकाशाऽभिव्यञ्जकम् । पुनरपि तदेव ज्ञानं विशिनष्टि । अतीन्द्रियेपीति । यस्य ज्ञानस्याऽतीन्द्रियवस्तुविषयत्वान्न प्रत्यक्षादिविरुद्धार्थविषयत्वमित्यर्थः । एवंविधं ज्ञानं यो गुरूणामपि गुरुर्नो ऽस्माकमाविरकार्षीदिति सम्बन्धः । किं कुर्वन्नाविरकार्षीत्तत्राऽऽह । सकलं संसारबीजं तमो न्यायशलाकयोत्सारयन् य एवमाविरकार्षीत्तस्मै नम इति सम्बन्धः । निचृच्छार्दूलविक्रीडितमेतत् । न्यूनाधिकेनैकेन निचृद्भुरिजावित्युक्तत्वात् ॥ ७७ ॥

DR.RUPNATHJI (DR.RUPAK NATH)

www.astrology-tantra.com

सम्बन्धोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता ।
नैष्कर्म्यसिद्धेर्ज्ञात्वेमां व्याख्याताऽसौ भवेद्द्रुतम् ॥७८॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यशिष्यश्रीसुरेश्वराचार्यविरचितायां नैष्कर्म्यसिद्धौ सम्बन्धोक्तौ चतुर्थो ऽध्यायः ॥ ४ ॥

नैष्कर्म्यसिद्धेर्व्याख्यानक्षमतात्पर्यपरिज्ञाने किं कारणमित्याशङ्कायां सम्बन्धोक्तिरेवेत्याह । सम्बन्धोक्तिरिति ॥ ७८ ॥

पदकशतहतकुमारिलसौगतगर्वक्षपादकणभक्षः ।
यमनियमनिलयधिषणो जयति श्रीसत्यबोधाचार्यः ॥ १ ॥
वस्तुख्यातिविघातिवादितिमिरं नैष्कर्म्यसिद्धिस्फुटं
व्याख्याचन्द्रिकया विधूय सुधियां सद्दृष्टिमुन्मीलयन् ।
अन्तः संभृतशान्तवेदरसप्रोद्भ्रान्तः समुद्द्योतते
सर्वज्ञाश्रमचन्द्रमाऽखिलजगतीसर्वज्ञचूडामणिः ॥ २ ॥

इति श्रीमहोपाध्यायज्ञानोत्तममिश्रविरचितायां नैष्कर्म्यसिद्धिचन्द्रिकायां चतुर्थो ऽध्यायः ॥ ४ ॥

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

नैष्कर्म्यसिद्धिकारिकासूची ।

	पृष्ठम् ।
अकुर्वतः क्रियाः काम्याः	१४
अग्निः सम्यगधीतेऽसौ	२४४
अज्ञात एव सर्वोऽर्थः	१७०
अज्ञातपुरुषार्थत्वात्	२३२
अज्ञानमनिराकुर्वद्	५५
अज्ञानहानमात्रत्वात्	२३
अतः सर्वाश्रमाणां	२०,८५
अतिदुःस्थोऽप्रबोधोऽत्र	२५२
अतीतानागतेहत्यान्	१२७
अत्राभिदध्महे	२२
अथाध्यात्मं	६४
अद्धातममनादृत्य	२५७
अधर्माज्जायतेऽज्ञानं	[illegible]
अधिचोदनं	[illegible]
अनात्मज्ञस्तथैवार्यं	२८३
अनात्मत्वं स्वतःसिद्धं	२६५
अनादृत्य श्रुतिं मोहात्	१९१
अनालिङ्गितसामान्यो	२२६
अनुच्छिन्नबुभुत्सस्य	२६८
अनुत्सारितनानात्वं	५८
अनुपक्रियमाणत्वात्	२१६
अनुमानप्रदीपेन	२७१
अनुमानादयं भावात्	२५५
अनेन गुणलेशेन	२४७
अन्तरेण विधिं	१७
अन्यथा गृह्णतः स्वप्नः	२८७

	पृष्ठम् ।
अन्यस्यान्यात्मता	६०
अन्वयव्यतिरेकाभ्यां	९३,२०५,२८१
अन्वयव्यतिरेकौ हि	२७६
अपविद्धद्वयोऽप्येवं	२१९
अपश्यन्पश्यती	१२८
अपहारो यथा भानोः	११४
अपि प्रत्यक्षबाधेन	२४३
अपूर्वाधिगमं कुर्वत्	२३४
अप्रमोत्थं प्रमोत्थेन	१४५
अभूताभिनिवेशेन	११६
अभ्यासोपचयाद्बुद्धेः	२३९
अभ्यासोपचिता कृत्स्नं	२४०
अभ्रयानं यथा	१४४
अमानित्वादिनिष्ठो यः	३००
अमुह्यमानो मुह्यन्ती	१२८
अयथावस्त्वविद्या	५०
अलब्ध्वातिशयं	८
अवगत्यात्मनः	१४०
अवस्थादेशकालादि	१३६
अविक्रियस्य भोक्तृत्वं	१२४
अविद्यानाशमात्रं	१४६
अविद्यानिद्रया सोऽयं	२५६
अविद्याबद्धचक्षुष्ट्वात्	२८३
अविविच्योभयं वक्ति	२७५
असत्ये वर्त्मनि स्थित्वा	२४९
असाधारणांस्तयोर्धर्मान्	२६५

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

	पृष्ठम् ।
अस्तु वा परिणामः	१३४
अस्माद्यदपरं रूपं	२८६
अहंवृत्त्यैव तद्ब्रह्म	१९८
अहंशब्दस्य या निष्ठा	२७८
अहं दुःखी सुखी चेति	२००
अहंधर्मस्त्वभिन्नः	१०४
अहमः प्रत्यगात्मार्थः	१९५
अहम्ममत्वयत्नेच्छा	९९
अहं मिथ्याभिशापेन	१५३
अहो धाष्टर्यमविद्यायाः	२५४
आगमापायिनिष्ठत्वात्	१०७
आगमापायिहेतुभ्यां	१८१
आत्मनश्चेदहंधर्मः	१०६
आत्मनश्चेन्निवार्यन्ते	१५२
आत्मना चाविनाभावं	१९९
आत्मनैवेत्युपश्रुत्य	१९७
आत्माऽनात्मा च लोकेऽस्मिन्	२६४
आप्रबोधाद्यथा सिद्धिः	२९१
आम्नायस्य क्रियार्थत्वात्	१८
आम्रादेः परिणामित्वात्	१०७
आरुरुक्षोर्मुनेः	४७
आर्त्तमन्यद्दृशेः	१११
इति दृष्टधियां	२१
इत्येवं चोद्यतोऽपि	२५२
इत्योमित्यवबुद्धात्मा	१५५
इदं चेदनृतं ब्रूयात्	२५८
इदं ज्ञानमहं ज्ञाता	२८८
इदंज्ञानं भवेज्ज्ञातुः	२१४
इदमित्येव बाह्येऽर्थे	२६६
इमं ग्रन्थमुपादित्सुः	३०२
इमं प्राश्निकमुद्दिश्य	१२२

	पृष्ठम् ।
इममर्थं पुरस्कृत्य	२७२
उत्पत्तिस्थितिनाशेषु	१५०
उत्पत्तिस्थितिभङ्गेषु	१३१
उत्पन्नात्मप्रबोधस्य	३०१
उत्पाद्यमाप्यं	४८
उद्दिश्यमानं वाक्यस्थं	१८३
ऊर्ध्वं गच्छति धूमे	१२४
ऋते ज्ञानं न सन्त्यर्थाः	१४१
एकेन वा भवेत्	२३
एवं पौण्ड्रैर्द्राविडैः	२८८
एवं चङ्क्रम्यमाणः	४१
एवं ज्ञानवतो नास्ति	२९०
एवं तत्त्वमसीत्यस्मात्	२२२
एवं विज्ञातवाच्यार्थे	२७७
एवमेतद्विरुक्	११२
एष आत्मा स्वयंज्योतिः	१९६
एष सर्वधियां	१२१
ऐकात्म्याप्रतिपत्तिः	१२
कर्माज्ञानसमुत्थत्वात्	३४
कर्मणोऽङ्गाङ्गिभावेन	२०
कर्म प्रकरणाकाङ्क्षि	५४
कल्पितानामवस्तुत्वात्	११५
काम्यकर्मफलं	१४
कार्यकारणबद्धौ तौ	२८६
कुतोऽविद्येति चोद्यं स्यात्	२५७
कुर्वन्नेवेह कर्माणि	१८
कूटस्थबोधतोऽद्वैतं	१७७
कूटस्थबोधप्रत्यक्त्वं	१७४
कृत्स्नानात्मनिवृत्तौ	८९
क्षयो नित्येन तेषां	७१
क्षुधया पीड्यमानोऽपि	२९९

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

	पृष्ठम् ।
ग्रानिलाग्न्यब्धरिऽयन्तं	७
गुरूक्तो वेदराद्धान्तः	१०
गृहीताहम्पदार्थश्चेत्	१९८
ग्राहकग्रहणग्राह्य	१४८
घटबुद्धेर्घटाद्यार्थात्	१४३
घटादयो यथा लिङ्गं	२०७
घटादिवच्च	९८
चक्षुर्न वीक्षते शब्दं	२६९
चण्डालवुद्धेः	१३६
चतुर्भिरूह्यते	९८
चिन्निर्भयमहंवृत्तिः	२४६
छित्वा त्यक्तेन हस्तेन	२७८
जानीयाच्चेत्प्रसंख्यानात्	२६१
जिघ्राणीममहं गन्धं	१९४
जिज्ञासोर्दर्शनं यद्वत्	२२१
ज्ञातैवात्मा सदा ग्राह्यः	२७९
ज्ञात्वा यथोदितं सम्यक्	३०२
ज्ञानं यस्य निजं रूपं	२[illegible]४
ज्ञानात्फले ह्यनाप्ते	[illegible]७७
ज्ञेयाभिन्नमिदं यस्मात्	२९३
तत्त्वमर्थेन सम्पृक्तः	२३०
तत्त्वमस्यादिवाक्यानां	८५
तत्पदं प्रकृतार्थं स्यात्	१६४
तथा पदपदार्थौ	९३
तदर्थयोस्तु निष्ठात्मा	२२७
तदित्येतत्पदं लोके	१८२
तदेतदद्वयं ब्रह्म	१३८
तदो विशेषणार्थत्वं	१८४
तद्वत्सूक्ष्मं तथा स्थूले	९७
तमोङ्गत्वं यथा	६७
तमोभिभूतचित्तः	१०५

	पृष्ठम्
तरोरुत्खातमूलस्य	२[illegible]७
तस्मात्त्यक्तेन हस्तेन	२७९
तस्माद्दुःखोदधेः	३६
तस्मान्मुमुक्षुभिः	४६
तस्यैवं दुःखतप्तस्य	४३
तृष्णानिष्ठीवनेनापि	२०२
त्यक्तकृत्स्नेदमर्थत्वात्	२६७
त्वमर्थस्यावबोधाय	२६३
त्वमित्यपि पदं	१८२
त्वमित्येतदिहायान्यत्	२४५
दग्धाखिलाधिकारः	३९
दग्धुतां च यथा	१४४
दण्डावसाननिष्ठः स्यात्	२८४
दशमोऽसीति वाक्योत्था	२२२
दाह्यदाहकतैकत्र	२१२
दिग्दक्षिनपरिच्छिन्न	२०२
दुःखराशेर्विचित्रस्य	१४५
दुःखितावगतौ चेत्स्यात्	२३७
दुःखी यदि भवेदात्मा	१३०
दुःखयस्मीत्यपि चेद्ध्वस्ता	२५०
दुरितक्षपणार्थत्वात्	२४
दृगेका सर्वभूतेषु	११३
दृश्यत्वादहमित्येषः	२८०
दृश्यत्वाद्घटवद्देहः	२०५
दृश्याः शब्दादयः	११३
दृश्यानुरक्तं	११७
दृष्टेद्रष्टारमात्मानं	१३८
देशकालाद्यसम्बद्धात्	२९५
देहादिव्यवधानत्वात्	१८८
द्रष्टापि यदि दृश्यायाः	११०
द्रष्टृत्वं दृश्यता चैव	१०९

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

	पृष्ठम् ।
दृष्टत्वेनोपयुक्तत्वात्	१०३
द्विषन्तीमद्विषन्	१२८
धर्मधर्मित्वभेदोऽस्याः	१७६
धावेदिति न दानार्थे	८४
धीवन्नापेक्षते सिद्धिं	१४९
धीविक्रियासहस्राणां	२६९
न कृत्स्नकाम्यसन्त्यागः	७०
न कस्याश्चिदवस्थायां	१७६
न ख्यातिलाभपूजार्थं	११
न चाध्यात्माभिमानोऽपि	६४
न चामुमुक्षोः	९२
न चेदनुभवोऽतः स्यात्	२५९
न तावद्योगः	८२
न परीप्सां जिहासां वा	२११
न पृथङ्नात्मना	११९
न प्रकाशक्रिया।	१२६
नरकाङ्घ्रीर्यथास्याभूत्	७३
नराभिमानिनं	८२
नर्ते स्याद्विक्रियां	१३०
नवबुद्ध्यपहाराद्धि	१८२
नवसंख्याहृतज्ञानः	२१९
न विदन्त्यात्मनः सत्तां	१४६
न व्यावृत्तिर्यथा भावात्	२५६
न स्वयं स्वस्य	१५१
न हानं हानमात्रेण	१८०
न हि नामास्ति सम्बन्धः	२५६
नाज्ञासिषमिति	११९
नात्मना न तदंशेन	१०३
नाद्राक्षमहमित्यस्मिन्	२७७
नामादिभ्यः परो भूमा	१२०
नामादिभ्यो निराकृत्य	२५९

	पृष्ठम् ।
नायं शब्दः कुतो यस्मात्	२३४
नालुप्तदृष्टेर्द्रष्टृत्वं	११०
नाविरक्तस्य संसारात्	९२
नाविरक्ताय संसारात्	३०२
नासन्नुपायो लोकेऽस्ति	२५१
नाहंग्राह्ये	९१
नाहं न च ममात्मत्वात्	१५४
नित्यमुक्तत्वविज्ञानं	२८०
नित्यानुष्ठानतः	१५
नित्यां संविदमाश्रित्य	१५२
नित्यावगतिरूपत्वात्	१५१,२०१
नियमः परिसंख्या वा	७५
निरस्तसर्वकर्माणः	३०३
निर्दुःखित्वं त्वमर्थस्य	१७३
निर्दुःखित्वं स्वतःसिद्धं	३४२
निरपेक्षश्च सापेक्षां	१२९
निराकुर्यात्प्रसंख्यानं	२३८
निवृत्तसर्पः सर्पोत्थं	२९६
निवृत्तायामहंबुद्धौ	१०५
निषिद्धकाम्ययोः	२६
नेहात्मविन्मदन्योऽस्ति	२९३
नोष्णिमानं दहत्यग्निः	१००
न्यायः पुरोदितोऽस्माभिः	२६६
न्यायसिद्धमतो वक्ति	२०३
पदान्युद्धृत्य वाक्येभ्यः	१८९
परमात्मानुकूलेन	६१
परमार्थात्मनिष्ठं यत्	२९२
पराञ्च्येव तु सर्वाणि	१९९
परिणामिधियां	१३३
परिहृतावाप्तयोः	३३
परीक्ष्य लोकान्	७४

www.astrology-tantra.com

	पृष्ठम् ।
पश्यन्निति यदाहोचैः	२८५
पापापनुत्तये	७२
पाप्मनां पाप्मभिः	७२
पारम्पर्येण कर्मैवं	४८
पारोक्ष्यं यत्तदर्थे स्यात्	२२९
पूर्वाध्यायेषु यद्वस्तु	२६४
प्रत्यक्तास्य स्वतोरूप	२२३
प्रत्यक्त्वादतिसूक्ष्मत्वात्	११९
प्रत्यक्प्रवणतां	४६
प्रत्यक्षं चेन्न शाब्दं स्यात्	२३५
प्रत्यक्षस्य पराक्त्वात्	२०३
प्रत्यक्षादिविरुद्धं चेत्	२३२
प्रत्यगुद्भूनपित्तस्य	१८८
प्रत्यर्थं तु विभिद्यन्ते	१३५
प्रत्याचक्षाण आहातः	२९९
प्रमाणतन्निभेषु	१३०
प्रमाणबद्धमूलत्वात्	[illegible]
प्रमाणमन्तरेणैषां	१४३
प्रमाणाव्यवहारोऽयं	२०४
प्रमाणैश्चावगम्यत्वात्	१०८
प्रमां चेज्जनयेद्वाक्यं	२४४
प्रमित्सायां य आभाति	१७१
प्रसंख्यानं श्रुतावत्र	२६२
प्रागनात्मैव	९४
प्रागसद्याति पश्चादसत्	२०६
प्रागात्मबोधादूबोधोऽयं	२९३
प्राप्तव्यपरिहार्येषु	३२
प्रामाण्यस्य न बाहुल्यं	७३
बलवद्धि प्रमाणात्थं	३६
बाधितत्वादविद्यायाः	३८
बाध्यबाधकभावात्	५०

	पृष्ठम् ।
बाह्य आकारवान्	१४७
बाह्यां वृत्तिमनुत्पाद्य	२११
बुद्ध्याद्वैतसतत्त्वस्य	२९७
बुद्धावेव विवेकोऽयं	२७०
बुद्धिजन्मनि पुंसश्च	१२३
बुद्धेरनात्मधर्मत्वं	१४०
बुद्धं यत्प्रत्यगात्मानं	१७८
बुद्ध्यन्तमपरिच्छेद्यं	२७३
बुद्ध्यादीनामनात्मत्वं	१९०
बुभुत्सोच्छेदिनी चास्य	२२१
बुसवीह्यादिकालांशैः	९६
बृहस्पतिसवे	५१
बोद्धृता कर्तृता बुद्धेः	१७५
बोद्धृत्वं तद्वदेवास्याः	१७९
बोधात्प्रागपि	१३७
बोधाबोधौ नभोऽस्पृष्ट्वा	२५१
बोध्येऽप्यनुभवो यस्य	१९३
ब्रह्मात्मा वा	५८
ब्राह्मण्याद्यात्मके	३८
भगवत्पूज्यपादैश्च	२०४
भंक्त्वा चान्नमयादीन्	२६०
भयान्मोहादनद्धात्मा	३२
भावनाजं फलं यत्स्यात्	२४१
भिन्नाभिन्नं	६७
भेदसंविदिदं ज्ञानं	१६८
भ्रान्तिप्रसिद्ध्यानूद्यार्थं	२२५
मन्यसे तावत्	९५
महाभूतान्यहङ्कारः	१११
मानान्तरानवष्टब्धं	१९२
मित्रोदासीनशत्रुत्वं	११४
मुक्तेः क्रियाभिः	६८

DR.RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

	पृष्ठम् ।
मृत्स्नेभके	५२
मोहापिधानभङ्गाय	५९
यत्कर्मको हि	१०१
यत्नतो वीक्षमाणोऽपि	१६
यत्र त्वस्येति साटोपं	१५४
यत्र यो दृश्यते	१०२
यत्र स्यात्संशयो नासौ	१९३
यत्सिद्धाविदमः	९
यथा जात्यमणेः	१२५
यथा प्राज्ञे तथैवायं	२९०
यथा विशुद्ध आकाशे	१२६
यथा स्वापनिमित्तेन	२८३
यदर्थं च प्रवृत्तं यत्	२६०
यदवस्था व्यनक्तीति	१२[illegible]
यदा ना तत्त्वमस्यादेः	१६३
यदा सर्वे प्रमुच्यन्ते	४२
यद्धि यस्यानुरोधेन	[illegible]
यद्यद्विशेषणं दृष्टं	१३९
यद्यात्मधर्मोऽहङ्कारः	१०६
यावद्यावन्निरस्यायं	१८६
यावन्त्यश्चेह विद्यन्ते	१६
युक्तिशब्दौ पुराणस्य	२६१
युष्मदर्थे परित्यक्ते	१६७
युष्मदस्मद्विभागज्ञ	२७६
येनैवास्या [illegible]योगः	१३२
यैरद्राक्षीत्पुरात्मानं	२६८
योऽयं स्थाणुः	१०४
यो हि यत्र विरक्तः स्यात्	२९९
[illegible] लिङ्गमबोधस्य	३००
रिपौ बन्धौ स्वदेहे च	९८
रूपप्रकाशयोर्यद्वत्	२८९

	पृष्ठम् ।
लक्षणां सर्पवद्रज्ज्वाः	२५०
लिङ्गमस्ति त्वनिष्टत्वात्	२९
लिप्यते ऽज्ञानतः	३१
वर्चस्कं तु	९५
वर्चस्के सम्परित्यक्ते	९६
वर्तमानमिदं	१५
वर्षानपाभ्यां किं	१२३
वस्त्वेकनिष्ठं वाक्यं	२३३
वाक्यप्रत्यक्षमानाभ्यां	२१७
वाक्यश्रवणमात्रात्	९०
वाक्यैकगम्यं	७७
वा[illegible]वैनैव वृत्तेन	२९४
विक्रियाज्ञानशून्यत्वात्	२१७
विदेहो वीतसन्देहः	५१
विद्यात्तत्त्वमसीत्यस्मात्	२६७
विना ज्ञानप्रहाणेन	९३
विपश्चितोऽप्यतस्तस्य	२२४
विरहय्य क्रियां	१९
विशेषणमिदं सर्वे	२७९
विशेषं कञ्चिदाश्रित्य	१७७
विष्णोः पादानुगां	३०४
वृत्तिभिर्युष्मदर्थाभिः	२४७
वेदान्तोदरवर्त्ति	३०५
वेदान्तोदरसङ्गूढं	८
वेदावसानवाक्योत्थं	१२
व्यवधीयन्तएवामी	१४२
व्युत्थिताशेषकामेभ्यः	४५
व्योम्नि धूमतुषाराभ्र	२४६
शब्दाद्याकारनिर्भासा	१३७
शब्दाद्याकारनिर्भासाः	१२७
शमादिसाधनः	१६७

DR.RUPNATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

	पृष्ठम् ।
शयानाः प्रायशो लोके	२४९
शिर आक्रम्य	९५
शुध्यमानं तु	४४
शुभैः प्राप्नोति	४०
श्राविता वेत्ति	८८
श्रीमच्छंकरपादपद्म	३०३
श्रुतयः स्मृतिभिः	७२
श्रुतिश्चेमं जगाद	४१
षट्सु भावविकारेषु	१३४
षष्ठीगुणक्रियाजातिरूढयः	२४८
संसारबीजसंस्थोऽयं	२७२
संसारितद्वितीयेन	२३१
सकृत्प्रवृत्त्या	५७
सकृदात्मप्रसूत्यैव	२९५
संक्षेपविस्तराभ्यां हि	२६४
सदाविलुप्तसाक्षित्वं	१०८
सदेवेत्यादिवाक्येभ्यः	२९१
सन्निपत्य न च	७९
समस्तव्यस्तभूतस्य	६१
संप्रसादेऽविकारित्वात्	२९०
संबन्धोक्तिरियं साध्वी	३०६
सम्यक्संशयमिथ्यादिः	१८०
सम्यग्ज्ञानशिखिप्लुष्ट	२९६
सर्वजात्यादिमत्त्वे	६३
सर्वधीव्यञ्जकः	१२६
सर्वप्रमाणासम्भाव्यः	८०
सर्वमत्रानुजानाति	२९१
सर्वसंशयहेतौ हि	१९२

	पृष्ठम् ।
सर्वाकारां निराकारः	१३०
सर्वोऽयं महिमा	९०
साध्यसाधनभावः	२५
सामानाधिकरण्यं च	१६५
सामानाधिकरण्यादेः	१७२
सामान्यं हि पदं ब्रूते	१८९
सामान्याच्च विशेषाच्च	१७८
सामान्येतररूपाभ्यां	६५
साविशेषपरिच्छेदिनी	१३५
सुखदुःखादिभिः	८१
सुखदुःखादिसंपृक्तां	१३१
सुभावितं चार्वपि	३०४
सुभ्रूः सुनासा	११७
सुषुप्ताख्यं तमोऽज्ञानं	२८७
सेयं भ्रान्तिर्निरालम्बा	२२०
स्थाणुः स्थाणुरितीवोक्तिः	२२५
स्थाणुं चोरधिया	५३
स्थाणोः सतत्त्वविज्ञानं	५३
स्थूलं युक्त्या निरस्य	९९
स्मृतिस्वप्नप्रबोधेषु	१३३
स्वमनोरथसंक्लृप्त	८५
स्वमहिम्ना प्रमाणानि	२३१
स्वरूपलाभमात्रेण	५५
स्वर्गं यियासुः	८०
स्वसाधनं स्वयं नष्टः	१४९
हितं सम्प्रेप्सतां	२९
हेतुस्वरूपकार्याणि	५६

DR.RUPNATHJI (DR.RUPAK NATH)

www.astrology-tantra.com